श्रीकाशीजीमेमहल्लाघुघुरानासामाकीगलीमेआदिविश्वेश्वरकेपास श्रीयुतबाबूहरखचंदजीकेबाडेमे
दुर्गाप्रसादकटारेकेमनेजयन्त्रालयमेसरभशिवभट्टीकछापीगई लिखामहैसपाँडछापनेवाला।
पुस्तकजिसेलेनाहोयसोचांदनीचौकमेकुंजगलीकेपश्चिमफाटककेपासदुर्गाप्रसादके
दुकानमेमिलैगी सम्वत् १९ २२ मी॰ माघशुक्ल १२ द्वादश्याम् शनिवासरे ॥ ॥

स०भ०
१

श्रीगणेशायनमः ॐ प्राणनाथपदाम्भोजनखचन्द्रमरीचयः व्याकोचयन्तु सततं मम मानसकैरवम्॥ कारकविभक्ते
र्बलवत्त्वाद्द्वितीयेति। कुक्कुटाण्डसमासवत्स्त्रीपुंसयोरत्यन्तैः पूर्वनिर्दिष्टत्वेन नन्वस्तु नस एकार्थीभावात्। शरदः कृतार्थैर्निवत्सामान्येन पुंस
कं वा। एतेन तद्धितान्तत्वेन गुणवचनत्वाभावात्त्वतलोरित्यस्याप्राप्त्या पुंवत्त्वासङ्गतिरित्यपास्तम्। न च स्वस्त्यादिसाहचर्या
दित्यादि माघवोक्तयुक्त्यापि निर्वाह इति वाच्यम्। रावणाय नमस्कुर्यादिति भट्टिप्रयोगे द्वितीयाप्रसंगात्। न चासत्त्वार्थक
स्वरादिपठितस्य स प्रयोगः। नमस्पुरसोर्गत्योरिति सत्त्वानापत्तेः। तत्र जयमंगलानुरोधेन सविसर्गपाठकल्पनेपि स्वयंभुवे नमस्कृ
त्येत्यत्र समासानापत्तिर्दुष्परिहरा। वस्तुतः कर्मत्वमिह न विवक्ष्यत इति जयमंगलाशयः। अनुकूलं पितुमित्यध्याहारप
रत्वं यासूपास्या नरपरा इति वोध्यम्। एतेन फलाभावात्साहचर्यमिह न व्यवस्थापकमित्यपास्तम्। देवानां नमस्करोतीत्यस्य
फलस्य सत्त्वादिति वोध्यम्। फलाभावादुपपदविभक्तेरित्येव न प्रवर्जनरत्यस्य वक्तुं शक्यत्वाच्च। केचित्तु साहचर्येण नात्र नि
यामकमन्यथा विनिगमनाविरहेण जनत्वेनास्य स्वरसमाम्नायिकान्तत्वेनैव साहचर्यग्रहे देवेभ्यो नमोऽस्त्वित्यादावेव न तद
न्यादेवेभ्यो नमस्करोत्यत्र नापत्त्याभाष्याद्याकरग्रन्थासंगतिरेवस्यात्। किंच नमोवरिवश्चित्रङ इति सूत्रे भाष्ये नमस्यति देवा

ए०म०
१

3626

नित्यत्र चतुर्थीमाशंक्योपपदविभक्तेरितिन्यायेन समाहितम्। साहचर्येण द्योतकनमःशब्दे चतुर्थ्यं प्रवृत्तौ कव चः पूजा
र्थकत्वेन नमसो द्योतकत्वेन तदप्राप्तो भयमप्यसंगतमित्याहुः। तिरस्कृत्येत्यर्थ इति। फलितार्थप्रदर्शनमिदमिति पाठकाः
एवं च तिरस्कारार्थस्य परिभवतेरेव विचारार्थकत्वमिति नासंगतिरिति भावः। इदमेव युक्तम्। केचित्तु वैयधिकरण्येना
न्वयेन तत्संबंधिधानोस्त्यर्थः। तदर्थं प्रकृतिकल्पनं धातोरितियावत्। यद्वा कोशात्तिरस्कारार्थस्य परिभवतेर्धातोर्विभ
चारार्थकत्वे विषयत्वापत्त्यर्थकत्वे तदुत्तरणिचा तदनुकूलकृत्यभिधानाद्विषयत्वापादनरूपविचारार्थकत्वम्पारिभावय
तिरित्यर्थः। एतेन तयस्य कोशात्तिरस्कारार्थकत्वं परिभवतेर्न तस्य विचारार्थकत्वम्। यस्य भावयतेस्तत्वं न तस्य कोशात्तत्वमि
त्युभयमसङ्गतमित्यपास्तम्। यत्तु परिभवतेस्तिरोभवनं तत्पूर्वं तस्य तिरस्कारस्तत्मर्थ इति भूषणम्। तत्किंतस्य चौरादिकस्येदं रूपमि
निवा परिभाव्येत्यस्य तिरस्कृत्येति विवरणं सम्यगेवेति तन्न। द्वितीयाभ्यासनामार्थानुश्लासकवक्ष्यमाणकोशसंवादस्यासंगति
प्रसंगात्मममनुपरिभाव्येत्यादेरयमर्थः। कोशात्तिरस्कारार्थस्य परिभावशब्दस्य धातोः परिभाव्येत्यत्र णिलोपे धातुवत्
एतदुक्तित्वनेकार्थत्वसाधकस्य धातुत्वरूपस्य संपत्तिसूचनायेत्यन्ये। वस्तुतस्तिरस्कारार्थस्य परिभावशब्दस्यावयवो या

धातुत्वस्येति वैयधिकरण्येन व्याख्येयम्। अन्यथा तु न संभवः। उपसर्गसमानाकारत्वेन परेः पृथक्कृताच्छिष्टस्य धातुत्वाभावात् अ
नत्वाधातोरनेकार्थकत्वाद्वेवपरिभवतेस्तिरस्कारातिरिक्तार्थकत्वादेववासंगच्छते नन्मात्रार्थकत्वेतु आवश्यभावेनावज्ञाने
इति विफलमेव स्यादिति न संगच्छत इत्ति केचित्। तिरस्कारार्थस्य धातोर्विचारार्थत्वे पीति। इदं च णिच् द्योतक इति पक्षाभिप्रा
येणेति पाठक्रमः। हेतुमतीति सूत्रस्थान्तरग्रन्थविरोधात्। द्योतकत्वपक्षस्य कुत्सितपक्षमवष्टभ्य समर्थनं तु मनोरमायां तस्मात्कमि
ति मन्यमानो भाविनो पीति। अत्रग्रे यस्येति शेषः। इयमित्युक्तिः कौमुदीमतरिक्तारोपात्। उपमायां लिङ्गभेदजदुष्टत्वनिरासायारो
पः यद्वा भाविनोप्यर्थस्यान्यत्र बुद्ध्या विषयीकरणे स्पष्टत्वाद्भाविसूत्रविहितेत्यमितम्येन न परामर्शः। वृत्तिपरिच्छेदकत्वे
नेति। संज्ञाशब्दनिष्पत्तिच्छेदकत्वेनेत्यर्थः। अनन्तस्यापत्यं कर्मीरिहरिदत्तादीनां न संज्ञासूत्रत्वम्। अण्णादीनां जातित्वात्। ए
नेनन त्र संज्ञासूत्रत्वानि व्याप्तिनिरासाय संज्ञास्वरूपावधिर्न वादित्किंस्वत्नो मित्राः समाहिताः। अणुदित्यादि घ्व्याने श्वा।
त्वौ जसमौ डित्यादीनामपीति। अस्य विध्यर्थत्वे बहूनि फलान्यूत्यानि। अविधेय्यानन्तकार्यमिति। नन्वेकपदे स्वर
जीयतीत्यादि सिद्धेयेपरत्वाभावबद्भुत्तरस्य खण्डकसमुदायत्वमिति परिष्करिष्यमाणत्वेन प्रकृते च नरत्काननत्वेन तस्यानिम्

न्वेंनाविवक्षितो नत्वसंगतिरितिवाच्यम्। पदत्वेसतिनत्वमितितदर्थो न। प्रकृतेवसमुदायस्यानथ्यात्वात्। वस्तुतस्त्वनुकर
णत्वेनसौत्रत्वाच्छेतिमध्यमणिन्यायेनपूर्वोत्तरयोरन्वेति। अनुकरणत्वेनेमस्यनिपातानुकरणेचेनर्थक्यं। संहितायाअवि
वक्षयातद्धारणन्नयुक्तम्। एकसूत्रेनत्वभावात्। नदृक्रमिकोगुणेतिसूत्रउद्योतेएकयोगत्वम्वद्वयोसंहितापाठमात्रे
णेति· अतएवेकोयणचीत्यत्रसौत्रत्वादेवउ·मुड्वारयिष्यतेग्रंथकृता· यनुक्रमबोधकत्वेनवर्णबोधकत्वान्नकार
प्राप्तिरितितत्रसमूहस्यतत्वेपिप्रत्येकन्नत्वानपायादितिजरन्त आहुः। सौत्रेति। औपदेशिकश्रुतित्वस्यस्वयमेववक्ष्य
माणत्वेनतच्छन्दस्त्वादिमेवववक्तव्येच्छन्दोवत्सूत्रमित्यतिदेशप्रवर्तकं सौत्रत्वादितिकुत उक्त मितितदाशयं सएवप्रष्ट
व्यः। अन्येतुसूत्राणामिदंसौत्रम्· पाणिनिसूत्रमूलभूतंतदुपकारकंवाक्यमित्यर्थः। तत्वात्सौत्रत्वाच्छान्दसत्वादितियावत्
अतएवाणपिसफलः अतिदेशप्रवृत्तावभिप्रेतायान्तुसूत्रत्वस्येवतत्प्रवृत्तिप्रयोजकत्वेनतत्वादित्येववदेत्वा। णमित्याविष्कु
र्वितितदाशयं। इदंपंचम्यंतमपिनितीयांतवत्तुगुणेनव्याप्येत्तिन्यायाच्चप्रातिपदिकत्वप्रतिबंधद्वारएवविभक्तुत्पत्तिप्रतिबं
धकम्। एतेनातिदेशाल्लुगितिवक्तव्येशास्त्रबाधोक्तिरसंगतेत्यपास्तं। जातलुकि अनुपपत्त्याभाव्यानेपिबाधस्वहृया

नुसंधानस्यावश्यकत्वेन प्रत्युत तत्रैव गौरवम्। छंदसि सर्वविधीनां वैकल्पिकत्वेनाभावकल्पनेबाधाभावेनासंगतेरभाव
श्च। एतेन प्रतिसूत्रं प्रातिपदिकत्वस्य वक्ष्यमाणत्वेन तत्स्वपक्षत्वे लुकः सिद्ध्या सौत्रत्वादरो विफलत्वमपि निरस्तम्। जश्त्वाद्य
भावाय सूत्रप्रकृतिकसुबनुत्पत्तये तदादरस्यावश्यकत्वाच्च। किं च लुकि पूर्वभागस्य पदत्वे नियमेव यत्नेऽनेकसूत्रस्य प्राति
पदिकत्वानापत्त्या णत्वादेरितसंज्ञानापत्तिरुपायान्तरेण परिहरणीया स्यात्। पञ्चप्रातिपदिकान्तत्वसंपन्नाणादेरितसंज्ञायै प्र
त्येकं सूत्रोपदेशेनानर्थस्यावश्यकत्वेन वर्णोपदेशे आचार्यतात्पर्यकल्पनेनमानं। एवं च धनादौ धादिभ्य एव तत्रापि न
तदुत्पत्तिः। तथैव च चकारप्रत्ययोपि नेति सौत्रत्वबाहुलकत्वाश्रयणं विफलमिति तन्न। वर्णानामुपदेशः लृकारोपदेशश्च
दिभाष्योक्तिरस्यास्यतत्रमानत्वादिति सुधियो विभावयन्तु इति केचित्। यत्त्विति। एवं च पुनः शक्तिग्रहाभावेपि संध्युपजीव
व्यानिश्चयेनाविकृतरूपाद्युकारादिषु गृहीताजादिपदशक्तिः संधिकार्यकृतेः विकृतेषु अविकृतेषु चेति संदेहादुद्धरुध्येते
निभाव इति व्याचख्युः। तन्न। केचित्तु उपजीव्यस्य संधिकरणीभूताजादिपदशक्तिग्रहस्य विरोधात्सिद्धान्ते विरोधाभावादिति
अविकृतेषु शक्तिग्रहमुपजीव्य जातस्य विकृतेषु शक्तिग्राहकत्वे सत्यादिति भावः। ननूपजीव्यस्याविकृतरूपविशेषणा।

काराद्विवर्णरूपविशेष्यरूपस्य शक्तिग्रहोपजीव्यस्येत्यर्थः । विरोधात् कृतेतसंधौ तत्सन्निपातविघातः स्यादेव । सन्निपातप्र
तियोगिनोरुपादानप्रहस्यावश्यमपेक्षत्वात् एवंचवैयर्थ्यतः सम्यगेवेति चेन्न । पूर्वापरीभावांशे भाष्यादिनस्यागोपि अन्यत्र
त्यागेमानाभावादितिच भाव इतिव्याचक्षते । निर्णयसंभवादिति । यत्वेतन्प्रतीकमुपादाय अनेनशास्त्रप्रारंभएवसंदेहो
न्यादकशब्दप्रयोगस्याकोशात्संपन्नायकत्वात् आचार्यैरपरं कृतं इति संहितायाअविस्पष्टावीजपदर्शनामिदंकैयटोप
व्याख्यानमिति सूचयति अन्यस्यानिर्णयादित्येववरदिति व्याचक्षते । तत्राचार्यपदेन महेश्वरउतपाणिनिः । नाद्यः ।
तस्य चतुर्दशसूत्रीप्रारंभकत्वेपियावत्शास्त्रप्रारंभकत्वाभावेन शास्त्रेत्यादिग्रंथासामंजस्यात् । नांत्यः । मूलाभावादि
तिवक्तव्यं । सामर्थ्ययोगादिति । यस्त्वत्रल्यब्लोपेपंचमी । सामर्थ्ययोगंविहायइतिभद्रान् तत्कथंसंगच्छते । किंतस्य
फलंइतितएवप्रष्टव्याः । निष्प्रयोजनत्वरूपानर्थक्येति । निष्प्रयोजनत्वरूपानर्थक्याभावेसतीत्यर्थः । तद्रूपानर्थ
क्यप्रतिपादकप्रत्याख्यानभाष्येणविरोधोभिधेयपरत्वादित्यर्थः । तृतीयांतत्वेतूभयोरप्यानर्थक्यप्रतिपादकत्वेन
संगतौहेतुत्वानापत्तिः । वेदपारंपर्येणेति । परंपरैवपारंपर्यं गुरुशिष्यपरंपरेति यावत् । वेदसंबंधिनीयासानतर्यस्तर्यमा

णं॰ वेदस्यये ऽध्यापकाये चाध्येतारः तैरधीयमानत्वाद्ध्यायमानत्वाच्चास्यापि वेदत्वमिति भावः। अंत्यवर्णचतुर्दशेति। अ
त्रांत्यवर्णाश्चतुर्दश यस्मिन्समूहे रूपेवनत्वमदित्वं नानुबंधस्वं सरूपं समासांतः सम्यक् यथोचितं उपनत्समीपे कृत्वा आ
समंतात्कथितं इत्यंते भट्टा आहुः। अक्षरसमाम्नायमित्याचक्षते इति। केचित्तु तं खल्विमम् अक्षरसमाम्नायं ब्रह्मराशिरिति
हितोनेभुक्त्वा न नक्तं प्रब्रूयादिति ब्राह्मणेभ्य आचक्षते इति शाकटायनो व्याहेत्यन्वयः। आहेति त्वन्मतरीत्या ध्या
ह्रीयते। कीर्तयिष्यं तीत्यादौ शातासीत्रुमः अपर्णानुम इति वाक्यस्यैकदेशस्य शातासीमपर्णोमित्यस्यानुकरणात्तानुपप
त्तिः। यथा श्रुते त्वयपरत्वस्य अव्यवहिते मोवाचेत्यत्रान्वयेपि दुर्वच इत्याचक्षते। परेत्विति। केचित्तु ननु ज्ञानस्य घवान्
लवैयर्थ्यमत आह। किंचास्येति अत्र हि प्रत्याहारज्ञानस्य नवाप्यावश्यकत्वान्न तस्य लाघवमिति भावः। यवतेति। यत्वेन इत्य
त्यपवतः इको यणि त्यत्र परको चिरणो यणित्यत्र यरणः यथा दिपरं यादिपरं इत्यादिपर इत्यादिन्यासे लाघवमिति भावः। य
त्वंत्विम्यणः पृणोमयो इत्यादौ यस्येति न्यासेन ननत्त्रासु णकारलेव। अत एव बहुष्वित्युक्तं न सर्वेष्विति। एतेन यत्तु ननवैरगौ
रवमित्यपास्तं। ननु णोच्चारणं अपोपधातु योचि ऊर्यः इत्यादौ दोषाभावायय्यकारेणाकारेण र प्रत्याहारेण र प्रत्याहार इति

त्रापनार्थम्। पयप्तोः पर्यायत्वात्वाद्यभावश्चेत्यत आह। किं चानुबंधेति हेतोरव्यापकत्वादिति अनुबंधा अच प्रत्याहारेग्र
हेणगृह्यमाणता शून्यत्वात् प्रत्याहारसिद्धेः प्राक्लुप्यमानत्वात्। इत्यनुमितौ हेतोः पक्षतावच्छेदकावच्छिन्नवृत्तित्वरूपव्यापक
त्वाभावापत्तेरित्यर्थः। स्वदुपपादयति तवेत्यादिना लोपयोरभावेत्यंतेन मम तु अकारे नुबंधत्वस्यैवाभावेन न क्षतिः। नन्वस्तु प्र
त्याहारार्था अनुबंधा इति भाष्यात् ज्ञापकसूत्रस्यानुबंधत्वं पक्षतावच्छेदकं न तु केवलानुबंधत्वं आकारे च तद्भावान्नाव्या
पकत्वं हेतोः। किंच प्रत्याहारसिद्धेः प्रागित्यस्य कतरोऽर्थः। यावत्प्रत्याहारसिद्धेः प्राक्लुप्यमानत्वमर्थः उत यत्प्रत्याहारे यदनु
बंधग्रहणं तेन प्रत्याहारसिद्धेः प्रागित्यर्थः। नाद्यः हल्प्रत्याहारसिद्धेः प्रागचादेरपि लुप्यमानत्वाभावात्। द्वितीये भाष्ये
जित्युक्तानविशिष्ट्यैव पक्षतावच्छेदकत्वं वाच्यं तथा च णित्यत्र साकारे तद्भावात्तत्रतदापत्तिरतो लक्ष्यासिद्धिमाह। प्रत्याहा
रस्यादिनापत्तिश्चेत्यंतेन। चकारो व्यापकत्वापत्तेः समुच्चायकः। न वा इति तृतीयान्तस्य ग्रंथस्य च मणिन्यायेन पूर्वोक्तापत्तौ उत्त
रपक्षश्चैतयोरन्वयः। वस्तुतो हेतुद्वयाव्यापकत्वापत्तिरित्यर्थः। शेषं पूर्ववत्। नन्वनुनासिकत्वसमानाधिकरणजातिनिर्दे
शः उत ह्रस्वत्वसमानाधिकरणजातेः नेत्याद्य आह। अनुनासिकेति। अंत्ये आह सो सीत्यादौ। वस्तुतो गुणभेदकत्वस्याव्यापक

स·भ
४

जातिनिर्देशस्य च भगवदभिमतत्वेनसर्वत्रदोषइतिबोध्यं।एवंचसोस्यादिरितिनिर्देशस्यरूपाचारोत्रसंभवतिमित्तदेपरयेऽर्थंस्या
पकत्वंतृतीयस्यभज्येतइतिनायमित्संज्ञकइतिसिद्धं।अनित्संज्ञकत्वमेवदृढयति।अतएवेति।वार्तिकार्थस्तुप्रत्याहारेष्वभि
लापानियहणानिअचांग्रहणानियाहकाणीतियावत्।तेष्वइउणादिसूत्रेषु।अधिकरणेसप्तमी।प्रत्याहारेष्वनुबन्धानाम्।अजा
दिसंज्ञार्थमनुबध्यमानानांणादीनामित्यर्थः।निमित्तात्कर्मयोगेतिसप्तमी।फलंहितत्तन्निमित्तंप्रत्याहारस्यफलत्वञ्च
तत्करणस्यतन्निष्ठविषयेच्छाधीनत्वात्।कर्मयोगस्तुप्रत्याहारस्याजादिसंज्ञारूपस्यसमूहस्यावयवेनानुबन्धनंकर्मणा
प्यादिनासमवायरूपयोगसत्वाद्बोध्यइति।यत्तुइत्यतःप्राक्प्रत्याहारेवर्णसमाम्नायेइत्यपपाठः।पौनरुक्त्यापत्तेःभा
व्यःभावाच्चानहल्प्रत्याहारइतिवक्ष्येनेतुसकलप्रत्याहारमूलभूतत्वात्।हलंशेएवतत्राशंकासमाधानेचित्येनतदसङ्गतिस्स
ष्टैव।ननिदम्भाष्यंहश्रणादिषुटादियहणनापादनादुपलक्षणतयात्वयापिनेयम्।अजिग्रुक्तित्वापाद्यमानग्रहणकानांप्रा
प्त्यादितिनास्माकम्प्रतिकूलमित्याशंक्यते।नचहश्रणादीति।आ दीति।आदिनेणा एवम्त्वरामर्षीकते।अठस्वित्यत्रोक्तवन्ने
स्यात्मितिभावःतदघटितेति।हलघटितेनेत्यर्थः।यद्वा तेनोच्चारणार्थवर्णेनघटितास्सहितास्तदघटिताहादिशब्दास्तेषांप्रत्याहारेत्वञ्च
दवबोधकेइत्यर्थः।इणादेरपिहादिबोधकतयातत्वापत्त्यात्तत्रापितेषांग्रहणंस्यात्।अजादीनांतुतत्रायंसमाधिःएतदर्थमेवइदघ

एम:

टितिंक्रमः। अन्यथा प्रत्याहारेऽप्येवं वदेत् न च पुनः पुनरिति भाष्योक्ते सञ्चारितान्येम। यथापूर्वोक्तं गृहीतानामनुबन्धानां नामक्रि
ष्ट्यसंस्पष्टोपपत्तिस्तथा हल्येन्याद्युपपत्तौ यावद्धकारोच्चारणं वैयर्थ्यात्। अत एव पुनः पुनरिति वीप्सितम् ननु तदुच्चारणे नोच्चारण
र्थवर्णरहितानां तादृशप्रत्याहारेण ग्रहणमिति ज्ञापनेऽसमापिन प्रतिकूलमत आह। न द्वितीयेति प्रयोगाभाव एव भाष्यादिना प्र
र्थ्येन न तूपलक्षणत्वे इति भावः। ननु राजा हससि भूयिष्ठं च अत्र प्राविश्यादि प्रयोगादुपलक्ष — णे एवं तात्पर्यं भाष्यस्येति चेन्नो बाध
काभावेऽपि साधकाभावान्नानुनासिकत्वमित्याशयेनोपसंहरति। तस्मादिति। वस्तुतस्तु ननु समाजानेन टस्य माध्यां द्वितीयं स
दित्याशंकते। न च हशेति। अनभिधानाच्चेति। चेनेनत एवारुचेर्लोपवलुत्त्वे हल् न तरसमुच्चयः पूर्वोक्तांरुचेराह। तस्मादि
ति इत्यर्थः। यद्वा हशादिग्रहणे टादिग्रहणं कथं नेत्यस्य संग्रहाय कौस्तुभोक्तमेव व्याख्यानमुचितं वार्त्तिकस्य भाष्येऽस्तु
इत्यप्यजादिशब्देष्वित्यर्थकं सूत्रचतुष्टयोपादानमपि चतुर्दशसूत्र्या उपलक्षणम्। अस्तु हलत्तु च समाधिवैयर्थ्यं कुत
इति शंकापास्तवापि दुःसमाधेयत्वेनोपलक्षणत्वे चतुर्णामेव ग्रहणं कृतमित्यादिमा प्रतिमाचोदयीः। अनुबन्धानामग्रह
णास्यानिष्टत्वेनान् — मेवोचीचर इति शंकां निरा — सायभाष्ये प्रत्याहारार्थ्या इति। एवञ्चानुनासिकत्वं प्रति ज्ञानतो न शं

कापरभाष्यविरोधस्तृतीयहेतोरव्यापकत्वापत्तिस्तु नवापि दुःपरिहरा॥ हल्प्रत्याहारसमकालमेव वलादिप्रत्याहारसिद्धौ
प्रतिबंधकाभावेन वलादिप्रत्याहारेषु यकारादिप्रवेशस्य दुर्वारत्वादित्याशयेन शंकते। नचेति। हश्वणदीत्यादिना वलादि
नां ग्रहणमुपलक्षणं यादेः। उभयमपीष्टयति। न पुनरित्यादिना। तृतीयहेतोर्व्यापकत्वं समर्थयतः कौस्तुभकृतोपीदमा
वश्यकमिति इत्याशयेन शंकिते दूषणांतरमाह। हकारादिषु पुनः पुनरित्यादिना। वक्तुं शक्यत्वादित्यस्याग्रे लकारस्य
णादिसंज्ञानापत्तेरनुनासिकत्वप्रतिज्ञानैष्फल्यापत्तेश्चेति भावः। अप्रामाणिकमिति। अनउरादिषु प्रयोगसमवायित्वाभि
यानुनासिकत्वांगीकारेपि आवश्यकेन सोस्येत्यादिनिर्देशेन प्रत्याहारबोध्यत्ववारणेनेहत्वे मानाभाव इति। अतएवा
इउसूत्रेऽइयोर्न विधेयविषये उच्चारणार्थस्यानुनासिकत्वमावश्यकमित्युक्तमिति भाव इति दिक्। नाज्झलौ। तुल्यजातीय
ति। ननु तुल्यजातीयेत्यत्र किंत्वेन साजात्यं विवक्षितं अच्त्वहल्त्वाभ्यामिति तु नान्योन्याश्रयापत्तेः। साजात्यमितितेनेत्र
नयोश्च सत्त्वोः साजात्यमिति चेत्कृणु औकारइति अच्त्वाव्याप्यधर्मानवच्छिन्नत्वेनाचि। अच्त्वाव्याप्येणत्वादिमादा
यासंभववारणाय तदइति अकत्वादि आदाय तद्वारणाय द्वितीयम्। हकारइति हल्त्वाव्याप्यधर्मानवच्छिन्नत्वेन।

हलितिवत्। तद्भाष्याद्दृत्वादिमादायतद्वृत्तियण्त्वादिमादायचतद्धारणायोभयम्। अस्मद्हलपदाभ्यां स्वरव्यंजनयोर्वि-
वक्षणात्त्वेत्याहुः। नविभक्तावित्यादाविति। आदिर्नोपदेशेजिन्यस्य स्वपूर्वस्य संग्रहः। हलंत्यमित्येतद्वाक्यार्थजिज्ञासायां
उपस्थितपूर्वोत्तरसूत्रयोः सार्थक्यस्य पारकेवाक्यार्थेनिष्पन्ने पश्चाद्धलूपदार्थः कइतिविशेषजिज्ञासायां आदिरंत्येनेत्ये-
तद्वाक्यार्थ्यावृत्तिरितिभावः। प्रकृतसूत्रस्थभाष्यमपीदृशानुकूलं। अन्येतुप्रथमं आदिरंत्येनेत्येतद्वाक्यार्थजिज्ञासा-
यां अनुपसंजातविरोधन्यायेनकृत्रिमत्वज्ञानाभावेनकृत्रिमाकृत्रिमेत्यस्याप्रवृत्त्याच हलितिसूत्रेंत्यमितिदिग्यर्थे
तेनो नविभक्तावित्यादिवैयर्थ्यानुसंधाने आवृत्त्या अर्थांतरस्यप्रकल्पनादित्यमसतमाष्यंतु एकदेशयुक्तमेवेत्याहुः दशासूत्रे हत्ना-
विति। अन्यथाहकारादेः संज्ञा उत अकारादेरितिदुर्निश्चयस्यादितिभावः। रूपभूतावविति। अशोकवनिकान्यायेनेनद्।
क्तिः। ज्ञापकादिनान्यथाकारणेनतु तरस्तुशमनमेत्यादिज्ञापकैरयमर्थोपिव्याख्यातेत्याहुः। मनोव्यापारगौरवमिति। ननु
त्रकिंगौरवं। योगविभागप्रयुक्तंतु नैं आवृत्तिंकुर्वता त्व यापिवाक्यार्थद्वयस्वीकारात्। नियमप्रयुक्तंतु हलपदस्यक-
रणेननिमातव्यं। ज्ञापकंत्वावृत्तिसत्वेनविभक्तौन्याधाश्रयणीयमेवेतिनतत्कृतमपि। तर्कितन्यासेऽन्योन्याश्रयश्च।

स॰भ॰
७

केवलेपिरूपे तानिवेत्स्यते। मध्यमो वर्णइति। वृद्धिगुणादिसंज्ञासिद्धसंज्ञानामगतिः सामानाधिकरण्यात्। तथा च मध्यमो
वर्ण आदिरित्यादिसंज्ञको भवतीत्यर्थः। रूपसिद्धिस्त्वाणन्तइत्यत्रैऔतिपररूपं कृत्वौमाङोश्चेतिपररूपकरणेन बोध्या। अ
नएवाउत्वात्रूहेतुनमानमिति। नचाहूतोयमानन्तदेव मानन्तत्रेतिवाच्यं। शंकापरभाष्यादितस्तदभावानुमितेः। इ
त्यूह्यमिति। यत्तत्रप्रकरणे द्विर्वचनेनैवनिर्देष्टव्यमितिपाठकल्पनं। नपुंसकमनपुंसकेनेत्येकवचनं। तस्याप्येक
शेषस्यन्याय्यत्वात्। सर्वश्चेदं प्रकृतसूत्रैकैव्यट एव। नन्वेवमपवादबोधात्पूर्वमुत्सर्गवाक्यस्य लब्धसंस्कारकत्वा
पपत्तौ उदासीनविषयेष्वापवादविषयेपि प्रवृत्त्यापत्तौ पश्चादुत्सर्गं वं प्रति ब्रूयात् माभूत्क्या इति तेन किंकृतं स्यादि
तिस्थानेन तमसूत्रभाष्यो न्यायवाधितापवादशास्त्रवैयर्थ्यापत्तिमूलकेन प्रातिपदिकार्थसूत्रभाष्यपठितेन
पूर्वमित्यादिन्यायेनोत्सर्गवाक्यार्थबोधात्पूर्वमपवादवाक्यार्थबोधस्यावश्यकत्वसूचनेन प्रागुक्तरीत्यासुपूर्तिरू
तिष्ठ तत्प्रभावेनान्योन्याश्रयस्तदवस्थ एवात आह पूर्वं ह्यपवादेत्यादि। इतिवाक्यस्येवापवादशास्त्रस्येति। वा
क्यस्येवापवादशास्त्रस्य वैयर्थ्यापत्त्या चापवादशास्त्रपर्यालोचनेनेत्येव पाठइत्यन्ये। न्यायानंगीकारेपीति।

राम:
७

ननु कलुगादिस्थले तथास्तु वंतत्वेपि तस्य लोप इति विषये नैवं वक्तुं शक्या एवेति दोष एवेनाशंक्यो दंसुलभमिति। द्वि
धेति। द्विगर्थेस्तु तुल्यभिन्ना हलश्चेत इति प्रथमवाक्यार्थे न पादीनामित्वं न तु विभक्तिपदार्थे निश्चये विभक्तिस्थं तु स्व
भिन्ना हल इति द्वितीयवाक्यार्थेनाविभक्तिस्थ तु स्वानामित्वमिति। नन्वेवं त्वाइ हलावित्यत्रापि आक्षरसमाम्नायि।
का अचो हलश्च न मिथो न सवर्णा इति प्रथमवाक्यार्थेपि अणुदित्सूत्रबोधानंतरं अचस्तद्गृहीताश्च हल्भिर्मिथो न सव
र्णा इति द्वितीयो वाक्यार्थः स्यादेव तथा चाकारप्रश्लेषो व्यर्थः वाक्यापरिसमाप्तिप्रतिपादकभाष्यासंगतिश्चेति चेन्न
न विभक्तावित्यादौ विभक्तिग्रहणसामर्थ्याद्द्वितीयवाक्यार्थांगीकारेपि अन्यत्र तदंगीकारे मानाभावात्। स्पष्टा चेयं री
तिः प्रकृतसूत्रे भाष्ये यथासंख्यसूत्रसामर्थ्येन तत्र तथांगीकारेपि अत्र तथाकल्पने मानाभावादित्यादिना। नन्वे
षहलंतमित्यस्य बाधकालेऽपदेशो जितिना ऽक लावित्यनयोर्बोधाभावे नाणुदिदित्यस्य वाक्यार्थो ज्ञाने नोदितः सव
र्णग्राहकत्वाभावान्न विभक्तावित्यत्र तु शब्दस्य तवर्गबोधकत्वाभावेन तद्जन्मासंभवाद्विभक्तिस्थनकारस्येत्वापत्तिः
पकारस्येव दुर्वारा तु शब्दस्तु तिचोरितिवद्धारणार्थो कारेण तकारमात्रबोधक इत्येव स्यादिति चेन्न। परस्मिन्नित्यादि।

निर्दिष्टेऽपि हल्ग्रहणे हल्पदस्य नकारभिन्नत्वपरत्वनिश्चयात्। एवं तर्हि वर्गग्रहणं व्यर्थमिति चेदस्तु तथा। नाज्झलाविति सूत्रस्य
प्रयत्नभेदप्रयुक्तसावर्ण्याभावार्थत्वमिति मते तु शाब्दस्योदित्त्वं ज्ञापकायत्तमिति मतेन उदितः सवर्णग्राहकत्वस्य पू-
र्वमपि संभवेनादोषाच्च। मतान्तरेऽपि लोपादिनैव जातत्वनिवृत्तिनिरङ्गीकाराच्च। न विभक्तौत्यत्र लुप्तनिर्दिष्टेन कार इत्यस्या-
पि वक्तुं शक्यत्वाच्च। आदिरन्त्येन॥ उभयोपादाने तु एतस्मिन्नदोषो लोके इति पाठः। प्रतीतिर्लक्षणावश्यकत्वे हेतुः। ल-
क्षणस्यानायत्तौ हेतुर्न बोधकः। सोऽन्त्य इतीति। इ तेति किमिति। अस्य चतुर्दशसूत्रैकवाक्यतापातेन सूत्रान्त्यस्य ग्रहणेन त-
स्य चेत्त्वस्यैव सत्त्वादिति प्रश्नः। मा भूदिति। नद्येकवाक्यत्वेऽपि सूत्रान्त्यस्यैव ग्रहणे मानाभावेन विवक्षितसमुदायान्तत्वस्या-
भावेऽपि सत्त्वम्। परस्मिन् सतीत्यादिलक्षणामपि विवक्षा निबंधने। अत एवेणादिप्रत्याहारसिद्धिः। अन्यथा तत्र सूत्रा-
देरेव ग्रहणेऽसिद्धिः स्पष्टैव। एतेन पूर्वस्य दीर्घोण इति ज्ञापकाद्येन प्रत्याहारस्तदवधिकानामेव ग्रहणे सिद्धेऽन्त्यपदं सामर्थ्ये-
न सूत्रान्त्यग्रहणेन सिध्येदिति सुवचं। एवं हि अन्योन्याश्रयश्चैन स परं लाघवमित्यपास्तं। एवं चेण्ग्रहणस्त्वन्यादिज्ञापकान्तयो-
बोधकत्वस्तदवधिकानामेव पूर्वेषामाक्षेपसिद्धे आदिग्रहणसामर्थ्यात्सूत्रादेरेव ग्रहणापत्त्याऽऽद्यासिद्धिः स्यात्। ज्ञाप-

पकां सूत्रावयवप्रत्याख्यानेव हूपपत्त्रवापत्तेश्च। सूत्रेषु। वर्णसमाम्नायस्थेषु। तदभावादिति। लोपस्य सामर्थ्याद्भा
वि फलाभावात्संज्ञापिनेत्यर्थः यत्तु शक्तिग्रहानुपूर्वमर्थवत्वाभावेन प्रातिपदिकत्वाभावान्नव्यवसितान्यत्वाभावेन संज्ञा
प्राप्तिरेवेति। तन्न। यत्र सति प्रातिपदिकत्वे परिष्कृतार्थत्वं भावितत्र संज्ञेति न दर्शयात्। अन्यथा रामइत्यादावपि संति।
प्रातिपदिकत्वे परिष्कृतार्थवत्त्वमित्याभाश्रयस्याप्याद्यस्य नेति शक्तिमाह कप्रत्ययनिमित्तबवफलम्। इमिनात्यादिषु
काहेरितेपि चतुर्दशसूत्रीसम्बन्धिविवक्षितानन्यत्वाभावेन इदन्त्यसदृशेनेत्यर्थावश्यकत्वसंज्ञाविरहेपि तत्र दृष्टेने
रित्याह। अन्येनेत्यस्येदन्नेति। ननु तत्र सूत्रेषु लोपाभावस्य सामर्थ्यात्कल्पनापेक्षया चतुर्दशसूत्र्यामेवोच्चारणसाम
र्थ्यं न तदभावः कल्पनामेव लघुत्वपदे लक्षणाश्रयणं न हलि अकारं ग्रहाभावं वा यावश्यकत्वमेतेषां प्रत्याहारवाच्या।
तापिनेतिचेन्न। व्यक्तिपक्षे ऋलृक्सूत्रस्थस्य सेगादिशब्दस्थस्य एकस्य भेदात् तथार्थावश्यकत्वेन तदेकवाक्यतया जाति।
पक्षेपि नष्टेवावितत्वान्। नयास न लोपश्च बलवत्तरः इति भाष्यस्यासंगतिप्रसंगश्च तदेतदाह व्यक्तीति। नन्वेवमादि
प्रत्याहारे जगादीनां ग्रहणं माभूदिति कथमुक्तम् ऋकारादीनि वक्तव्यमत आह। अचिषु इतीति नारयन्नी इलेत्यमसिद्ध

स.भ.
६

लादिति। अलोन्त्यात् इहलोन्त्यानन्तरः न तु रूपस्य समानाधिकरणः निर्दिष्टस्येतो पि तिष्ठतीत्यादावितिभावः। इत्संज्ञायाः पदि
त्राणेति पञ्चमीसमासः। नान्तरीयेति। अन्यनिष्पाद्यकफलनिष्पाद्यं विनेत्यर्थः। उच्चारणेपीति शेषः। तेनेति। अध्याहृते
णेत्यर्थः। आद्योच्चारणकाले इत्संज्ञाभवनमित्यर्थे तु न स्यात्। तत्रार्थवाधस्यानन्तकालात् पूर्वमनभिव्यक्त्यात् तत्काले इत्सं।
ज्ञायाः पूर्वं च त्वात्। नाऽकलाविति। सूत्रभाष्य विरोधेनाऽऽव्यानदयवधानेति। पयो दृष्टो इदम्· अनुबन्धविनिर्मुक्तस्यैव पदार्थो
पस्थितिरित्यर्थः। गुरुकुलवत् समासः। नन्वेवं तस्य लोपे न तत्र च नपानद्रुपस्थितिर्वाच्येति तस्यैवार्थवत्त्वान्न तो विभक्त्यु
त्पत्तिरुचिता। अनुबन्धसहितस्यैवाऽऽख्यानं आहाघुडित्यत्रेति· तत्र संज्ञापामपि लोपो नोच्चारणसामर्थ्यादित्यथास्य
रूपप्रतिपत्तिरेव न स्यादिति भावः। वैयाकरणेति। व्याकरणशब्दाद् दिकोऽनुशासनादेरवेति त्यचेत्यञ्जि प्रावृद्धजन्ये याक।
रणशब्दे चित इत्संज्ञयोरात्त्वापत्तिरित्यर्थः। यद्यपि इत्त्वेपि प्रत्याहारसिद्धिरूपफलसत्त्वेनानर्थक्याभावात्तदुपस्था।
प्येन तत्कार्यमिति समाधानं वक्तुं शक्यं तथापि न्यायं समाश्रित्य माह। तत्त्वाभावेति। प्रातिपदिकान्त त्वात् तु न जल्पम्।
पत्रसंज्ञातफलाभावेन तद्विषयके संज्ञाशास्त्रस्य वाक्यस्यानुपपन्नत्वात्। घुडादीनां तु तदनुबन्धसामर्थ्याद्वाक्यमुपपन्न

रामः
६

क्तेइतितत्सामर्थ्यादुपस्थाप्येकार्य्यमितिबोध्यम्।नविभक्ताविन्त्यस्यानर्थकत्वपरिहारंतुउपसंजनिष्यमाणेतिन्यायमु
लकमर्थमाह।नविभक्तौविलयादीति।आदिनाप्रत्ययादिपरिग्रहः।यत्रतुसुङस्यौरौट्सुपोर्नविभक्तित्वेस्यनंप्राप्तिस्त
त्रत्वनुबन्धविविनिर्मुक्तस्यैवविभक्त्यादिसंज्ञाःपूर्वमित्संज्ञायाअवृत्तौवीजाभावादितिबोध्यम्।अतएवेतिपदा
र्थोपस्थितेरनुबन्धविनिर्मुक्तत्वादेवेत्यर्थः।अन्यथानदानीमनतत्वादाशंकासमाधानयोरसंगतिस्स्यादेव।।प्रत्ययइ
त्यस्यादेशाद्युपलक्षकत्वादेवाह।अप्रत्ययइत्यनेनेति।अनंबयवाइति।उपस्थापकानवयवाइत्यर्थःभक्तांविन्तत्रेति।
तदुपस्थाप्येइत्यर्थः।।यथाहृश्वन्यादौचकारादिः।सुहृडादौसंयोगान्तलोपेनाप्यहारादुक्तंकदाचिदिति।नदोषइति।
इत्याभावरूपइत्यर्थः।सर्वादेशत्वाभावरूपश्चसः।एकान्तत्वइवानेकान्तत्वेपियत्रिपृष्ठ्यवसितत्वमालक्ष्यसंज्ञाकार्य्ये
नात्रैवित्यंगीकारान्नचवैयर्थ्यमतआह।तस्यलोपेति।नकारेत्संज्ञकइति।नकारेत्संज्ञैर्बोधस्तदमितन्इत्यर्थः।एवमग्रेपि।
प्रक्रान्तस्कृत्रैति।व्याख्येयत्वेनप्रक्रान्तोपदेशापदलाभावधिभूतोपदेशेजिति ——— इत्यर्थः।एवमग्रेपिप्रकृतसूत्रेति।व्या
ख्येयत्वेनप्रक्रान्तोपदेशापदलाभावधिभूतोपदेशेजितिइत्यर्थइत्याहुः।अन्येत्वनुवर्त्तमानेशब्दस्थानचाभवतिपुनस्तोप्र

स·भ·
६

त्वादिति। अलोन्त्यात् हलोनन्तराः नत्वनुरूपस्य समानाधिकरणः निनिष्कृत्य नैपितिष्ठतीत्यादावितिभावः। इत्संज्ञायाः प्र-
ग्रामेतिपञ्चमीसमासः। नान्तरीयेति। अन्यनिष्पादकफलनिष्पाद्यत्वेनेत्यर्थः। उच्चारणेपीतिशेषः। तेनेति। अध्याहारो-
णेत्यर्थः। आद्योच्चारणकालेइत्संज्ञाभवनमित्यर्थेतुनस्यात्। तत्रार्थवाधश्च। तत्कालात्पूर्वमनभिव्यक्तत्वात्तत्कालेइत्सं-
ज्ञायाद्दुर्वचत्वात्। नान्तरलाविति सभाष्य विरुद्धत्वाच्चानवस्था नेति। पथ्योदृष्टोइदम्· अनुबन्धविनिर्मुक्तस्यैव पदार्थो-
पस्थितिरित्यर्थः। गुरुकुलवत्समासः। नन्वेवं तस्य लोपे न तच्छक्तत्या तदुपस्थितिर्वाच्येति तस्यैवार्थवत्त्वात्ततो विभक्त्यु-
त्पत्तिरुचिता। अनुबन्धसहितस्यैवार्थवत्त्वात्। आह। घुडित्यत्रेति· तत्र संज्ञापामपि लोपोत्तरोच्चारणसामर्थ्यादिनस्यात्स्व-
रूपप्रतिपत्तिरेव नस्यादिति भावः। वैयाकरणेति। व्याकरणशब्दाद्धिकोऽनुदात्तादेरञिन्यचेत्यणि पादवृद्ध्यैयाकर-
णशब्देपि तदन्तस्योदात्तत्वापत्तिरित्यर्थः। यद्यपि इत्वेपि प्रत्याहारसिद्धिरूपफलसत्त्वेनानर्थक्याभावात्तदुपस्था-
प्यनन्तकार्यमितिसमाधानं वक्तुं शक्यं तथापि न्याय्यं समाधिमाह। नत्वाभावेति। प्रातिपदिकान्तत्वानुनत्ववत्सु-
पत्रसंज्ञातफलाभावेन तद्विषयके संज्ञाशास्त्रस्य वाक्यस्यानुपपन्नत्वात्। घुडादौ तु तदनुबन्धसामर्थ्याद्वाक्यमुपपन्न-

रामः
६

वंनेइतिनत्सामर्थ्यादुपस्थाप्यैकार्थ्यमितिबोध्यम्।नविभक्ताविनष्टस्यानर्थकत्वपरिहारनंउपसंजनिष्यमाणेतिन्यायमु
लकमर्थमाह।नविभक्ताविन्यादीति।आदिनाप्रत्ययादिपरिग्रहः।यत्रतुसुउस्योरौट् सुपोर्नविभक्तित्वेस्पनंप्राप्तिस्त
त्रत्वनुबन्धपि विनिर्मुक्तस्यैवविभक्त्यादिसंज्ञाः पूर्वमित्संज्ञाया अप्रवृत्तौ वीजाभावादितिबोध्यम्। अतएवेति।पदा
र्थोपस्थितेरनुबन्धविनिर्मुक्तत्वादेवेत्यर्थः।अन्यथातदानीमनर्थत्वाद्राशंकासमाधानयोरसंगतिस्स्यादेव।। प्रत्ययइ
त्यस्यादेशाद्युपलक्षकत्वादेवाह।अप्रत्ययइत्यनेनेति।अनंवयवाइति।उपस्थापकानवयवाइत्यर्थः भक्तंविन्तेत्रेति।
तदुपस्थाप्येइत्यर्थः।।यथाहृश्वन्यादौचकारादिः।सुहृङादौसंयोगान्तलोपेनापहारादुक्तंकदाचिदिति।नदोषइति।
इत्याभावरूपइत्यर्थः।सर्वादेशत्वाभावरूपश्चसः।एकान्तत्वइवानेकान्तत्वेपियन्निष्ठव्यवसितत्वमान्त्रयेत्संज्ञावत्कार्य्ये
तत्रैवेत्यंगीकारात्नचैवैयर्थ्यमतआह।तस्यलोपेति।नकारेत्संज्ञकइति।नकारेत्संज्ञैर्बोध्यत्तदमित्वइत्यर्थः।एवमग्रेपि।
प्रकृतस्त्रेति।व्याख्येयत्वेनप्रक्रान्तोपदेशापदलाभावधिभूतोपदेशेजिति ———— इत्यर्थः।एवमग्रेपि।प्रकृतेप्रसूत्रेति।व्या
ख्येयत्वेनप्रक्रान्तोपदेशापदलाभावधिभूतोपदेशेजिति इत्यर्थ इत्याहुः।अन्येत्वनुवर्त्तमानेशब्दस्थानचाभवतिपुनस्तोत्र

हणेनलक्ष्यानिकत्वादित्यपधर्मसम्बन्धत्यागवत्तोऽत्रेत्संज्ञकत्वरूपधर्मसंबन्धस्यापित्यागात्सानुबन्धयोरेवग्रहणम्।
श्रीःनटुक्तंवार्त्तिककृता। नैवंवचनमसंमृगोऽर्थमिति। भाष्यकृतापिनथैवव्याख्यातम्॥ अतएवकेपरेनापि(?)ध्यानचो
पमात्रपराम्रश्यतइतिलटूस्थानिकत्वादिधर्मसंबन्धस्यापिसंज्ञाभवतीत्यर्थइतिवदनादिशब्दउपात्तः। सच्चकर्तनया।
विधानानतांसानुबन्धानामित्यस्यामवनेयवेनपलमृष्यनानकवत्(?) निष्टेनादावपिनदोषः। अनुबन्धविनिर्मुक्तस्यैवोपा
स्थितिरितिनियमस्यविधेयत्वेनोपस्थितप्रत्ययाद्यनुबन्धविषयएवस्वीकारेणंश्रुतनिष्ठासंज्ञासम्बन्धस्याश्रुतेनस्वासम्ब
न्धादन्ताद्धः न्याप्यास्त्वे नचानुबंधविशिष्टस्यैवसंज्ञाविधानादतएवसुब्विभक्त्यादिसंज्ञास्त्रन्तरेणनामेवेतिप्रागुक्तम्॥
संज्ञाविषयेसर्वत्रैवमेवेतिनदोषलेशशंकापिस्यादेवदोषेति। न्यायोपिविषमः। अनुत्पन्नस्यसनआदेशविधानानुपपत्त्या
वाक्यभेदेसतिप्रथमंवाक्येनोत्पन्नस्यसनःप्राप्तस्यस्त्रादित्वं(?) यद्वाक्यविहितादेशानप्रतीसृंतमितिपूर्वपक्षिणा कस्य वाक्य
भेदेगमकाभावेसनासनिविधायोपदेशापदानुवृत्तिमभिप्रेत्यचसिद्धान्तिनानानुत्पन्नेसनिप्रकृत्याभवितव्यम्। यदाचोत्प
न्नस्ननन्तदाकृतसासस्थ्याप्यस्त्वमीतिप्रकृष्टिनेभविष्यतीत्युक्तम्। तथाचतत्रवाक्यभेदसत्त्वाद्विधेयत्वेनोपस्थितप्रत्ययविष

थसंज्ञयादेशप्रतीक्षणाभावेपिश्रौतनिष्ठासंज्ञासंबंधमनतस्तु मितसंज्ञाप्रतीक्षतेनानन्वयप्रसंगोकटेरुपुक्तत्वाच्च ननुकार्यकालेण
कवाक्यतयाविधानाद्विधेयतेनोपदेशत्वमेवक्तवतोरितिवाच्यम्। यथोद्देशेतद्भावादितिपक्षद्वयेपिवाक्यैकवाक्यत्वेनवि
धेयत्वाभावाच्च। निपातनादित्वकल्पनेनादृशवचनकल्पनाद्गुरुः। अमतिकगतिच। यएवनुपित्वाभावादित्याहुः॥ भगवताकृ
तमिति। एवञ्चभावेघञ्प्रातयार्थोक्तिरुक्तेतिभावः। ननुवाऽलकाश्रयणमेवनत्रदोषइतिनदेकृइत्युक्तिरेवानस्याहं
किञ्च। भावेति। करणसाधनानुवृत्तौतुविहितस्यापिशासनकरणत्वेननत्वात्स्यादपीतिभावः। विहितेति एवञ्चउपस्थाप
कस्योपदेशेविद्यमानत्वेपिप्रक्रियावाक्यसमवायित्वाभावादितिभावः। ननूपस्थापकेएवंसंज्ञालोपयोः अंतत्यानि
त्यनुबन्धकस्यैवप्रयोगसमवायित्वमितिनदोषोतआह। परस्येति। एतेनविहितेपरस्यासत्वेनकादेरन्तत्वात्तुसाध्यविन्त्य
त्वात्प्रासक्तया। सामर्थ्येनेति। आदिरपिव्यपदेशिवत्वात्तत्वमेवेतिननदृश्यावृत्तये। इदमेवाभिप्रत्यसर्वोपिहलन्तत्तसमुदाय
स्यान्तस्त्वइत्युक्तंभाष्ये॥ ननुश्वनित्यादिप्रातिपदिकव्यावृत्यानानुवृत्तिवैयर्थ्यमतआह। अनणेवेति। अननुवृत्यानेति। एवंस
त्येतस्यभावघञ्जन्तेअग्रेचोच्चारणोविद्यमानमन्त्यमित्यपर्थउच्चारणस्यान्त्यमितिप्रत्यासत्तेः। अथेनुमशोभन्त्याघन्निर्

ग्विन्समुदायान्तस्यापि प्राप्नोतीत्युक्तिष्ठत एवतत्। शास्त्रं परत्वेनुपमन्यासत्त्याशास्त्रान्यस्यैवस्यादित्यनेन्स्थितिर्निर्णि धानुत्वं
दिनेति। शास्त्रकृतानेन तत्त्वेन बोधितत्वादित्यर्थः। यचादौ चान्तस्यैव तत्वं न चान्तस्य। तान्वर्थ्यस्य नत्रैवसत्वात्। नातिपर्ण्ये।
यहेवीजनुषमुप्रत्यय उकारः। ननु अस्थितपक्षे प्रयोजनदानृभाष्यं नन्वैव प्रतिकूलम्। अनुत्तरार्थत्वाद्धि तत्रैव क्षोदं कृ
त्वा न कर्तव्यमित्येव ब्रूयादिति ममतूत्तरार्थमावश्यकतया लाघवाभावेन क्षोदो न कृत इति साधकमेवातो न नुष्टतो साध
कान्तरमाह। एवञ्चेत्यादिना नुत्थानमेवस्यादित्यन्तेन। फलाभावेति। अत्र यथा फलाभावस्तथा विवरणं तो व सेयः। अव
सेयमेतेचास्माभिः कालेन। स्थग्रहणेति। गणाद्यावपठितेत्यर्थः। उपदेशशब्द इति बहुव्रीहिरयम्। उपदेशः कर्तव्य इतिश
ब्द इत्यर्थः। नन्वेवमिति। तस्य भावसाधनतयार्थकत्वाभावे इत्यर्थः। अन्यथा चरमेण पौनरुक्त्यापत्तिः। इत्युच्यमाने इति
इत्यनुवर्त्य विधीयमाने इत्यर्थः। तत्र। सूत्रद्वये। आदावित्यादिना वहो लोपेति। यत्रेति पूर्वेण समानाधिकरणम्। न।
त्रस्वलु। स्थानिनि। हेतुमाहायेति। एवञ्च षष्ठी प्रकृतेः प्रागेव परत्वान्नरङ्गत्वेनोपदेशो न रकोऽस्मत्सूत्र एवेन्त्संज्ञो वाधितस्य
कार्य्यनुप्रयोग एवेति। निरनुबंधकस्यैव प्रत्ययत्वेन विधानात्पश्चादेव तत्कार्यभागिति नदादेशांस्यकृतस्यानुबंधक

नेति भावः। लक्ष्येति। स्थानिवच्च स्थानिवद्वक्ष्यमाणेत्यादिलक्ष्यसिद्धिरित्यर्थः॥ एकाचं इति। उपदेशेऽनेन इत्यादौ ह्विति पा
ठः। आह्वेञ् इत्यपपाठः। तस्य नत्र कर्मप्युसमन्नत्वादिति। यणापत्तिरिति। शाकलेन निर्दिष्टोपपत्तिस्तु न भवात्। नन्वेवं य
स्यानिलोपापत्तिर्वाच्येति चेन्न। प्रत्याहारग्रहणसामर्थ्याभ्यां केणाइति ह्रस्वेन वाधात्। अनन्तरसूत्रेपि न सकृदनीतिभ
न्यायात्॥ इरश्चनासा मात्र्यान्केमिप्रेत्या। णास्त्रशब्द इत्येतं स्माण एलित्तु न शंका कलंकस्ये शापि सूत्रे कान्मतेनाहान्तुम
मिति॥ अतएवाहेति भावइति। वस्तुतः कोसौ प्रत्याहारो यत्र नानग्रहणमित्यवतरणं बोध्यम्॥ एकहीभिति। एकोदेत्रि
ल श्रमा आयस्य तस्य भावस्तत्वमिति वा पृषदादित्वयइति वदनेकपदो बहुव्रीहिः। एवमुत्तरत्रापि। एतेनैकादिरेशा
न्नानान्तरैकशेषयोरनभिधानस्य वक्ष्यमाणत्वेनेदमसङ्गतमित्यपास्तम्॥ व्याख्यानेनेति। अत्रावैनह्रुतदीर्घौ अन्येन
दीर्घः ओमभ्यादानइत्यादस्मात्। अचूहलौ प्रतिषेधइति षट्स्वसंज्ञादीर्घप्लुतयोरपि प्रामोतीति भाव्य उकालोऽज्ञात्या
शंकते॥ नन्विति। अन्ययोस्त्वारितस्यैव प्रत्यायकत्वात्सवर्णानां च मिथस्समभिव्याहाराद्याप्यजाति निर्दिष्टास्स्वेनां
शंकेव नो देति॥ उञ्ञजिति। समाहार द्वन्द्वः। भिन्ने च पदे। असन्धिस्तु शाकलेनासन्देहार्थः। दीर्घपाठस्तु इत्यर्थेकमित्य

दीर्घादिनिपातः। अदसो सेरित्यत्र वक्ष्यमाणरीत्या निर्देशोपपत्तिः। असंधिः संहिताविवक्षया। शाकल ह्रस्वेनेदानीं दीर्घ।
स्यापि विधानात्। इदानीं ह्रस्वग्रहणानामकिञ्चि — स्वनुभाष्य एव स्पष्टम्॥ नुगापत्तिरिति। न चैतदभावे नित्यत्वाद्वि
धिर्दुर्वारः। सत्कृतनुगतिन्यायाभिप्रायकतया भाष्यप्रयोजनके पचोत्कृतनुदूषितमन्यत्रेति वाच्यम्। प्राप्तविभाषा।
यां निषेधरूपतया निषेधानां बलीयस्त्वान्नित्यविधेरपि निषिद्धत्वात्। न चानन्तरस्येति न्यायेन ह्रस्वप्रयुक्तस्यनानि
षेध इति वाच्यम्। योगविभागसामर्थ्याच्चेत्यत्रैव दीर्घादित्यस्यापकर्षोस्तु उभयत्र विभाषेयमिति भगवतोभिप्राया
त्॥ कैयटमतेदूषणान्तरं दर्शयितुमाह॥ अन्तरङ्गेति। स्पष्टश्चेदं भाष्ये उक्तेरुतेषां न त्वेषिसन्याभावादाह। हल्स
स्वरेति। तेषां मते हि स्वरविधायकैः हलां स्थाने हलो विधीयेरन्निति दोषो वाच्यः। स एव नुस्थामिन्नेभावात्। अचोपि
न। अनन्तरतमत्वात्। यद्यपि तेषां तत्वेपतो नाव इति ज्ञापकत्वसम्भवति तथापीयं वाचनिक्यावश्यकीति भावः॥
विरोधादिति। तथा च पूर्वत्रधर्मिपरयोरपि इह लक्षणया धर्मपरतेति भावः। इतरेतराश्रयेति। पिवर्त्तिपदार्थपाः प्रका
रत्वेनतद्धर्मयोरपि प्रकारेणेति तत्समूहे भाव प्रत्ययेन मूले उदात्तानुदात्तत्वे इत्यस्योपपत्तिः। अर्द्धह्रस्व ग्राव्यर्द्धमात्रा।

पां रूढ इति भाष्यतो विशिष्टरूढेरेव लाभात् ॥ ह्रस्वपदस्येति । मूले बहुव्रीहिरिति भावः ॥ स्वशास्त्रेति । रूप्यं तद्धितस्यो
र्थे स्वशास्त्रसंकेतितो माभूत् आकालिका जहत्स्वार्था यस्मिन्मात्राकालिका जहत्स्वार्थे तेनावबोधकत्वस्याबोधकमितिया
वत् । कर्मण्यो हेतुत्वविवक्षयापादनीये तस्मै ॥ केचित्तु नादृश भाष्यानुपालम्भात् प्रमाणमेव ह्रस्वस्य ह्रीविति ह्रस्वं तेनस्था
मूलेन तत्पुरुषेऽपि न बाधकम् । वस्तुतस्तत्रस्य प्रमेयपरत्वेऽपि जानुदघ्नमितिवन्मात्रचि तस्य तु किं दीर्घेण । नादि संग्रहे भा
ष्यप्रयोजनेन चैकैकपदादीनां रूढिस्वीकारोऽनुचित इत्याहुः । इति समास इति । इदं ह्रस्वतकारानुरोधेन । भाष्ये तु कारणे तु
द्वकुक्कुटाण्डवद्द्व्रीहिश्च समासद्वयमुक्तम् । बहुव्रीहितत्पुरुषयोर्लघुरिति न भिप्रायो मूलस्येत्याहुः ॥ उदात्तस्वरितयो
रिति ॥ यद्यप्यस्याप्युदात्तत्वं ग्रामादित्वात् भवति एवं चोदात्तानुदात्तेति स्वरितेन तस्यानिकत्वाद्यणा उदात्तस्य स्वरितत्वेऽपि
तकारस्य स्वरितत्वेऽपि स्वरविधौ व्यंजनस्याविद्यमानवत्त्वेनोदात्तेनेति स्वरितत्वेऽपि चान्तस्य सिद्धत्वेन शेषनिघातो न प्रवृत्त्या
स्वरितो वेत्यस्याप्राप्त्या पूर्वस्वरितासिद्धिरत्र पक्षे तथाप्यनुस्वारादित्वादनुदात्तत्वमेव हि शब्दस्य तथा च यणः उदात्तस्य
स्थानिकत्वात्तस्य स्वरितत्वे स्वरितो वेति प्रवृत्त्येष्टसिद्धिः ॥ ह्रस्वत्वादीनामिति । स्वसमानाधिकरणोदात्तत्वापेक्षया

न्यर्थः । कण्ठ्यादीनां दीर्घत्वादिसमानाधिकरणोदात्तत्वाद्युपेक्षयेत्यर्थः । अत एवाष्टादशधा भिन्नामवर्णस्य प्रतिपत्तिं
वक्ष्यामीति पस्पशाभाष्यान्तिमभाष्यं संगच्छते । अकार्योश्चित इति । स एवेत्यर्थः । तत्तत्त्वेन घटितमपि प्रयुञ्जीत । यथा
श्रुतं तु न सङ्गतं किञ्च प्लुतिलृत्वे तस्य प्रत्याख्यानमपि तदभावएव संगच्छते । अन्यथा लृकारवद्दीर्घस्य स्पृष्टमपेक्ष्य ल
कारवतो विवृतस्यान्तरतमत्वात्स एव स्यादिति तदसङ्गतिः स्पष्टैव । तुल्यास्येति । तुल्याविति । अत एव प्रत्येकसांख्यमास्य
यनसंज्ञा । अकः सवर्णे इत्यादौ सवर्णग्रहणाच्च । ननु वर्णोपयोगित्वेन हेतुना ताल्वादेर्ग्राहिता वपि प्रयत्नस्य तत्वेनाभ्या
वर्तिनां द्वैक्यसङ्कृतमत आह । इष्टयगुपेति । शब्दानित्यइति नये ऽस्यैव सम्भवादाह । जनकेति । अन्ये तु । ननु यत्नप्रयत्न
शब्दयोर्भेदमाश्रित्य ढत्वात्पर्यायत्वेन लाघवाद्यत्नेति वा च्यप्रापादानमधिकसंग्रहार्थमित्यसूचकन्तु म शक्यत्वेन
रूढियोगेति न्यायेन यत्नसामान्यग्रहणमेवस्यादत आह । जनकेति । तथा च प्रयत्ने जनकत्वग्रहे यत्नसामास्य
स्यं जन्ये प्राग्वर्ति स्वरूपं जनकत्वं वा धात्वर्थयोगार्थेन वाश्रीयते भूमौ पंकजमुत्पन्नमिति तत्रैत्याहुः ॥ निर्दिश्येति । इ
इत्यविवृतत्वव्याख्यानां संज्ञानुपपुक्तत्व मितिसूत्रेत्योक्तम्मूलम्पप्रयत्ना इति भाष्यप्रीत्याप्याह । अत एवैयोरिति ।

एकारैकारयोर्मिथः इत्यर्थः। कण्ठादीनामेवेति। वायुसंयोगादीनामेवेतु नेतु ननद्वानासापादयं इत्यादिनिर्देशात्।
अन्ये तु प्रयत्नसमभिव्याहारादासम्भवमपि करणमेव। नत्वस्त्वकण्ठादेरेव न संयोगस्य व्यापारवत्त्वरूपकरणत्वाभा-
वात्। कण्ठादेस्तु संयोग एव स इत्याहुः॥ एतेन संयोगव्युदासाय ज्ञापकान्तरस्य तत्र वाप्यावश्यकत्वेनादृष्टत्वेवत्तेनतदि-
न्नानां यावतामास्यप्रयत्नानां ग्रहणबोधनेनेष्टसिद्धौ प्रयत्नग्रहणं व्यर्थमेवेत्यपास्तम्॥ तत्रैव दोषादिति। केचित्त्वास्यश-
ब्देनास्यभवत्वव्याप्यजातिविशेषवद्यावत्तोऽल्पं विवक्षितमिति साहचर्याद्यत्नशब्देनापि यत्नत्वव्याप्यजातिविशेषव-
द्यावत्तोऽल्पविवक्षणे वा दोषार्थेपोपादानमित्याहुः। न त्वनेनापूर्वकादीनां कण्ठस्थानत्वेन तुल्यस्थानत्वात् सवर्णप्रसक्तिः।
इह कुशब्दस्य तद्ग्राहकत्वमणुदित्सूत्रेण बोधनीयमिति कथमत्र वाक्ये कुशब्देन पञ्चानामुपस्थितिस्तत्राह। तदिति
साहचर्यात्। उपक्रान्ताकारसमभिव्याहारात्। यथाश्रुतन्तु न युक्तमिति स्पष्टमेव व्याख्यायेन। उच्चार्यन्ते। अतएवानासि-
कायाः स्थानत्वादेवा। संयोगाधारेति। वर्णाभिव्यक्त्यवच्छेदकत्वावच्छिन्नतादृशसंयोगाधारतापाताल्वादावेव सत्वान्न
संयोगस्योभयनिष्ठत्वेऽपि वर्णजनकवायोः स्थानत्वव्यवहारातिप्रसङ्गः॥ ह्रस्वस्य दृश्येनेति। एतदर्थमेव पूर्वबोध्यलक्ष्य-

णो मध्यमविशेषणद्वयम्. अन्यथा स्वरूपभेदाया घस्य वात्वं त्वाया न्तस्यावश्यकत्वेऽपि तद्वैकल्पस्य स्पष्ट सेव। अत एव
ङादीनां स्थानत्वादेवा अन्यथा स्थानिनीन्यस्या सङ्गतिस्स्पष्टैव। वाह्यप्रयत्नानेति। अन्यथाऽऽस्यग्रहणस्यावर्ण्य
नां सावर्ण्यानुपयुक्तानां प्रदर्शनप्रक्रमेण तत्कथनवैयर्थ्यापत्तिः। आस्यग्रहणबोधनेनेति। नासिकायाः आस्यपदेन ग्र
हे तु तत्रत्यप्रयत्नस्यास्यपदव्यावर्त्तकत्वोक्तिरसङ्ग. नासान्तरत्यप्रयत्ना ग्रह स्तु आधिगुण इत्युक्तागुणानामभे
दकत्वेति वक्ष्यमाणरीत्या बोध्यः। इदं च नासिकाया नर्गतेति म तेमणि मंत्रादिन्यायेन बद्धहे प्रतिबन्धकत्वं
भाष्यसोक्तम्। वस्तुतस्तानद्वात्वेवेति निरूपितं विस्तरादुद्योते तत एव बोध्यन्तदा हाबेदता मिति। बहुवचनेनासै
वभाष्यसम्मतत्वं ध्वनयति। भिन्नस्थानेति। प्रयत्नात्पृथक् त्वा— स्यपदेन कथनेनेत्यर्थः एतेन भिन्नस्थानका
र्यनस्यान्तरत पपरिच्छेपयोगित्वादनुभवसिद्धानुवादरूपत्वाच्च कन्नादिदोषत्तानोप्रयोगित्वाच्चेदमसदित्यपा
स्तम्। ऐ च स्तर्वसेति। ए च इति त्वपपाठः। हसेहसनइत्यादावनुनासिकत्वप्रतिज्ञामात्। यत्तु परिनिष्ठितद्वति।
क्षेपकंत्वा हसे इत्यादौ प्रक्रियायां तत्सत्वेऽपि नक्षतिस्त्याहुः तत एवा दर्शनादित्युक्तत्व लसत्वादिति तन्नसम्पक्कू ह

सेहमनइत्यादौनामपरिनिष्ठितत्वस्यवक्तुमशक्यत्वेनभुङ्क्तेपीतिन्यायावतारोत उत्सर्गलक्षणस्याभिन्नत्वाद्दावे
वसम्भवेनन्तुनेनुनरन्यत्वासामञ्जस्याच्च।अत्रपाठेसर्वस्येत्युक्तिस्तुप्रयोगभेदाभिप्राया।लक्षणस्यवृत्तिभेदेनदीर्घ
त्वनयोर्नकार्ययोस्संग्रहः।एवंचवेदस्यानेनान्तरतमसूत्रेउच्यतेनेति।सेयंसिद्धस्यगतिरेवश्रेयस्तुभिन्नदृष्टत्वात्।तन्त्रनु
यथाकृष्टेदन्तानुवादेति।एवंचात्रनन्वप्रवृत्तावप्यनुभवेनस्थानेकमादायसमकालयोरपिसंज्ञास्मादेवेतिवेक।
स्मादप्रवृत्तिः।अपूर्वबोधकत्वेनत्वस्यसंकोचेनप्रतिहतिरेवफलस्यादितिभावः।एतेननवृद्धिर्यस्याः अकुहेमादावा
नुवादेपिनत्वप्रवृत्त्यङ्गीकाराच्छिन्नमित्यपास्तम्।तेभ्योपिविरतावेडादित्यादिवाक्यान्तरेणवचोविरतत्वात्तु।
केरन्याचामीषद्दिष्टत्वसमानाधिकरणेषत्वस्पष्टत्वभ्रमस्यप्रसक्तस्यनिषेधमुखेनपूर्ववाक्यविहितविरुद्ध
त्वबोधएवतात्पर्यादाह।स्पष्टविरुद्धत्वेन।अपूर्वबोधनेहिस्वराणांविरुद्धमित्यनेनपौनरुक्त्यंस्यादित्याहुः।प
णत्वीतिवाक्यस्पष्टइत्यस्यसंबन्धात्तेषामीषद्दिष्टत्वंशाब्दंस्पष्टोपेक्षयेषत्स्पृष्टत्वमार्थंसमाजंपत्तितनात्स
र्वमाह।इत्यनेनेत्यादिना शलामीषदिति।ईषत्त्वमजपक्षया·अत्रेति तेषांभेदेनकथनेसतीत्यर्थः।एवंचस

कार्यस्य हेतुत्वं फलितम्। अश्व। प्रयत्नभेदादक्षरसमाम्नायस्थाकारेणाग्रहादच्त्वाभावान्न दीर्घः। अ इ ए व गुणो
पि नेति भावः। समासस्तु दीर्घप्लुतयोरभाव इति। प्रयत्नभेदस्य दीर्घयोरभाव इति वा। प्रयोजनं त्वेवमर्थे। सि
द्धान्तभूतजातिनिर्देशे संवृतावर्णस्यात्वे संहिता विवक्षायां गुणो नेति। दीर्घसत्वगृहृयविरहान्न। एकसूत्रे संहि
तानियमेनुदेशे लुगिव सुपां सुपीति उ सस्सुरेव तस्य त्वयत्वलोपाः न दसिद्धत्वान्न गुणादि। उमनुनानेति विवृतत्वनि
र्देशादिति वाच्यम्॥ पूर्वत्राघत्वेत्यादि। अयम्भावः। गोदुहमित्यादिति स्थितेपदान्ते घत्वस्य जश्त्वापवादत्वात्ततः प्राक्।
घत्वम्। औपदेशिकभषन्तेमुद्रादेः युगपत्प्रवृत्यानन्तरङ्गजश्त्वमपवादस्य चरितार्थत्वात्। भष्भावात्पूर्वमिति उञ् श
नामिति न्यायेन धातूपसर्गयोः कार्यस्यैव पूर्वान्तनिमित्तकत्वेनान्तरङ्गत्वाज्जश्त्वम्। अनुनासिकात्त्वपरा
निमित्तत्वेनान्तरङ्गत्वात्सिद्धान्तेतु जश्त्वासिद्धत्वात्घत्वेजश्त्वानुनासिकयोरसिद्धत्वात्तमपभावेनुनासिकस्य
सिद्धत्वात् जश्त्वेनुनासिक इति प्रक्रिया। घादेरसिद्धेत्वस्य प्राप्तिरेवेति। घत्वेः कृतेनेतिः। उक्तरीत्या बत्वेष्विज
श्त्वस्यापरनिमित्तकत्वेनान्तरङ्गत्वेप्यनुनासिकस्य परत्वेपि बत्वस्यैकपदमानत्वं। उक्त्वामित्यत्र अमन्दो दृष्टाप्ति

योप्युच्चारितार्थ्येन वेदनुनासिकाभावपक्षे च तेनापवादत्वाभावेपि प्रतिपदोक्तत्वादनुनासिकत्वोपरनिमित्तकेना
नरङ्गत्वाच्चोभाभ्यां पूर्वं वत्वप्रवृत्तिरिति भावः। प्रत्याहारग्रहणसामर्थ्यादित्यन्ये। उक्ताशङ्कानिमित्तस्तुल्यबलत्वं जाना
नः शङ्कते। न चेति। वत्वं चारितार्थ्यं नूक्तमेव। पक्षानुरूपेति न्यायेन समाधत्ते। विप्रेति। अन्यथेति। कार्यकालपक्षे त्रिपाद्यां
विप्रतिषेधसूत्रोपस्थितौ विप्रतिषेधरूपनिमित्तनाशकपूर्वत्रेत्यनेन विप्रतिषेधसूत्रस्य बाधं उनासिद्धत्वनिरू
पकपूर्वस्यासिद्धिसम्पादनद्वारा विप्रतिषेधसूत्रस्य तत्प्रतिबन्धकत्वमित्यत्र विनिगमनाविरहापत्तिरिति भावः
।। एतेनाधिकारत्वे यथोद्देशत्वे विधित्वे सपादत्रिपाद्योर्विप्रतिषेधाभावानुवादनेन वार्त्तिकं सामंजस्येनेदम
संगतमित्यपास्तम्। अत एव। तस्यापि यथोद्देशत्वादेव। वत्वमेति। वत्वमष्टभावानापत्यमयाथादेनत्वकृचित्वयापि
नेयं स्यादिति भावः। दित्समिति। अनयोर्थापक्षद्वयसाधारण्येन तदनापत्तिरेवापादिता स्यात्। पत्रानुवृत्तिरिति।
एवं वाधिकारत्वे त्रिपाद्यामवीत्यादि फलितमिति भावः। स्वदेशे वाक्यार्थबोधे फलाभावेपि परार्थोपस्थितौ प्रति
बन्धकाभावे न नत्वत्वादाह। सपादेति। आदिभिरिति। आदिपदे वृद्धवचनोपपत्तिस्तु नमुदादेशाद्यत्यस्य जलो।

येनानियमस्यास्य च निषेधसत्त्वान्निर्वाह्या। परत्वाद्विति। प्रान्तादिनरप्रादयोर्भयोरप्यनित्यत्वात्। अत्रान्तर्गततया वन्नि
मित्तकत्वेन परनिमित्तकत्वेनोभयोरप्यन्तरङ्गत्वात्। अन्तरङ्गेति। अन्तरङ्गेतिसत्त्वेनोभयोरपिप्रतिपदोक्तत्वात्त्वार
त्वेनैवव्यवस्थेतिभावः। ननुशास्त्रासिद्धत्वेऽप्यनित्यत्वेनैत्वापाप्रवृत्तिरवश्यं वाच्याऽन्यथापि पटोरित्यत्रपूर्वं
प्रवृत्तिकत्वेन पत्वे शास्त्रेऽसिद्धत्वेऽप्युक्तन्यायेन सकारबुद्ध्यभावादुत्वं न स्यादिति कार्यासिद्धत्वेऽपि न दोष इत्यत
आह। शास्त्रेति। न निवृत्तीति। स्थानिनिवृत्तीत्यर्थः एवं च सकारनिवृत्तिबुद्धेरभावेन न तस्य त्वात्त्वं स्यादेवेति न दोषः
न च तु पत्वस्य नत्वं प्रत्यसिद्धत्वान्निवृत्तिबुद्धेः सत्त्वेन न स्यादिति भावः। पूर्वत्रेनेति। अत्र न्यासे निषेधामां वलीयस्त्वे
नप्रकल्प्येतिन्यायेन चान्तरङ्गस्यपूर्वमप्रवृत्तिरेवेतिवोध्यम्। नन्वेवं तत्करणाल्लाघवमेवेतित्वत्र छ्यपत्तिरेवान
आह। राजभ्यामिति· दिगिति तेन किमुक्तमित्यादावनुस्वारादौ कर्त्तव्ये नत्वादेर्निषेधस्य संग्रहः। वाक्य
भेदेति· नन्वस्तु पदैकवाक्यतातावतापि नमुन इति सूत्रेऽधिकारसिद्धपदसंबंधमुक्त्वा सिद्धत्वे तस्य न्वयान्मुषाप्य
निष्ठांसिद्धत्वस्यैवानेन निषेधः। नमुभावस्येति चेन्न। पदैकवाक्यतापक्षेऽदसोऽसेरित्यत्रापस्थितावसिद्धवत्स्या।

मुंभावेनान्वयेसिद्धत्वविशिष्टमुभावस्य विधानात्तत्रानेनासिद्धत्वनिवृत्तौ सन्नियोगशिष्टमुभावस्यापि निवृत्त्या
पत्तेः। वाक्यैकवाक्यमापन्नं सिद्धत्वं शास्त्रस्यैवेति न मुत्वस्य तन्सन्नियोगशिष्टत्वम्। न चैवं नाभावे कर्तव्येऽसिद्धत्व
निवृत्त्या मुत्वस्यापि निवृत्तौ कृतेनाभावे सिद्धत्वनिवृत्तिबोधकस्य निष्फलत्वापत्त्या सन्नियोगेति न्यायबाध इति वा
च्यम्। गौरवात्कार्यासिद्धत्वापत्तेश्च। त्याहुः। कार्यस्य शास्त्रजज्ञानवेलायामसिद्धत्वमिति पक्षेन मुत्वलोपश्च लघु।
टीत्याद्यक्षरस्वारस्येपि भाष्याग्रहीतत्वान्नाश्रितमस्यइति बोध्यम्। बाह्यप्रयत्नाइतीति। एषां बाह्यत्वं विवारादिकं च्वी
पयाद्यपति। शाकलेति। अधस्तादित्यनेनास्य बाह्यत्वं सूचितम्। अद्योषेत्पन्न न जोल्पार्थे त्वात्स्वहे। अस्य घोषेति।
अर्थानां वक्तुमिच्छाया असम्भवादाह। नह्योधेति। नन्वेवं ह्रस्वादिजनक एकः स्पर्शो द्विजनको प्याद्यानक एक इति एकैक
कस्य वर्णस्य प्रयत्नत्रयं प्रयत्नद्वयं वाजनकमित्यायातम्। तच्च संहितासूत्रभाष्यविरुद्धम्। तत्र हि स्वोत्पाद्दिनवर्णमात्रावधि
प्रयत्नस्थितिः। ततस्तम्प्रयत्नमुपसंहृत्य द्वितीययत्नोत्पत्तिरिति प्रथमवर्णनाशकाले द्वितीयवर्णोत्पादकयत्नोत्प
त्तिकाले च वर्णविरामसत्त्वात्प्रतिवर्णे विरामसंज्ञाप्राप्तौ नित्यावशंकितम्। तस्य चायम्भावः। नाभिरूपैकदेशाच्छेदनाने

कयत्नो त्मतिर्युगपद्व्याघिनेत्येवस्यैकस्यैव प्रयत्नस्योभयोस्यानत्र ह्रस्वादिस्पर्शादि जनकत्वमिति स्पष्टमेवायाद्रूमिति नेदं
नत्सकलं मनसिनि धायाशंकते। यद्यपीति। ——— अयोगवाहनिरासायाह। प्राप्तेति। अत एव विसर्गादेः पृथक्कु
ग्रहणम्। अत एवानुस्वारस्याप्यभ्यासादर्थ्येन। अनुप्रदानं वाह्य। उद्धोनेतुष्यासे नुप्रदीयते पैरित्यर्थः इत्युक्तम्। स्वर्शोर्सानुनु
नुत्सादिसूत्रस्य भाष्यमेव। यद्यपीति। स्पर्शादिष्वघोषा यन्यतमेति पाठः एवंह शादिष्वपि केषामस्वकादिघो षाघोषान्य
तरे तिपाठेखपादिष्विन्यत्रादिना ह्रस्वादिपरिग्रहः। शास्त्रानुरोधेनेनतथा द्वन्द्वप्रयोगोपियथासंभवं योजनीयः यथासंख्येन
वर्गेष्विव्यमाना स्थितिरित्यर्थः क्रमवारणाय व्यस्तोक्ति त्वासत्त्वमस्वप्रपनयेचाह। विद्येति। नन्वेवमपि प्रयोगे युगपद्वर्णा
स्थित्यभावेनत्वं स्यविरोध एवात आह। निर्दूति। अन्यतमादिति। एतेनपरशब्दप्रयोगे च तुर्य्यद्वतिपंचमवितेत्यपास्त
म्। निर्दृशासमतिरिति। यद्यपि यावत्स्थानसाम्यमिव यावत्प्रयत्नसाम्यपि वक्षामन्तरेणापि निर्दृशसत्त्वं निस्तथापि यावत्
प्रयत्नसाम्यस्यानंगीकारे खकारस्योष्मत्वादिदानीं विवृतस्थानावनेकसावर्ण्यस्याद्वोरत्नेयं तदर्थं [illegible] दा
म्यन्तरसाम्यविवक्षणं स्यगलेपानात॥ ऋत्लृवर्णयोः॥ एतदर्थमेव एतद्द्वयार्थमेव। अभ्यन्तरमिति। तदर्थं [illegible]

नापदार्थोपस्थितिप्रभावेन बोधाजनकत्वेनाकरणीयत्वमित्यर्थः। न चानुपदेशमात्रेणासत्त्वे आकारायामकारादेरपि स्या-
त्सेति वाच्यम्। अक्षरसमाम्नाये जातिनिर्देशसत्त्वेनान्यादिजातेरकारादिषु सत्त्वात् तत्कार्ये कर्त्तव्ये जातेरभेदादिति व-
दन्ति॥ सय्यन्ते त्यादाविति। त्यादिनां कुकुण्ठादिपरिग्रहः। द्विर्वचनेनेति। मात्रादिरयं सच्च कुकुण्ठादौ संयोगो गुरुः संज्ञानुना-
दिरूपः। सय्यन्ते त्यादौ चानचीति द्विरूपः। न सच्च द्वित्वं जनाभ्यर्थ्यं नम्यकृतलक्ष्याभिप्रायम्। हलोनन्तरा इति सूत्रोपन्न-
सन्नादिपदग्राह्य कुण्ठाद्यनुरोधादिति बोध्यम्॥ एतेन परसवर्णे संसिद्धत्वादनन्तं हल्मात्रस्य संयोगसंज्ञा स्यादि सम्यग-
नीदमसंगतमित्यपास्तमित्यपि वदन्ति। वस्तुतः अनुपदिष्टत्वादित्यस्य शिष्टैरिति शेषः। ननु महेश्वरस्याज्ञानन्यगमनयोग-
वाहानामद्गुणत्वमिति भ्रान्तिकृतेन्यादेः कर्तुमशक्यत्वस्य वाक्यानांपि दुर्वारत्वात्। इति समन्वयार्थ उपदेशसूक्त-
रोपदेशपदत्वयेन्यादिकं चोपलक्षणतां विनाजस्येननोपपद्येन। किञ्च। अकारादिसवर्णस्य जातिनिर्देशेनो-
पपादनेमात्रिकत्वं जनादेरसत्त्वमुपपादयितुमशक्यत्वमिति चिन्त्यमेवेदमित्याहुः॥ नदपरेन क्षमंनेभंनुदेय-
स्त्रीनिर्दिष्टजात्याक्रान्तस्यासवर्णनिवर्तकत्वेमात्रिकाद्धमात्रिकव्यञ्जनसाधारणयत्वादिजातेस्तत्र निर्दिष्टत्वे

स॰भ॰
१८

नानुपदेशान्मात्रिकत्वं जनासत्व प्रतिपादके ओङ्कृ सूत्रस्य भाष्यविरोधान्नस्माच्छिन्नोपदेशएवासत्वशंकानुनिवर्तक
इत्येवभाष्याकृतम् किन्त्वानुकारोपि संदेहनिवर्तक इति स्मागुक्तत्वेन तस्य चलकारे वहुशः प्रदर्शनेनन चिन्त्यमेव प्रयो
ष्यमायाति। अन्येतु वस्तुतएव मानुपूर्वीका श्रुतिरेवेयमिति नैतन्नर्थकं शंकेति समर्थयाञ्चक्रुः॥ नरावर्तें किर्मिनि तुर्ये
कापितमेव। अतएव तदुपदेशाप्रयोजनगणनावसरे स तन्त्रोक्तं भाष्यकैयटयोः॥ नाज्झलौ॥ मते इति। ताल्वामबे
कारत्ववर्गो विकारैकारौ पकारश्शकारः श्लेष्म औष्ठौ पणघ इति वहुवचनान्निपाणव्यमन इत्यर्थः [illegible] दीनामिति।
आदिना वहुवचनाभ्यामेकारणकार ओकारोपध्मानीया विसर्गः॥ सूत्रमते विवृतत्वभ्याप्ना नां संज्ञानुपपत्त्वात्
स्योक्तत्वात्तयोर्विवृतत्वाभिनामदेपितत्वाप्तिर्वोध्या॥ अत्र मते यजुष्केषामित्यादि निर्देशादैौ [illegible] संभादेस्या
मिवकारपोस्स्थानसाम्येपि संज्ञान्। स्वरानुस्वारोष्मणामस्पृष्टमिति तत्रैव प्रातिशाख्ये प्रमानैकीप्तत्वेन च संज्ञा।
प्राप्तिर्वोध्या। अत्र वदन्ति। एवमपि ना च शलाविति तु न स्पृष्टत्वेनहलां परस्परं संज्ञानिषेधार्थत्वेनेः। यथा [illegible] तु पूर्व
सवर्णकरणान्नेति· हशि चेत्सवसिद्धइति। एतदवतरणस्य पाठकपञ्च्यै। नीति वचन मिमस्पानुवर्त्यायागरेभाये नांदि

गमः
१८

ध्यानमित्यर्थः। इतिनशंक्यकलंकलेयः। व्यावृत्त्यर्थमिति। अन्वयवति चेदंतेषेवेति नियमद्वारेति भावः। नपरकरणेन।
दीर्घवद्धकारेपि व्यावृत्त्यर्थमिति। अन्वयवति चेदंत्येवेति नियमद्वारेति भावः। न परकरणेन दीर्घवद्धकारेपि व्यावृत्त्यात।
मानेनसिद्धिः स्यादवर्ण्येन स्यादिति। परवल्लिङ्गमिति नपुंसकत्वापत्तिश्चबोध्या। अतएवाग्रेविप्रश्लेषादेवेत्यर्थः प।
वंदोषसंभवेन पदद्वैरूप्येन तद्भावनव्यर्थमिति सूचयितुमाह। उपलक्षणेति। भावप्रत्ययानान्तसंज्ञाश्रवस्यस्वदपरत्वा।
दनन्वयान आह। घोषेति। इदंशकारादिसंग्राहकस्य हकारादीत्यादिपदस्योपादानं जातिपक्षेनुजानेर्भेदात्तत्के।
वेनेति भावः। अणुदित्। ज्ञापयतीति। गतिकारकेतिवद्बोधयतीत्यर्थः। अतोनसार्थकप्रस्तावसंगतिः। ननुवार्त्तिक।
स्योपदेशानद्गतिवदज्ञानेनप्रवृत्तिरत आह। भाष्येति। ननुभाष्यमपियोगरूढ्योपरिभाषार्थंबोधयतीत्यर्थकमत
आह। ज्यादेति। एवञ्चशब्दार्थसंबन्धनिश्चयस्यत्रापि भवस्सिद्धत्वेनदनुक्त्यानस्यतदर्थकत्वमप्रामाणिक
मितिभावः। एतेनेति। आवश्यकप्रसिमायया पटवदित्यादिसिद्धेज्ञा पनेफलाभावेत्यर्थः। सुलभत्वादिति। अत्र
पक्षे कुकुडुकुनुमनुकुधुडादीनदोषः। उकारमात्रेदिति व्याख्यानात्परश्च घाके त्वादाविव स्वरूपपरत्वं वा॥ स।

णिनद्धनि। सर्वेशीशब्दोऽत्रधर्मपरः। चादिन्वेति। इष्टशदाविवन ध्यमतेऽनुवादेपीनसंज्ञालोपप्रवृत्तौप्रतिबन्धकाभा
वोकारविनिर्मुक्तस्यैव चादेरुपस्थित्यान्यायसिद्धमित्यर्थः। उकारस्यावयववर्णानां चुशब्देनग्राहकः। मविभेति। निषे
धेनसोकारस्येत्वानापत्यागुणइत्यादिनिर्देशासङ्गतेः। ननुयथाश्रुतएव चः स्वस्यसमुच्चायक अस्तां किंभिन्नक्र
मत्वेनात आह। ह्रस्वेति दैत्यारिरित्यादौ दीर्घार्थमारोपस्यावश्यकत्वादितिभावः। लृकारग्रहणेनेति। योत्वृत्स्न्रेक
थयेकादोएत्यैतेतिभाष्यग्रन्थेनसूत्रेष्वेव हितत्सर्वयहनौयत्त्ववार्त्तिक इतिहभिग्रन्थेन चतत्प्रोक्तस्यावर्णस्यसूत्र
मतेपिसत्वावा। वार्त्तिकमतेपिपूर्वेणाणग्रहणपक्षेएकारादौ ग्राह्यतिनिर्देशप्राप्तसवर्णग्रहाभावायाप्रत्यपदत्वं
शावश्यिपमावश्यकत्वेनसत्वादेणाग्रहस्यतन्मतेप्यपंग्रन्थौ बोध्यः। लृवर्णस्यअवदितिनुप्रत्याख्यानप्रकारेनि।
पक्षतेनावसरस्तस्येतिसर्वेमवदातम्। अन्येतुतपकरणस्यापूर्वेणाणग्रहणंवाधपिचाग्रहेण्यकआलृप्रवृत्या
ष्टादशानांग्रहणंप्राप्यतपरसूत्रप्रवृत्त्यातद्बाधकल्पनयाचारितार्थ्यकल्पनापेक्षयालृवर्णयोःसावर्ण्यबोध
नद्वारानत्रवृत्त्यानदग्रहणसाफल्यकल्पनायाएवलघुत्वादितिभावः। अतएवपुक्तमित्येवोक्तन्नतुचिन्त्यमपास्ता।

नोदीत्यादीत्याहुः। समानजातित्वस्यैवेति। समानो वर्णो जातिरित्यर्थः। स्वार्थे ष्यञ्। वर्णाश्रमाचारत्वामित्यादौ व
र्णपदेन जातेर्व्यवहारादिति भावः। होतृकारे दीर्घस्तु अको कीति न्यासेन सुवचः। अत्रैव पक्षे साकल्ये प्रतिबन्ध
स्तु न फलम्। ऋृत्यक इत्यस्याप्रवृत्तेः। इदं स्वरूपमुक्तमनुरोधेन गौरवमनुसन्धेयम्। लाघवादरेतु अस्त्ववर्णसा-
म्यवदिति शब्दरत्नोक्तमनुसंधेयम्। एतद्व्यतिरिक्तेति। अकारादावचीत्यर्थः। अ[illegible]त्वेन सादृश्याद तकारादौ भिन्न-
जातीयेसत्यपि सावर्ण्ये न दोषः। योगविभागेनेति। भाव्यमान्यमानेति परिभाषाबाधनद्वारेति भावः। अस्याव्यय-
तां ध्वनयितुं व्यक्तिपक्षस्य व जातिपक्षेपि फलान्तरं वक्तुमुक्तमपि दार्ढ्याय सफलमाह। एवं गुणा इति। ननु स्थ-
त्वसत्वे जातिपक्षे जातौ नास्त्वनुष्ठा व्यक्तिपक्षे शकार्यमादाय यथासंख्यमिष्टं सिध्यति। तदभावे कथमत आह
एचो यवेति। नन्वेवमपि नस्वाभ्यामित्यादौ वेङिति पाठविधेः पत्वात्तयोरग्रहणे उभ्य विधानेपि अनिष्टंस्या
दत आह। नत्वेति। नन्वेवमानुस्वारं वाक्प्रतिरेवान्यार्थमिति तद्व्यर्थमत आह। अत्रैव तदिति। ननुस्सु दाय-
मध्ये निषेधस्याप्रवेशात्कथं तेन नन्वैनदग्रहणमत आह। अपम्भावइति। अन्यदं विहायापि स्युक्तिसाफ-

स॰म॰
२०

त्याह। गुणा इति। अन्यजातेः पदार्थेष्वपि गुणानां भेदकत्वे सत्त्वमावश्यकमित्यवधारयामासुः। न परत्वान्नवदेङि त्यत्र त
परत्वं पूर्वत्वं कृतार्थमत आह। नाप्यप्रामाण्यमिति। अनवकाशत्वादिति। तदा तदनुवृत्तावनर्थ्यनुपयोगेऽप्यपाङ्क्तेन।
समकालस्यापि ग्रहणसम्भवेऽपि निरवकाशत्वेनानेनाणुदितिवाधेनास्य प्रतिप्रसवविधित्वमेवेति भावः। ननु नङ्भ
ण संविज्ञानेनानेनादित्यस्य संज्ञात्वमनएवनतो विभक्तिरेवञ्च तत्समकालाप्रसिद्ध्या सत्र मूकं स्यादत आह
अत्रेति। एवञ्च षष्ठ्यर्थबहुव्रीहौ तत्सम्भवेऽप्यत्र पञ्चम्यर्थे स इति न दोष इति भावः। साजात्येनेति। इदमुपल
क्षणम्। पञ्चम्यर्थबहुव्रीहिविग्रहं प्रदर्शनपरं भाष्यस्य। एतेन पञ्चमीसमासे एङादिशब्दस्यावधिमत्त्वे
ईकारादेशो ष इत्यपास्तम्। गमकान्तरत्यागेऽपि अत्रत्यागमानाभावाच्च नचैवं वृत्तिमत्वेऽपि तत्कारान्तरपेक्षि
त्वात् पारिभाषिकमर्थं वक्त्वस्य नेति वाच्यम्। तत्र विभक्तौ नरस्य प्रकृतिप्रत्यायान्यतरसंवृत्तिमत्वात् कल्प
ह्रीयमाणत्वात्। नन्वेवमप्यवयवात्तं निपातनपरिभाषया नसुप्समुदायात्तु घुङित्यत्रैव सुलभं इति चेत् तस्य
नियमार्थेति। न परस्य वर्णस्य चेत् सर्वस्य जात्याश्रयतण्यायाहकल्ल हि स्वसमकालस्यैवेत्यर्थः। एवञ्च षष्ठ्या

रामः
२०

[?]मादीयजातिनिर्देशात्तद्भिन्नकालव्यक्तिपरजात्यग्रहइतिफलितम्॥ एवंचेति अयंभावः। व्यक्तिपक्षेसूत्र
स्यभिप्रत्वानवकाशत्वाभावामणुदित्सूत्रबाधेनविधित्वेपिसूत्रंसार्थकमेवेतिलाघवान्नेत्रनदेवाश्रितं। अत्र
सूत्रे परिष्कृतार्थवत्त्ववादिनोऽभिमतं तु प्रत्ययदेवदत्तो गार्ग्यो द्विरूपव्यावर्त्यमतत्वेन तद्ग्रहस्य सामर्थ्याभावात् अनुवृत्तिपर्यन्ता
नुधावनं न सङ्गच्छते ननु पूर्वत्रानर्थार्थवत्त्वसंग्रहः केषाञ्चिन्नाभिमतः अन्यथार्थाधिकारादित्येव वदेत् किञ्च तत्सामर्थ्यस्या
नुवृत्तिप्रयोजकत्वेऽपि नवृत्तिविध्यप्रयोजकत्वेन च तत्थानावादिदित्यपि वक्तुं शक्यमित्यत आह किं चेति अन्तावनद्धिते
ति सूत्रद्वयेऽप्युक्तार्थाङ्गीकारादेवेत्यर्थः फलाभावेनेति एतेन तद्धितग्रहणमपि निष्फलमिति सूचितं प्रातिपदिकसंज्ञायाद्
निशेषः औत्सर्गिकैकवचनं तु सत्येव गमके लुगपि न धातुसाहचर्येण स्वप्रकृतित्वा अयेतरव्यवहितान्यवहितान्यतर
स्वावयवकत्वं च प्रयोजकधातुत्वप्रातिपदिकत्वान्यतरधर्मवदवयवसमभिव्याहृतस्यैव लुग्विधानात् डौडेजिष्ठतीत्यादौ
तिष्ठतीत्यादिसमभिव्याहृतत्वादतिव्याप्तिवारणाय धातुत्वप्रातिपदिकत्वान्यतरधर्मवत्त्वं वधित्वेनावयवो विशेषितः लु
कृप्रयोजकत्वं प्रत्यासत्तिध्वननायान्यतरविशेषणं न तु व्यावर्तकम् एवमपि चित्रैव तत्प्रयोजकधातुत्ववत्तिष्ठतिसमुदा
यावयववत्तिष्ठसमभिव्याहृतत्वादतिव्याप्तिवारणाय स्वावयवकत्वेन धर्मवानवयवो विशेषितः स्वमवयवो यस्येति तदर्थः स्व

ण्वद्वौलुक्प्रतियोगिपरः अस्तिचपुत्रीयेत्यत्र तथापुत्रमितिसुप्प्रत्ययावयवत्वं तत्प्रयोजकधातुत्ववत् पुत्रीयेत्ये
तदवयववाक्यस्य समभिव्याहृतत्वात् प्रकृते तु न दोषः एवमपि तत्रैव तथाप्रकृतिमादाय तदवयवत्वमादायातिव्याप्ति
वारणाय स्वप्रकृतित्वाश्रयेतरत्वेनावयवो विशेषितः तत्पर्यो स्यधिकरणे लुक्कौ तवयवमादाय स्यादेव सातिव्या
प्तिरत आश्रयेत्येवमुक्तम् एवमपि राजपुरुषादौ पुरुषाद्युत्तरसुपि अव्याप्तिवारणायाव्यवहितेनावयवो विशे
षितः विशेषिते तु तथाभूतपूर्वपदमादाय तत्परिहारः तथा तत्रैव पूर्वपदोत्तरसुपि अव्याप्तिवारणायान्यतरत्वेन स एव विशे-
षित इत्यलम् यच्च ... चर्यादादेशः तस्य च ह्यन्यवयवस्य प्रातिपदिकावयवस्य लुगित्यर्थः परमकाण्डेत्यत्र त्वत्र अवयव-
मत्वाकादेशः स्यादिति तेति ननु सिद्धान्तेऽपि सोमसुताश्वः सोमसुताश्वः सोमसुतानतीत्यादौ एकादेशं तवद्भावेन सुबन्तात् परादिव
द्भावेन धातुत्वप्रातिपदिकत्वाभ्यां न अवयवत्वेन लुक् स्यादिति चेन्न उभयत आश्रयणे नान्तादिवद्भावाभ्युपगमाभावात् अधिक
रणेनेति निर्देशेन विभक्त्येकादेशेनान्तवदित्युक्तेश्च पंचमीसमासेन स्थानिवत्त्वाच्च अपरनिमित्तकत्वेनान्तरंगे लुकि परनिमि
त्तैकादेशस्य बहिरंगासिद्धत्वाच्च प्रत्याख्यानेति प्रत्ययान्तपर्युदासेत्यर्थः अनेन न प्रातिपदिकत्वमिति नियमशास्त्रेणानिषेध्य
मुखेनाप्रवृत्तिरिति पक्षे इदं विधिमुखेन प्रवृत्तिरिति पक्षे तु सामान्यतोऽर्थवत्त्वग्रहेऽपि प्रत्ययान्तभिन्नपरं तत्समासं सजातीय स

मुद्रायस्मिंस्तु तेजविति संकोचादेव न तत्प्राप्तिरित्यनेन प्राप्तिविरहादसंगतिः स्यात् तु अविधिमुखेन प्रवृत्तिरिति पक्षे त्वाह नाप्युत्त
रेति टाबापत्तिरिति टजं तस्योपसर्जनत्वेन तयाटिड्ढेति द्विगोरिति वा ङीप्योः प्राप्तिरिति भावः उपसर्जनत्वस्वेन तु न निर्वाहः यस्य प्राति
पदिकस्योपविधीयते तदर्थप्रत्युपसर्जनत्वाभावेन सुगोकुलमित्यादाविव तदप्राप्तेः वस्तुतो ङीबापत्तिरिति पाठोऽपि तु योज्योऽय-
स्मात् ङीपुविधीयते तदर्थप्रतिटिड्ढादेरनुपसर्जनत्वे एव प्रत्यासत्त्या तत्र वृत्त्या ङीपू प्राप्तेः सत्त्वात् ननूत्तरपदत्वमुपजीव्य जाय
मानत्वात् [illegible] टच्प्रवृत्त्या तद्धितान्तत्वेन प्रातिपदिकसंज्ञाद्वारा टाबादेरानन्तर्यविघातकस्यानिमित्तं स्यादिति चेत् तत्र [illegible] अलौ
किक एव प्रक्रियावाक्ये समासान्ताः प्रवर्तन्त इति सिद्धान्तात् पंचनजमूनीजसंइत्यवस्थायामेव बहुव्रीहिसंज्ञासमकालमेव
टच्प्रवृत्त्यानन्तरं तद्धितान्तत्वेन प्रातिपदिकत्वोत्तरपदहेतुकद्विगुत्वयोः प्राप्तावपसनिमित्तकत्वेनान्तरंगत्वात् द्विगुसंज्ञायाः
प्राक् प्रातिपदिकत्वेन यथैवान्तरंगत्वात् टापू स्यात् सन्निपातलक्षणायाद्विगुसंज्ञायाः पूर्वमप्रवृत्तत्वात् परिभाषाया अप्रा
प्तेः समस्तवर्थवत्त्वाभावेन न प्रातिपदिकत्वमिति टापू इति नवीनाशयः प्रतिभातीति केचित् विफल इति [illegible] यद्वति सूत्रभा
ष्यविरुद्धस्वेत्यपि बोध्यम् तत्र हि प्रकृत्युपपदोपाधीनामपि प्रत्ययत्वे किं दूषणमिति प्रश्ने परत्वमाद्युदात्तत्वमंगसंज्ञेत्येते वि
षयः प्रसज्येरन्नित्युक्तं ननु प्रातिपदिकत्वं न स्यादित्यपि तवतु तदपि वक्तव्यमिति ननु यथाश्रुतेपि किमर्थवत्सूत्र [illegible] ग

स. म.
७८

त्ययुक्तासेनलक्ष्यार्थं इत्युक्तमत आह दृष्टेति निरर्थकोयं समुदाय इत्यर्थः पदार्थानामन्वयस्येव वाक्यशक्यत्वेन तद्भावा-
त्त्वम् इत्यर्थस्तु समासेति नियमेन नास्याव्याप्तिः। तस्यार्थवत्समुदायविषयकत्वात् माजात्यादिविभुद्धाः यत्तच्छब्दार्थ-
योरिति तज्जन्यबोधविशेष्ययोः अननुगतत्वेनेति आनंत्यात् शब्दानुगमस्येति यत्र तस्येत्येवंरूपस्य ननु वुद्धिस्थत्वे-
नतयोरनुगम एवेति आह व्यवच्छेद्येति सत्यभावेनेति नियमस्वरूपभंगस्य तावताप्यभावादिति भावः स्वातंत्र्येणापीत्य-
पिनापारतंत्र्यसमुच्चयः अन्यथासर्ववाक्यमिति न्यायेन स्वातंत्र्येणेवेत्यर्थापत्त्या अनुकरणस्येति शब्दापक्षस्यापि प्रयोगेण-
लक्षणत्वेपि प्रयोगाईत्वाभावान्नियमेनव्याप्तिर्न स्यात् भाष्ये सुवंतानामिति पूर्वोक्तभाष्यानन्तरं प्रकृतमत्रभाष्ये इत्यर्थः।
भेदसंसर्गेति वाक्ये पदार्थयोर्विभागेनापि प्रयोगे सतीतरसंसर्गाकांक्षाभेदसंसर्गः सद्वारभूतो यस्य विशिष्यार्थवत्त्वस्येत्यर्थः
कादित्यर्थः समासेपि वाक्येनेवनेन विशिष्यार्थवत्त्वं नहि प्रकृतिप्रत्यययोर्विभागः परस्येतिवचनात् अतो बहुपटवदित्यादौ
नदोषः निभाद्गम् केचित्तु नदोषः स्मृतेतदित्यं नियमनिष्कर्षः स्वनिष्ठप्रकृतित्वनिरूपकप्रत्ययप्रकृत्यन्यतरसमभिव्याहा-
रत्वे सति प्रयोगार्हार्थवत् पूर्वोत्तरभागस्यार्थवतः समुदायस्य चेन्न भवति तर्हि समासस्येवेति नियमशरीरं शिवरामादावति-
व्याप्तिवारणायार्थवत्त्वे न पूर्वोत्तरभागौ विशेषिनौ बहुपटवः पुत्रकाम्येत्यादावतिव्याप्तिवारणाय समभिव्याहारनप्रयोगा

नु. म.
७८

हिवस्तेन नौ विशेषितौ कुंभकारादौ कारेत्यादेरुत्तरभागस्योपपदापेक्षत्वात् ॥ पंचनावप्रियादौ पंचनावेत्यादेः पूर्वभागस्योत्त-
रपदप्रियाद्यपेक्षत्वात् ॥ एतद्धर्मस्य समासव्यभिचरितत्ववारणाय मूलके नोपदंशमित्यादावतिव्याप्तिवारणार्थं च वहुप-
टवं पुत्रकाम्यादावतिव्याप्तिवारणाय च प्रत्ययप्रकृत्यन्यतरसंवंधित्वेन समभिव्याहारो विशेषितः एवमपि कुंभकारादावु-
त्तरभागस्य समुदायप्रकृतिककृत्प्रत्ययस्यानुपपत्त्यापेक्षत्वात् पंचनावप्रियादौ पूर्वभागस्य तदपेक्षत्वात् सांकूटिनादौ कू-
टिन्नित्यस्येतरस्य समुदायप्रकृतिककृत्प्रत्ययापेक्षत्वात् तस्य व्यभिचारित्ववारणाय स्वनिष्ठप्रकृतित्वाविरूपकत्वेन प्र-
त्ययो विशेषितः वस्तुतः प्रसंगतिः स्पष्टैवेति ननु प्रत्ययग्रहणपरिभाषायाः प्रागर्थवत्सूत्रे प्रत्ययांतत्वस्याप्यथाश्रुतं विनस-
मर्थानुपूर्वीकयत्वेन समासस्य प्रातिपदिकत्वाप्राप्त्या विध्यर्थमेवेदानीं समासग्रहणमिति नियमकथाप्युच्छिन्नेति न भाष्यासं-
गतिः प्रत्युत परिष्कृतार्थवत्त्वाभावात् प्राप्तिरेव नेति भवतामेव तद्विरोधः ॥ अर्थवत्वेऽपि परिभाषास्वीकारेणोत्तसूत्रेण प्राप्ताव-
पि नियमप्राप्त्या मा दुर्वारा स्यादिति चेन्न ॥ कृत्तद्धितेति सूत्रे परिभाषाप्रयोजनदानावसरे यद्यर्थवत्सूत्रे परिभाषा न स्यात् तदार्थवा-
नर्थकान्त्यवर्णसमुदायान्तरसूत्रे भगवतो गमनं निर्दलं स्यात् अर्थवत्सूत्रे प्रत्ययग्रहणपरिभाषाभावे तु गामानयेत्यादिप्रयोगाणां प्रत्ययांत-
त्वादेवाप्राप्तावपि मूलके नोपदंशमित्यादौ कृदंतत्वे नातिप्रसक्तेर्दृष्टतया तत्र प्रथमं परिभाषाप्रदर्शनस्यावश्यकत्वात् नच दे-

स·भ·
१२

वदतः पाचकवृत्त्यादावतिप्रसंगसत्त्वेन प्राथमिककृद्ग्रहणत्यागे बीजाभावात् तथापि तद्भाष्यमवश्यमुपलक्षणतयानेय
मिति वाच्यम् प्रत्ययग्रहणपरिभाषाविरहे कृद्ग्रहणपरिभाषायाः सपूर्वस्य चेत् गतिकारकपूर्वस्यैवेति नियमार्थत्वापत्त्याति
प्रसंगभंगस्यैवं बीजत्वात् तस्मादर्थवत्सूत्रे प्रयोजनमदर्शयतो भगवतः॥ प्रत्ययग्रहणपरिभाषयायं कृत्त्वं तदन्या
प्रसिद्धमित्यभिप्रायः कल्पनीयः। अर्थवत्सूत्रे प्रत्ययपर्युदासो नास्तीति भट्टसिद्धांतः प्रत्ययांतपर्युदासस्त्वस्त्येवेति चेन्न
त्वाभिप्रायथदृत्येव तत्र न विद्यते प्रत्यया यस्मादिति बहुव्रीहिः॥ अन्यपदार्थ एव प्रत्ययविधानावध्याद्यवयवक प्रत्ययचरमाव
यवकः समुदायः यथा कथंचित्प्रत्ययांतेपि पारिभाषिकप्रत्ययांतत्वस्य सत्त्वेन नाप्राप्तत्वेन तन्निषेधस्यौचित्यात्॥ अत एव
सन्नंतं तादृश्यत्राप्येवं॥ निर्वाहसंभवात्प्रयोजनांतरं दर्शयतो गार्ग्यदुनिदत्तं तेन च गुरुभूतव्याख्यानगम्ययोगविभागापेक्ष
यान्यपदार्थविशेषग्रहणाहे[illegible]ध्वनि सूचितम् भगवतेति दिगित्यन्ये वस्तुतस्तु पूर्वसूत्रे प्रयोजनमदर्शयतो भगवतः। प्र
त्ययविशेषग्रहण एव प्रयोजनप्रदर्शनतात्पर्यं तत्सामान्यग्रहणे तत्प्रवृत्तिरिष्टैव। अत एव प्रयोजनं धातुप्रातिपदिकप्रत्य
यसमासतद्धितविधिस्वरादि इत्यादि न तद्विशेषग्रहणान्येवोदाहृतानि· तस्मात्समासग्रहणस्य नियमार्थत्वमेवेति प्राचां भा
ष्यार्थपर्यालोचनेति न व्याशयः किंचोत्तरसूत्रेर्थवत्पदानुवृत्तौ केवले कृति पारिभाषिकार्थवत्त्वासंभवात्कृत्तद्धितांशेन[illegible] वि

गम:
१८

धेन द्विशेषणेतावदर्थवत्पदांशेपित्वदंतविधौबाधकाभावादर्थवंतं यत्कृत्तद्धितांतमित्यर्थस्य वकुंशाकायनयाम्स्मुदीय्

स्यार्थवत्त्वाभावेपि अर्थवान्योगार्ग्यशब्दस्तदंतत्वेन परिभाषार्थतः। प्राक्तद्धितांतत्वसत्वेन च प्रातिपदिकत्वस्य प्राप्तिसत्वा

न्नत्वं परिभाषोक्तमु विशिष्टस्यार्थवत्त्वं तत्वेपि तद्धितांतत्वाभावान्नदोषः॥ केवलगार्ग्यस्योपगवादीनां चार्थवदंतत्वमानिर्देशि

कं व्यपदेशिवद्भावेन बोध्यं यत्त्वर्थवदंतं यत्कृत्तद्धितान्तमित्यर्थान्नत्वाप्तिरितितन्न॥ निरुक्तार्थवत्वमादाय व्यावर्त्यकृत्तद्धि

तांतप्रसिद्ध्या द्वितरव्यावर्त्तकत्वरूपव्यापारवत्करणत्वाभावेन करणतृतीयांतपदघटितयेन विधिरित्यस्याप्रवृत्तिरिति

चेन्न। अपवनावेत्यस्य केवले कृत्तद्धितयोश्च· तद्व्यावर्त्यतांप्रसिद्धेः। संनिपातपरिभाषयायथानपुंचनावेत्यस्यसिद्धिः न

थाकंप्राकृतं चकेवलयोः फलाभावादेवनसंज्ञापदसंज्ञास्तत्रस्थंभाष्यंत्वेकदेशयुक्तिरिति वाच्यम्। औपगवःपाचक

इत्यादौ अपत्यकर्त्रर्थकयोस्तद्धितकृतोः॥ संज्ञापत्तावपत्यादिगतांसंख्यामादायसुबुत्पत्तेः॥ फलत्वात्तु अर्थवत्वात्तदंतस

त्त्वर्थविशिष्टस्य पदत्वानापत्त्या दूषणांतरंस्फुटमेवेति प्रत्युतविरोधोन· प्रत्ययग्रहणपरिभाषाभावेप्रत्ययांतत्वस्य

सनाद्यंतादिति धातुत्वस्य चानर्थकेपि सत्वेन व्यभिचारादर्थवत्त्वेन साहचर्यग्रहणानापत्तौ अर्थवत्सूत्रस्य वैयर्थ्याभा

वात्परिष्कृतार्थवत्त्वाभावेन यथाश्रुतार्थवत्त्वस्य च देवदत्तो गार्ग्य इत्यत्र सत्वेन प्राप्तिरेवेति न प्रत्युत विरोध इत्य-

स॰ भ॰
८०

न्येत्याहुः परे त्विदं कुशकाशावलंबनं नव्यग्रंथस्य हठाल्लुभिरादरणीयं स्मोदहं समंतु नेत्यलं बहुनेति व्याचक्षते। आहुरिति
सूचितास्वरसस्तु समासग्रहणस्य विध्यर्थत्वापत्त्या प्राचां भाष्यासंगतिविरहस्तु न दूषणमेवारुचिं मनसि निधाय समनाध्यंताइति·
द्वितीयफलोद्भावनात्· इदंतु बोध्यम्· प्राचीनमतेपि उत्तरसूत्रेणैकार्थीभावविशिष्टस्वरूपार्थवत्त्वग्रहस्योक्तत्वेन देवदत्तोगार्ग्येत्य
त्र तदभावेन प्रकृतभाष्यासंगतिरस्त्येव तत्परिहारस्त्वार्थवत्पदेन तदंतविधिनिरासकः पूर्ववदेव अपरस्त्वविभक्तौ नरसमभिव्या
हारानपेक्षयालौकिकार्थबोधकरूपार्थवत्त्वमुत्तरसूत्रे इति परिभाषाविरहेणैकार्थीभावस्य कृत्तद्धितांतव्यभिचरितत्वाभावात्तेनन
रूपस्यैव ग्रहणे मानाभावादिति· देवदत्तोगार्ग्य इति नन्वेवं राज्ञः पुरुष इत्यत्र सुविनिर्मुक्तराज्ञः पुरुष इत्यस्य पूर्वसूत्रेण सं
ज्ञा दुर्वारैव उत्तरभागस्य स्वातंत्र्येणाप्रयोगानर्हत्वेन नियमेन व्यावर्तयितुमशक्यत्वात्। न चैवं तस्य व्यावर्त्या प्रसिद्धिः लौकि
कवाक्यस्यैव तथाभूतत्वेनैव प्रसिद्धत्वादिति वाच्यम्· त्वदुक्तरीत्या विभक्तिरहितोत्तरभागवत्समुदायप्रातिपदिकत्वापादनग
यामदश्वयवपूर्वभागविभक्तेर्लुक्कालुप्तत्वेन तादृशवाक्यस्यैव गगनारविंदतुल्यत्वात्· अथोत्तरभागस्य स्वातंत्र्येणाप्र
योगार्हत्वापन्नत्वस्यतामितिचेन्न प्रकृतभाष्यविरोधात्· अथ तादृशार्थोग्रहेति प्रसंगः अनाग्रहेतु भाष्यविरोध इत्युभयत
तः पाशारज्जुरिति चेन्न हीत्थं नियमः। प्रकृत्यर्थतां पूर्वसूत्रेणार्थवत्समुदायेचेत्संज्ञा तर्हि स्वतंत्रप्रयोगार्होर्थवत्पूर्वोत्तरभागश्रुति

राम:
८०

तएवेति तथा च प्रयोगानर्हेतरभागकसमुदायस्य पूर्वसूत्राविषयत्वमिति न कश्चिद्दोषः अत एव भाष्ये प्रकृते यत्रं तत्त्वेनैव संज्ञा
माणां कातत्स्नाध्यानं च कृतम् अन्यथा नहि तानि तत्प्रयुक्तसंज्ञाव्यावर्तकप्रत्ययग्रहणपरिभाषयैव समूहस्य प्रत्ययांतत्वाभा
वेन प्रत्ययांतपर्युदासाप्रवृत्त्या पूर्वसूत्रेणैव न स्यादुर्वारत्वात्तत्परिहाराकरणेनन्यूनता या भाष्यासंगत्यापत्तेरित्यपरे संगिरंति
तत्रापि फलमाह प्रातिपदिकत्वेहि सुपः श्रवणानापत्तिरिति न च धातुसाहचर्येण द्व्यत्रत्यवयवं स्यैव प्रातिपदिकत्वं स्यव स्यापि ग्र
हणसंभवेनेति वाच्यं मूलके नोपदं ग्रामित्यादौ दोषात् स्वराद्यर्थमित्यादिना विशेषणयोगादिसंग्रहः॥ प्राकस्पर्शंगादिपदानां चे
ति बुद्धिमात्रविषयीकृतस्यात्यंतासतो बुद्धिसत्ताविशिष्टस्यार्थस्य शब्देन बोधनादिति भावः ननु प्रसिद्धपदार्थद्वयस्य सं
बंधमात्रारोपणवसुवचो न तत्राह स्वप्नेति तत्रानुभूतपदार्थानां न व्यावहारिकत्वं प्रबोधे प्युपलंभापत्तेः॥ ननु स्वप्नस्यवा र
दिशब्दस्य वानां सर्वथा निरर्थकत्वात् कथं साजात्येन नियमस्यार्थवत्समुदायविषयकत्वमत आह अप्रस्येति अन्वास्वां
नेसमूहस्येति शेषः विकारे तित्र पुजतुनोः षुक् इहन सत्त्वं त्वादीनां बहुवचनमवयववहुत्वाभिप्रायं नसंज्ञेति नसत्त्वेदूषणं
सीयुडादेः सा च अत्राद्युदात्तत्वापत्तिरिति आगमानुदात्तत्वं तु नापूर्वमिति नभादेश्च नत्वापत्तिरिति च प्रकृतसूत्रभाष्य तोवसे
यम् महासंज्ञेति प्रत्यायत इति प्रत्याय्यते वा इति रायर्थांतर्भावेण कर्तृकर्मसाधनप्रत्ययशब्दयोः प्रकृतसूत्रभाष्योक्तं तंत्रे

स·भ·
८२

णश्चेति शेषः। तत्र कर्तृसाधनेन स्वार्थप्रत्या।यकसंग्रहः कर्मसाधने तु प्रत्याय्यते प्रकृत्या बोध्यते इति प्रत्ययः यद्यपि स्वार्थिकेषु
प्रकृत्या तदर्थः प्रत्याय्यते न स। एवं तथापि शब्दार्थयोस्तादात्म्यात् प्रकृत्या प्रत्याय्यमानार्थकत्वात्सोप्येवमुच्यते इति तद्भाष्या
शयं कैयटकृच्चेतदेतन्मनसि निधायाह प्रकृतीति प्रकृतित्वं चात्र परश्चेत्यत्र वक्ष्यमाणं न ग्राह्यम्॥ इदानीं प्रत्ययत्वस्यानिर्णी
तत्वेनैवधाय्यादेशरूपप्रत्ययविध्युद्देश्यतायाः स्थानिनिहतं त्याशेसत्वे न तदर्थबोधकानां वधादीनामपि संज्ञापत्तेरन्योन्याश्र
यापत्तेश्च किंच यस्य प्रत्ययत्वमाने यं तदवधित्वम् अयमभावः नभादिव्यावृत्तये स्वशब्दार्थान्तर्भावेण प्रत्ययशब्दस्य वृत्ति
रिति चेत्स्वार्थिकानां प्रकृत्यर्थप्रत्यायकानां नभादिवत् स्वार्थप्रत्यायकत्वाभावात् संज्ञा न स्यात् अतः कर्मव्युत्पत्तिरंगीका
र्या तथा च स्वेन प्रत्याय्यमानार्थकत्वमव्यभिचारीति अन्येनेति लभ्यते तदपि स्वसमभिव्याहारे सर्वत्रास्तीति स्वसमभिव्या
हारे इति लभ्यते तदपि अनियमेन सर्वत्र नियमेनेति लभ्यते तच्च प्रकृतिरूपमेव फलतीति वतोरिड्वानां तादसंख्यादेरित्यादौ
च वृत्तिमत्वाभावादेव नातिव्याप्तिरिति बोध्यम्॥ तन्निष्ठविधेयतानिरूपितनन्निरूपितत्तन्निष्ठत्वव्यधिकरणं तन्निरूपिताव
यवित्वव्यधिकरणं च यदुद्देश्यत्वं तदवच्छेदकाक्रान्तत्वं स्थानिनिष्ठोद्देश्यतायां निष्ठत्ति सामानाधिकरण्यादागमिनिष्ठायास्त
स्या अवयवित्वसामानाधिकरण्याच्चस्यान्यागमिनोर्नातिव्याप्तिः अवधित्वनिवेशेन णानेनवैल्वादावकारस्य त्वक्प्रशक्तिकत्वेन

रामः
८२

षुकोविकाररूपत्वात्स्वार्थप्रत्यायकत्वाभावेऽपि प्रकृत्यर्थप्रत्यायकत्वात् प्रत्ययत्वं दुर्वारमित्यपास्तम् अमस्तु शित्कं स्यात् नणह
इतिनिर्देशादित्करणानां द्योतकतया स्वार्थप्रत्यायकत्वाद्वा प्रत्ययत्वं शवादीनां तु प्रकृत्यर्थप्रत्यायकत्वात् द्योतकतया स्वार्थ
प्रत्यायकत्वाद्वा   तत्त्वम्॥ ननु स्वार्थे वाच्ये द्योत्ये वा विधानं तत्त्वं स्वार्थत्वमिति चेत् स्वप्रकृत्यर्थत्वं वक्तुं वेवं तदर्थे नाम
भिधानादत आह॥ स्वप्रकृत्यर्थत्वं चेति· कोशादीत्यादिना निरुक्तनिघंटसंग्रहः ननु प्रत्यायकत्वमित्येवास्तु मास्तु वेत्यादि स्वश
ब्दोपादानं चेत्यत आह अत एवेति स्वशब्दार्थान्तर्भावेण प्रत्ययशब्दे वृत्तिस्वीकार देवेत्यर्थः। अत एवेति। स्वार्थाभावादेवानभ्य
शब्दादपि ताभिः शब्दप्रकारक एव बोधो नाभिहितवृत्ति॥ ननु कदाचिदपि नाभिहितवृत्ति ये पि शास्त्रानभिज्ञास्तेपि दृढव्यवहरणत
थैव प्रतिपाद[illegible] उक्तार्थे भाष्यं प्रमाणयति· एतदर्थमेवेति· स्वान्यार्थप्रत्यायकत्वभावेः प्रत्ययत्वव्यावृत्त्यर्थमेनेत्यर्थः इति विग्रहे इ
त्यर्थः स्वमर्थं प्रत्याययतीति विग्रहे इत्यर्थः एवं स्वीयपदे त्यत्रापि स्वीयार्थस्वपदेत्यर्थो बोध्यः यथा श्रुतं तु न युक्तं अमख्येनादशपाठ
स्यानुपलंभात् एवमुक्तिस्तु तत्रान्यस्वपदस्यात्मीयार्थकत्वं ध्वनयितुम् आत्मवाचके स्वशब्दे नामभेदो वाधिस्यात् एतेन एतदर्थ
मेव प्रकृत्यर्थसंग्रहार्थमेव स्वीयपदोपादानमिति· अन्यथा स्वशब्दमेवोपाददीत स्वीयपदे उपात्ते त्वात्मीयवाचक स्वशब्द प्र
तिकच्छ प्रत्ययान्तादात्मीयप्रकृतिसंबन्ध्यर्थसंग्रह आत्मवाचिप्रकृतिकादात्मसंबन्धिस्वार्थसंग्रहो जायत इति भावः इति व्या

स्त्र्यांतु एषपालम्। कर्मसाधनोपि प्रत्ययशब्दोऽस्तीत्यग्रिमभाष्यानुस्थितिप्रसंगाच्च। तदर्थान्तर्भावेणेति स्वशब्दार्थान्तर्भावेणेत्यर्थः
ण्यर्थान्तर्भावेणेत्यर्थः॥ इत्यन्ये यत्तु विकारेति॥ विकार एकदेशस्थानिको हनस्तचेत्यादिः आदेशः सर्वस्थानिको व्यभादिरितिभे
दः॥ ॥ ननु तृणह इति निर्देशात् तयास्तयोरिति निर्दापकाच्च श्नमकचोर्न दोषः॥ बहुवितु प्रत्ययत्वाभावेपि नक्षतिरित्यरुचेरेह
किं चलषीनिहु ठकोकारु विस्तु चिन्त्यानभादेरपि प्रत्ययत्वापत्तेः विशेषविहितत्वस्यानवकाशत्वे सत्येव बाधकत्वप्रयोजक
त्वात्सीयुट्सर्व्वलादेशप्रवृत्त्युत्तरं चारितार्थ्यमत आह परत्वादिति उत्कृष्टत्वादित्यर्थः ब्राह्मणाःभोज्यन्तां माठरकौडिन्यौ
परिवेविषातामितिन्यायेन लोडादेशमात्रे योग्यविषयाभावरूपानवकाशत्वस्य सीयुटि सत्त्वेनापवादत्वादिति यावत्। या
सुड्विषये सीयुटः प्रतिषेधेन लिङ्संबधिनामुक्तन्यायेन बाध्यबाधकभावो नेति व्याख्यानेवक्ष्यमाणत्वात्। तक्रकौडिन्य
न्यायस्य तु नात्राश्रयणं तदाश्रयणे हि तक्रदानोत्तरं दधिदानस्येव सीयुटिलादेशप्रवृत्तिरेव स्यात्। भोजनन्यायाश्रयणे
तु पूर्वविषयोत्तरं भोजनस्येव तदुत्तरं तत्प्रवृत्तिर्निर्बाधैव यद्वा उक्तन्यायेन सीयुटो बलीयस्त्वाद्धि प्रतिषेधाभावेन परत्वात्र
योजकत्वादाह चेति चेन चो कार्यसमुच्चयः सीयुट एवेति यद्यपि तनीयसूत्रे तस्यानेदुदात्तो भवतीति उत्पत्तिकाल एव
वस्वरविधानादनुवादविषये यदागमनादुत्पत्त्याः प्रवृत्तेरागमविशिष्टस्योदात्तत्वाप्राप्तेरुच्चार्यमाणस्य टएवाद्युदात्ततैव सी

पुटः [illegible]नि घातासिद्धिः यत्तु सीयुटागमसमवधाने लस्यानर्थक्यावादेशासंभवेन सीयुट् लङ्त्यस्य स्थानेमीय इत्यादेशः स्यात्तच प्रत्यय
मं लक् आद्युदात्तश्चेत्यानुमानिकवचनेन प्राप्नोतीत्याशयः आगमानुदात्तत्वेऽप्येतत्त्वपवादविषयत्वात् पूर्वमेवानुमानिकाद्युदात्तत्व प्रवृत्ति
रिति श्रोताद्युदात्तत्वस्यैवावस्थानमित्याहुस्तन्न आनुमानिककल्पनेऽपि विशेषणविशिष्टस्य लक्षणानुलक्षितेर्विशेषणान्वयदुत्तं
पीनात् तु [illegible]न्ययापदस्य वाक्यस्य वा आद्युदात्तत्वापत्तिरिति तथापि गम्यस्यैकदेशयुक्तित्वादिति स्पष्टमुद्योतेन च क्रियमाणाप्यागमानु
दात्तत्वे क्रियमाणेऽपि प्रत्ययसंनियोगेनाद्युदात्तत्वे सीयुटादेर्लिङः आद्युदात्तत्वं प्रसज्येतेति भाष्यं लिङ् विधावुपस्थिताद्युदात्तत्वस्य
विधानकाले [illegible] लिङोऽ नचैकत्वेनाप्रवृत्तावपि सीयुटि परत्वागमेति न्यायेन लिङ्त्वात्सीयुटः प्राप्नोतीत्यभिप्रायकमित्यादेशविधौ नद्दसं
गतिरतः कैय[illegible]संगतिमाह कैयटेति तत्सूत्रस्य प्रदीपोद्द्योतौ तु विचिन्त्यावेव चिन्ताबीजं तु स्फुटं स्फुटं द्रष्टव्यमिति नोक्तम् यत्तु प्रकृतस्य
[illegible]ऽउपपदस्यापि प्रत्ययत्वे राजपुरुषादिषु स्वावकाशमुपसर्जनं पूर्वमित्येतद्बाधित्वा परत्वापत्तिरिति तु तत्रेदं ध्येयं भावः राज
पुरुषयोः सुप् निरूपितप्रकृतित्वेऽपि शब्दान्तरापेक्षयापरं परापेक्षत्वं वा पर्यायेण प्रयोगे प्राप्ते समस्यमानपदापेक्षयोपपदस्योपसर्जे-
नस्य पूर्वनिपातार्थं तत्सार्थकत्वम् आदिपदग्राह्यं दास्याः पुत्र इत्यादावलुक्समासे जहि जोड इति [illegible] पूर्व[illegible]समासेन तत्सार्थ
कत्वं न हि तत्र तिङ् जपष्ठं तयोः प्रकृतित्वेन प्रत्ययत्वप्राप्तिरस्तीयेन परत्वं प्रसज्येतेति एतेनोपसर्जनपूर्वत्वस्यानवकाशत्वाभिप्राय

कोक्तिस्वरणेऽयंपः परास्तः यदपिश्र क्तानसूत्रेविकारागमेषुचपरविज्ञानादितिभाष्य व्याख्यानावसरे कैयटेनोक्तं अस्ति परत्वनिमित्ताप्र
त्ययसंज्ञा अपितुप्रत्ययसंज्ञानिमित्तंपरत्वं तथाचपरत्वाभावेपिसमवहुजकचांप्रत्ययसंज्ञाभवति इतितस्याप्ययमाशयः॥ परत्वस
न्नियोगशिष्टंनप्रत्ययत्वंप्रत्ययइतिसूत्रेचकाराभावादव्याप्तेश्चकिंतुप्रत्ययत्वसंनियोगशिष्टंपरत्वमिति नचतृज्वदितिनिर्देशोनसं
न्नियोगशिष्टन्यायानित्यत्वेनाव्याप्तिःसुपरिहरेतिवाच्यम् अधिकारसूत्रत्वाकार्यस्यैकत्वेनतत्त्रन्यायप्रवृत्तेरविकारादिष्वतिव्याप्ति
प्रवृत्तोपि व्याप्तिस्तुभयस्यदुर्लभत्वादिति एतेननतुव्याख्यावसरेउद्द्योतेयदुक्तं नहिपरत्वनिमित्तेति तद्व्याख्यातम्‌ तथा
हिसतिव्यापकाभावेनव्याप्याभावःसिद्ध्येदितिभावः अपितुप्रत्ययसंज्ञानिमित्तंपरत्वमितिनत्विदंत्वंराजपुरुषइत्यादौप्रत्ययत्वाभावेपि
पुरुषशब्दस्यपरत्वदर्शनात्तु सन्नियोगेतिन्यायानित्यत्वेनप्रमादीनांप्रवर्तनतएवसंज्ञेति चतदपासंविदित्वंच तद्व्याशयस्तुविकारागमे
षुफलाभावान्नप्रत्ययत्वमित्येव अनुदात्तत्वंचपरत्वसंनियोगशिष्टंनप्रत्ययत्वसन्नियोगशिष्टम्‌ अतएवपरश्चेत्यस्याग्नेआद्युदात्त
श्चेतिसूत्रितंवाचनिकंवागमानुदात्तत्वमित्यादिकैयटेस्पष्टम्‌ यत्रचप्रमादौफलमस्तिभवत्येवतत्रप्रत्ययत्वमित्यादिनादिगर्थस्तुप्रदीप
तोवगन्तव्यइत्यत्वंवहुनेति व्याचक्षतेतरामुपश्चेति अपादानत्वासंभवेति गुणादिभ्यःसनादिर्भवतीत्यर्थेनायातीत्यर्थाभावेनतत्त्व
न्यविभागानाश्रयत्वादितिभावः।षष्ठ्यर्थेआनंतर्यमिति वोद्धैकदेशाधारकस्थित्याश्रयत्वरूपषष्ठ्यर्थसंबंधनिरूपकाध्याहृतानंतरा-

ष्ठिवद्भौध्यानंतर्यमित्यर्थः॥ अव्यवहिता एवेति गापोष्ठगित्यत्रानंतर्यस्य षष्ठ्यर्थकत्वेसिद्धेऽत्रेशेनार्थान्तरकरणं पाठ कस्यनुधेवेतिं
भातिषष्ठ्यर्थोति· अत्रचसुपिचेत्यादिनिर्देशात्ला न्त संख्याहकादृतिभादृव्याख्यानंतथाचप्रथमांसीकृतप्रत्ययैः सामानाधिकरण्यमनिभ्यांक
मवृत्त्येवनियमेति अयंभावः विधिर्द्विविधः नित्यो वैकल्पिकश्चतत्र नित्यविधेः अनुपस्थितिश्चस्येकोयण् तद्घटितः साधुः स प्रयोक्तव्यः
तद्घटितोनिसाधुः सनप्रयोक्तव्यइत्यादिरीत्यास्वविधेयाघटितासाधुत्वबोधनपर्यन्तमपिव्यापारः स्वरतीत्यादिविकल्पविधिश्च साधु
त्वबोधनपर्यन्तमेवेत्येवंस्थितेविध्यंतरबद्धत्नेमानत्वविवक्षायांतदघटितस्यसाधुत्वंन्यायसिद्धंतदविवक्षायांतदघटितस्यासाधुत्वबो
धनार्थनियमः॥ ॥अत्रचलडादिर्निरर्थक एवभूतानिकालः पचतीत्यत्र यथातस्यापत्यमित्यादिविकल्पविधावुपगरपत्यमुपगोर
पत्यमित्यादिप्रयोगभंगभियाअणाद्यघटितस्यासाधुत्वंन्यायसिद्धं तत्र महाविभाषयावाक्यम् अन्यत्र संयोगजणानुवृत्त्यासमासः
उपगवपत्यमित्यर्थेउपगुरितिनप्रयोक्तव्यमितिनियमेनसाध्यम् स्पष्टं चेदमत्रभाष्ये विपरीतंतुनव्याख्यानात् क्रोमप् नित्यमित्यत्रयेः
गविभागादिकंतुमवंनाविदृत्तार्थप्रतीतिर्यथानियमेनस्यादित्येवमर्थं परश्चेतिनियमेनतुनिरर्थकोमपस्यात् अर्थेनस्वार्थिकेतुना
स्वसंबंधो महाविभाषयासहविरोधात्· विभाषयाहिस्वविधेयाघटितेसाधुत्वनियमेनचासाधुत्वमितिविरोधः। सुप्तएवेति॥ अतएवाष्ट
डसेत्यादौ उत्तरसूत्रस्यान्यतरस्यांग्रहणस्यज्ञापकत्वेननित्यत्वमुक्तमाकरे अनुकरणेत्विति॥ अस्यचगवित्ययमाहेत्यादावितिसप्त

स·भ·
८४

स्यं तेन्वयः शास्त्राबोधितेति शास्त्राबोधितत्वं च शास्त्रबोधितासाधुत्वकत्वम् अतः पाचकवृन्दादेर्घञ्विधायकशास्त्रबोधितस्य प्र
योगः स्यादिति नापादनीयं परान्वेति नियमेन स्वाघटितस्य तस्यासाधुत्वबोधनात् अनुकरणेऽतिव्याप्तिवारणाय [illegible] स्वं व्याचष्टे अप
रीतिनिर्हृनादावव्याप्तिवारणाय तदपि परिकुरुते परीति अप्रवृत्तत्वं च प्रतिबंधकाप्रतिहतप्रवृत्तिकत्वं तेन लिड्डित्यादौ एवं लाघुदेस्स
न तत्र स्फुटकथा तु त्वाकांनत्वेपि नान्याप्तिः हरीणमावित्यादौ घनस्य प्रतिबंधकत्वं च निर्हृत्वनितत्वेनेलक्ष्ये लक्षणे इति न्यायः लिड्डादावु
कार्याणामित्युक्तवाद विषयतावासप्रकृतिभावश्चेति रीत्या तत्र तत्रानेकविधं यथासंभवं बोध्यम् द्विगर्थस्तु [illegible] कस्यैकविधीनां वाक्य
हणरूपप्रतिबंधकप्रतिहतप्रवृत्तिकत्वान्नित्यग्रहणवैकल्पिकमिति केचित् व्याचक्षते॥ ङ्याप्प्रातिपदिकार्थत्वाभावेन नात्र पदे
न हित्वातिरिक्तकालादेर्व्यावृत्त्या च प्रथमाया अप्राप्तावपि पष्ठ्यंधावनीत्यादौ द्वितीयास्यादत आह नेति॥ आदिना ज्योतिष्टोमेन य
जेतेत्यादौ तृतीया संख्येति संख्याधिक्येऽन्यसंख्याभावादित्यर्थः नन्वस्य संख्याभावेपि तत्संख्यासादायस्यादत आह संख्येति ए
तेन वाक्यान्तु सुवुत्पत्तिर्द्विराम यस्य सहत्य पाद्यमिति भट्टाः अन्ये तु संख्याभावादित्यस्य प्रतीतेरित्यर्थः ननु कर्तृकर्म प्रत्यये प्रतीतावपि
संख्यात्वादौ तत्प्रतीतिरस्त्वेवं भावार्थकतिङ्गेऽत आह उक्तत्वादिति एतेन धाव निपष्ठ्येत्यादौ कारकसंख्याया उक्तत्वेपि क्रियाया
नामनुक्तामा द्वितीया स्यादित्यपास्तमिति व्याचक्षते॥ ॥अपवादत्वादिति फलस्य व्यपदेशिवद्भावेन कर्मत्वात् धातुमात्रस्य तदुपस्थि

रामः
८४

पकत्वात्तु स्वमते संख्या संत्वा च सर्वत्र द्वितीया प्राप्तेरिति भावः क्वचित्तस्य करणत्वेनान्वयविवक्षायां ज्योतिष्टोमेन यजेतेत्यादौ हरि
न्नमेद्धुरित्यादौ च हेतुत्वेन तृतीया प्राप्तिर्बोध्या इदं तु चिंत्यम् संख्यामात्रविवक्षायां कालसाधनादेरविवक्षायां निष्कादेरप्राप्तेः सुपो वृ
रणे यस आवश्यकत्वादिति नतु वर्तमानकालिकैककर्तृकपाकसमूह इत्यर्थे पचतीत्यादावेकवचनादिव्यावृत्त्यर्थः सोऽत आह तस्येति
ननु तस्येत्यादेः नेष्टव्यं नादि त्यर्थे अंतु जतसंबंधीत्यादिः एवं च तिङ् नादणादिः प्राप्नोत्येवेत्यत आह ज्ञापकेति लिङ् नान्तद्धित
श्चात्तखादिस्वेतिनियमः इतीति भावः एतेन वा इत्तु धातुस्थ्यो स्वरविरोध इत्यपास्तम् वाक्यादेत्यत्र स्वार्थिकनिरासाय तद्धितग्रि
त्यमिदमिति वदंति एवं तस्योपस्थितत्वसिद्धये हेतुद्वयमाह॥ स्वार्थेति॥ तस्येति च बोध्येति अत्र च विद्वन्मामसेनि वक्ष्यमाण
वनंत्रं बोध्यम् प्रथमोच्चारितबोध्यादिनि प्रथमोच्चारितं बोध्यं वाच्यं यस्येति च तदर्थः। बोध्यबोधकादेरि यावत् अन्यथा सुगो
पीति न्यायेन बोध्या तु पग्वादेरर्थो न प्रत्ययस्य बाधादसंगतिः स्पष्टे वा तद्बोध्यबोधकं चमुवंतमेकेनि न स्यो उपस्थितत्वमिति
भावः॥ ॥घटकत्वं योपस्थितप्रातिपदिकत्वविशेषणत्वाभावायाह प्राधान्येति नदोष इति यद्यपि प्रकृते तोऽत्र वस्य सुपीत्य
स्य प्रकृत्या प्रातिपदिकत्वमपि न तथाप्युपलक्षणं तदिति भावः॥ डकारादिपाठं प्रमाणयन्नाह स्पष्टं चेति अत एव सर्वेति प्रथमादौ तसप्तमीत्यादे
वेत्यर्थः। अन्यथा बहुव्रीहिकाले नोदात्तत्वात्तस्यैव पूर्वपदप्रकृतिस्वरेणेति देशः स्यात् धर्मिग्राहकमानान्न्याय सिद्धत्वादेवेति तु नान

एवेत्यस्यार्थः। तदसंकोचेपि पूर्वं लुकि अन्तरंगत्वात्सर्वे स्वरे प्रकृतिस्वरेण नत्वसिद्धेः। कुमारेत्यादिधर्मिग्राहकस्य सूत्रस्य मांसादनुपलंभात् उदाहरणं प्रमाणयति। बहुतरेति। नन्वयस्कुंभीत्युदाहृते। प्रातिपदिकरूपेण कुंभत्वादिना ग्रहणे प्रवृत्तिलाभेपि नञ्ग्रहणेन वहुव्रीहित्वादिना ग्रहणे प्रवृत्तिर्न स्यादत आह स्त्रीप्रत्ययेति। तद्धिते। इत्यादुतिशेषः तद्धितत्वं च तत्प्रकृतिभूतमेव। अमनवत्वस्य तु उत्तरपदादित्वस्यैव पुनः रपदत्वस्य विशिष्टेति देशात्। कप्यादिन्यपास्तम्। उत्तरपदत्वस्य प्रकृतौ दृष्टत्वाभावात्। एतत्ध्वननायैवसमभिव्याहार इति। अन्यथा न हि फलमेव स्यात् विशिष्टेति। तन्मात्रविशिष्टे। एतेन दृष्टयामात्रयादृत्यत्र तत्प्रकृतौ मात्ले दृष्ट प्रातिपदिकत्वस्य दृष्टामात्रादृ तिविशिष्टेऽतिदेशात्प्रातिपदिकावयवत्वेन लुकस्यात्। इत्यपास्तमिति केचित्। पाठकग्रंथे उत्तरमिति तत्त्वम्। वस्तुतस्तु समासांता नाम लौकिके प्रयुक्त्यानवस्य सुपः सूत्रात् नदीचरमावयवकत्वं वाधितमतो नस्यान्त प्रकृतिकमुवन्तो त्तरपदक इत्यर्थो वोध्यः॥ ॥ इत्यादेः सिद्धिरिति। आदिना युवतिकादः। अन्यथांतरंगत्वादेवङ्याप्पोपूर्वमुत्पादे सिद्धेः स्त्रीप्रत्ययांताच्चेत्संज्ञा वक्तादेरेवविनियमार्थत्वापत्त्यात्। ङीः पूर्वमनुत्पत्तावसिद्धिः स्यात्। मानं तु प्रत्याख्यानपरं भाष्यमेव। एतच्चेति। ङ्याप्ग्रहणासम्बन्धवृत्तीति प्रत्ययग्रहणं त्यादिनाऽत्यंत स्वार्थिक परिग्रहः यूनीत्रिरिति। उक्तार्थेतिन्यायस्तु स्त्रीप्रत्ययप्रकरणेनेति प्रत्ययांशे भाद्राध्यतद्धितिभावः॥ एवंचेति। लक्ष्यानुरोधेन तस्य तदन्यपरत्वेचेत्यर्थः॥ आरभ्येत्यनेन समासांतपरिग्रहः पठितेष्विति शेषः॥ व्याख्यानादिति ङ्याप्ग्रहणस्य स्त्री

प्रत्ययमात्रोपलक्षणत्वस्य प्रत्याख्यानानुरोधेनावश्यकत्वेन तद्धितान्तद्धितस्यैव तेन ग्रहणमिति सूत्रमतेपि यूनस्तिरित्यत्र तदसं
बंधः ॥ प्रत्यंतस्वार्थिकाविषुलुग्नेषामतिरिक्तार्थाभावेन परिपूर्णमिति न्यायाविषयत्वयास्तु वक्ता तद्धितद्वितिसिद्धांतस्य ङ्यापोः प्राक्
प्रवृत्तेश्चाभावात्तदसंबंधः न्यायसिद्धेर्थेस्मतिमप्याह। सर्वस्येति। तत्र भाष्येऽकार्थासंस्पर्शादाह। कैयटस्त्वि। अत्र केचित्प्रत्यव-
तिष्ठंते तत्र हि भाष्ये पदग्रहणं कर्तव्यं समासनिवृत्त्यर्थं सप्तपर्णादस्तु कं यदा सप्तसंख्याकपर्णविशिष्टो वृक्षः एकत्वादिसंख्या-
नालिङ्गितो वीप्स्यते तदा वीप्साविषयव्याप्तिबोधसमये वृक्षगतैकत्वस्याननुभवाद्विभक्त्युत्पत्तेः प्रागेव समासस्य प्राप्तिरपवाद-
त्वान्न भवति। कैयटेस्वाद्युपदत्वेपि तदर्थसंख्यालिंगितार्थवीप्सितत्वाभावान्न भवति तद्वालिंगिते वीप्सा तु वृक्षाद्यानुभवत्येव घटंप
टं पश्येति वक्तव्यभावः सप्तसंख्यानि पर्णानि वीप्स्यंते न तु तद्वान् वृक्ष इति कैयटस्तु चिंत्य एव वृक्षादेरवीप्सितत्वे विभक्त्यंतद्वित्वं च
नाप्रसक्तयापदग्रहावश्यकत्वासंगतेः ततः तद्धितनिवृत्त्यर्थं च द्विपदिकेति स्त्रीत्वद्वित्वलक्षणलिंगसंख्यान्वितः पदार्थो वीप्स्यते न
त्वेकत्वाद्यालिंगितद्वितिवीप्साविषयव्याप्तिबोधसमयेएकत्वादेरननुभवात् सुबुत्पत्तेः प्राक्पूर्वोक्तत्वेन तद्धि[illegible]स्य टावन्तस्य-
द्विर्वचनं प्राप्नोति पदाधिकारात्तु न भवतीकृत्तेसोहलङ्यादिलोपे च पदत्वेपि तदर्थकस्यैकत्वालिंगितस्यावीप्सितत्वान्न भवति तत्त्वे
नुभवत्येवेति भावः। यत्तु कैयटः स्त्रीत्वस्यापि वीप्सायामनंतर्भावमाह तन्न सम्यक् द्विपदिकाभ्यामित्यत्र प्राप्नोतीति विहस्येन भाष्या

संगतेः नहि लिंगस्यापि वीप्सितत्वे टावन्ते स्वादिष्विति पदत्वेपि द्विर्वचनप्रसक्तिरस्तीति॰ नच तद्धितोत्पत्तेः प्राक् समासः॰ ए न द्विर्वचनम
पदत्वादित्यभिप्रायकमाह॰ तदपि त्र॰ प्रकृतार्थस्य भाष्यानभिप्रेतत्वात्॰ तथाहि॰ तद्धितनिवृत्त्यर्थमित्यस्य तद्धिते निवृत्त्यर्थमित्य
र्थः॥ नहि तदुत्पत्तेः प्राक् तदस्ति समासनिवृत्त्यर्थमित्यनेन गतार्थत्वाच्च॰ किंच तथाभिप्रेतत्वे हि तद्धिते नोत्पत्त्या भवतीति॰ तदु
त्तरं तत्प्रत्याख्यानभाष्यासंगतिः नहि तत्तः प्राक् तेनोक्तत्वं संभवतीति पुनः सर्वथापि॥ एकाग्रत्वेन तद्बोधकत्वात् ततः प्राक् गवप्र
वृत्तेश्च वृत्तिकृतेपि तत्र कौण्डिन्यन्यायेन बाधेऽपवादे कृते उत्सर्गाप्रवृत्त्या द्वित्वं न प्राप्नोत्येवेति तवापि भाष्यमसंगतमेवेति तु त्र वा
च्यमुत्तरपद्वित्वे कृते उक्तत्वाद्वीप्सायां वुनोऽप्राप्त्या तन्न्यायविषयाभावात्॰ हलङ्यादिलोपे कृते परत्वात्॰ द्विपदिकाद्दूति बहु
वचनान्तंपाठ्यमिति च तदुक्तं चिन्त्यम् तत्पाठस्यापि योजितत्वात्॰ यत्तु विवरणे द्विपदिके त्सुनरं माशसङ्ख्यपपाठः पदमहर्मोऽपिन
व्रतम्निवृत्तेरशक्यत्वात् असंतस्यापि पदत्वात्॰ तत्पूर्वभागस्यापि सुवंतात् असउत्पत्त्या पदत्वादित्युक्तं तत्र तत्पूर्वभागस्यापि स्वा
दिष्विति पदत्वादित्युक्तं ननुः अत्यंतस्वार्थिकानां सुवुत्पत्तेः पूर्वमुत्पत्तिरिति॰ पूर्वमुक्तत्वादिति। प्रकृतमप्रं प्रार्थयस्तु इत्यं द्विसंसं
युक्तेति ध्रौव्यप्रयुक्तेत्यपि वोध्यम्॰ एकत्वेति। कैयटे लिंगानन्तर्भावस्योक्तत्वेपि उक्तहेतोरेव तन्त्यागः अनंतर्भावात् सुवुत्पत्तेः प्राक्
टावन्तस्येति शेषः तस्य पदत्वाभावाद्द्विर्वचनाभावः प्रयोजनमित्यन्वयः ननु कृते तद्धिते पदत्वाभिनोक्तत्वाद्द्विर्वचनाभावेपि न

द्वुत्पत्तेः प्राकृसमासस्य। कुतो वेत्यत आह-सेति। अभावेनेति। तस्याः संख्यापेक्षत्वे नवहिरंगत्वात्तद्धितस्य च स्वार्थिकत्वेनान्तरंगत्वा
त्तेन बाधा इति भावः। यद्यपि बुतो बाधकत्वात् द्विषयेद्विर्वचनाप्रवृत्तिरिति वक्तव्यं तथापि अपदत्वात्प्राप्तिरेव नेत्युक्तेरवश्या
प्यत्वादेवमुक्तमिति॥ प्रत्याख्याने तु नैव पूर्वमप्रवृत्तिरिति भावः॥ ॥ ननूपजनिष्यते इति न्यायेन भत्वेन पंसत्वबाधात् प्राकृतद्धि-
तोत्पत्तेः समासे कृते पदत्वाभावात् न तदभावद्वृत्तिके पटः सुयोज्योऽत आह-पुंयोगेति। अपि ना पूर्वोक्तके पटसंग्रहः। एतेनो[illegible]स्य
भाष्यार्थस्य शोभ्यं सूचितवान् अन्यथा सूत्रेपीति वदेत् ऋनुगुणं तत्त्वरूपेति। समासविधौ हि गतित्वत्तानं समर्थत्वज्ञानं चेति द्वयमेव-
ऽप्रणविधौ तु प्रातिपदिकत्वं समर्थत्वम् द्वनुगुणं तत्त्वं चेति त्रयः अतस्तस्याधिक्यं। नेच पदद्वयापेक्षत्वेन समासस्यापि वहिरंगत्वे
नोभयोः तयोः परत्वादणेव स्यादिति वाच्यं। संकुचितात्मिलस्यानुरोधेनोक्तान्तरंगत्वस्यैव पुरस्कारादिति भावः। यदा समयः [illegible]
सस्यान्तरंगत्वेपि प्रातिपदोक्तत्वात् अणस्यादित्यपास्तम्-ऋनुगुणं तन्निष्ठधर्मे च योपस्थितावणविध्युपस्थितौ ऽणविधेर्विलंबोप-
स्थितिकत्वात् न तु तन्निष्ठावश्यकसमर्थत्वरूपधर्ममात्रोपस्थितौ समासविध्युपस्थित्या तस्यैव न त्वात्[illegible]ग्रामांगतिरिति॥ नन्तु
तदन्या तद्त्पत्त्यावपि परिभाषांगीकारे पासु वुत्पत्त्यनन्तरं प्राप्स्यानद्वुत्पत्तेः प्रागेवान्तरंगत्वात्समासे तत्र तद्त्वच[illegible]दायादणि
सांकृत्यसिद्धिः तदनंगीकारे तु द्वयोरपि तद्त्पत्त्यनन्तरं युगपत्प्राप्स्यैकपदाश्रितत्वेनान्तरंगत्वात्केवलादणि संकोठिनमितिस्यादि

तिरीत्याभाष्यस्यसु थो ज्यत्वेनकाप्यसंगतिरि। नचैवंसत्यामप्येतस्यामवयवात्तदुत्पत्तिः प्राप्नोतीतितदुत्तरभाष्यानुरोधेनाप्यर्थभाष्यस्यो
क्ताभिप्रायकत्वेनैवव्याख्येयत्वेनासंगतेरभावादवश्यात् नहिसुवंतात्तदुत्पत्तिरितिनियमेऽवयवात्तदुत्पत्तिः प्राप्नोतीत्यंशस्ययवस्यनत्वा
भावाद्येनततत् भाष्यंसंगतंस्यात्·इदंप्राचामनुरोधेन· वस्तुतःसंचस्कारेत्यादौ सुट इवांतरंगत्तरार्थकगतिभिर्भेज्ञत्वेनसमास
स्यान्तरंगत्वंबोध्यमृतदाह अन्यथेति एतेननतत्वेननतत्वांगीकारेस्वग्रंथांतरविरोधइत्यपास्तमिति केचित्·स्वौजसम् दंद्व इति।
जसादेरुत्वंसौत्रत्वान्नेतिभावः। वस्तुतस्तिप् तसकीत्यत्र वक्ष्यमाणरीत्यालाघवेननिर्विभक्तिकानुकरणभूतानि ९ पंक्त्वं १ पदोन्येव
त्युरुत्वंन्याय्यमेवेतिबोध्यम्·विभक्तिश्च·नन्वेवंत्राणित्रीणीत्यस्याननुवृत्तौऽप्रष्टन आवीत्यादौ निर्वाहेपि प्रथमयोरित्यादौ दोषो
ऽतआहप्रथमेति। वाच्ययोरित्यत्रत्रिकयोरितिशेषः॥ व्याख्यानादित्यस्यार्थमाह॥ अन्यथेति॥ औजसोरिति॥ स्वाबोरितितुनो-
क्तं। जसत्व्याहृत्यर्थकान्नादिचीविद्रूचूपग्रहान्नोरजादित्वंतुज्ञानंशिबोऽचीदूत्यत्रबोध्यम्·नस्माच्छसदुतिलिंगमप्यत्रबो-
ध्यम्॥ सुपूसंज्ञेति। तिङ्·संज्ञाप्येवमेव तदंतोत्तरवाच्य·टेः॥ ॥रामदूद्देत्यादौ निघातापत्तेश्चादीर्घापत्तेरिति· सन्निपातपरिभाषयादी
र्घवारणेतुसर्वदेत्यादौसर्वस्येत्युदात्तत्वापत्तिर्बोध्येत्यन्यत्रविस्तरः॥ बहुषु नग्रहणमिति· तेनबहुः पर्वतइत्यादौन नचात्रपदेत्वां
देकवचनंस्यादितिवाच्यम्· नहि नसगिकत्वेनतस्यतदपवादत्वादितिवदंति॥ काशाद्यपिवृद्धव्यवहारस्यप्राबल्यमितिध्वनयितुमाह,

भर्तृदारे इति अयं स्मार्तप्रयोगः । अन्यः शाबरभाष्यीयः । रुत्वे इति सुवेत्तनयेति हेतौ तृतीया । सुवंजनताहेतुकं यत्पदत्वं तदेकदेशावकृत
न्यायेन कृतरुत्वे इत्यर्थः । यथाश्रुतं तु न साधु तेन न्यायेनाविकृतावयवनिबंधनकार्यस्यानतिदेशात् । ममहेतूपादानं तु पदेशप्रवृत्तिया
तनाये इदं च पक्षद्वयेपि बोध्यम् । अग्नी इत्यत्रेव रुत्वस्यासिद्धत्वात् सुबुद्ध्या प्रवृत्त्या पुनः पदत्वमित्यादि प्रागुक्तं च न विस्मर्तव्यं । सरूप
विभक्त्यंतानां सरूपाणामेकशेष इत्यर्थः इति पक्षसाधारणं फलं वक्तुमाह । भ्यामीति । यद्यास्य प्रकारापकर्षाभावे उपलक्षणत्वस्यातिप्रसं
गमात्रं भ्यामीतिं सिद्धान्तपक्षे त्वोजसादौ वपि तद्व्यावृत्तिः । फलं बोध्यं ध्वनितं चेदं भ्यामादावपीत्युक्त्या इह इति ॥ तद्धितादौ विति । आदिना
कपड्डाणी तद्धारिण्यहरिणीयते हरितायते इत्यत्र । ननु सत्यप्येवकारस्य कर्षमात्रमात्रे एकशेषो दुर्वारः । अत्र लौकिके औजसादौ तपि साह
प्याद्वत आह । लौकिके इति । यद्यपि विरूपाणिनेत्यर्थे पर्यवसानात् लौकिके च बेह प्याति । तत्र सत्सु वार एव तथापि अन्यत्र रीयं लौकिकि-
कम् । अपरा यम लौकिकमादायाव्याप्तिवारणं शेषफलं बोध्यमिति वदंति । अत्रावेसप्यमपि प्रातिपदिकांशे एवं तिर्न संज्ञा शेषेनो
न्नाः प्रथमायोरेकशेषः । अन्यथा जसि प्रथमे प्रथमावृत्तिवैरूप्यान्नस्यादिति बोध्यमित्यन्ये ॥ ॥ नन्वेकशेषस्य सहविवक्षाविषयत्वे कु
यमन्यत्र तदुक्तिरत आह द्विर्वचनेति स्पष्टार्थमिति सूत्रारंभसामर्थ्यात् वक्ष्यमाणेनरार्थस्यापि बोधयितुं शक्यत्वेनन्वदप्रमाणा
वार्थ इति स्पष्टतया बोधनार्थ मित्यर्थः । एकस्यामपीति । समासासंवित्यर्थः । बोधयितुमिति अन्यथा बालमीन्ले केवल सिन्नवि-

भक्तौ वैरूप्यमुदायासंभवः स्यात्· रामौ रामाभ्यां स्वसा स्वसारौ इत्यादौ भिन्नविभक्तौ सर्वत्र वैरूप्यस्य सत्वादिति भावः॥ नैतच्छेषद्वृत्ति·नेन
वृद्धो यूनेत्यादि विरूपैकशेषस्य लक्ष्ये गार्ग्यो गार्ग्यायण इत्यादौ समाहारे एकशेषो न गार्ग्यमित्येकवचनेन विभक्त्यंतं तत्र तं तु न विरूपस्यात् सरू
पैकशेषस्य ते तु नं त्रेणं राम इत्यस्य दुर्वारत्वात्॥ ॥अन्यतरस्यामित्यनेनेति। फलतः सेनेति वार्तिकस्य विकल्पेनैकवद्भावविधायकत्वोक्तेः। आ
श्विकादाव शाशेषकवद्भावविधानार्थमिति न वाच्यम्· ननु तस्य विधित्वेपि सर्वद्रुप्रकृति आश्विकादि द्वंद्वस्य द्वंद्वश्चेति नित्यैकवद्भावे
विकल्पार्थमिदमिति कथं ज्ञापकत्वमिति चेन्न तेन प्रकरणेन समाहारगतैकत्वानुवादात्· तत्र द्वंद्ववाच्यसमाहारे वर्तिपदार्थगतसं-
ख्यायोगाभावेपि एकशेषप्राप्त्यै समाहारे तदभावे वीजाभावात्· ननु ज्ञापकेन समाहारे एकशेषाभावेपि द्वंद्वे घटघटमिति स्यादेवात्त:-
सामान्यतो ज्ञाप्यशरीरमाह समाहारे वृत्त्यभावेति· लुप्तेति। शेषशब्दस्य कर्मसाधनत्वे लुप्तस्तं तं भावसाधनत्वे तु लुप्तेऽ संतम्· अत
एवावस्थानमिति व्याख्यानं संगच्छते न च भावसाधनत्वे आकडारेति सूत्रस्थभाष्यविरोधः तत्र हि एकेति संबंधादेकग्रहणमत्रत्यं प्र
त्याख्यातमिति वाच्यं भावसाधनेपि शेषशब्दे विभक्तिविपरिणामेनेति विवरणेनैव समाधानात् तत्र एकपदार्थे श्रूयमाणेति अस्य फ
लं युष्मदीति सूत्रे स्फुटीभविष्यति॥ द्विबह्वोरिति· संख्यापरत्वात्साधुत्वम् अंशाविशिष्टोदात्तकत्वे सति अंशविशिष्टानुदात्तकत्वे ग
दीत्वोदात्तानुदात्तयुक्तोपि स्यादेवेत्यत आह कदाचिदिति द्व्युदात्तवत्त्वेति। द्यावुदात्तवंतावच्छब्दो यस्य तत्त्वं कर्मधारये तु मतुपू न स्या

तूदात्तशब्दो धर्मिपरः तस्यैव ग्रहणे मानाभावादिमं गृहीत्वा स्यादेवदोषः स्वरभिन्नेति तृतीयासमासः दशांतेति अष्टादशान्यदुत्प
त्तेः अन्येत्वेकोनविंशत्यादावित्तिर्वाच्यम् एकादशादित्यागेबीजाभावादित्यन्ये एकशेषेति एकश्चएकश्च दश च दश चेत्यादाविति भा
वः अत्र दृष्टान्तानभिधाने सरूपे विरूपे तु द्वादशादावस्येव अत एव विरूपसंख्यावाचि दृष्टान्तानभिधानप्रतिपादके त्यदादिनः शेषे पुंनं
पुंसके त्यत्रैकशेषस्वरे नवानां नानामित्यपपाठः॥ विंशत्यादौ त्विति॥ संख्यापरिच्छिन्नसमुदायस्य प्राणानांतु संख्येयमात्रपराणां ब्राह्मणानां
विंशतिरित्यादौ विंशतिसंख्याविशिष्टो द्वौ समुदायो इत्यर्थप्रतीतेः विंशतिघटा इत्यु केचत्वारिंशतामप्रतीतेः चतुर्थ्युर्दषः प्रत्ययस्ये
ति वाच्यं योगविभागादस्यामित्यत्वेन चुंचुवादौ नेत्त्वमिति प्रकारस्य भाष्यानुक्तत्वेनायुक्तत्वं ध्वनयन्नाह यादित्वेनेति टीटं वाच्यमेवमे
वेत्वाभावदृष्टि वाच्यमं असिद्धत्वाच्च नांत्यत्वमिति पूर्ववत् बहिरंगासिद्धत्वादिति भावः॥ ननु सूत्रे चकाररूपवल्परत्वात् तत्र दृष्टांत्वे
पि प्रयोगे तु दृष्टंहत्वालोपाभ्यामेव तन्निवृत्तिर्वाच्येति कथं नांत्यमिति चेन्न व्यवसितान्त्याभावात् नन्वं नश्यति त्यस्य प्रतिपक्षितिर्वाच्ये
ति तृथ्योक्ति रयुक्तां अत आह अनन्तरापेक्षयेति एङ्ह्रस्वात् पंचम्यंतद्दृति नन्वेवमधिकतरादित्यादावतिव्याप्तिर्दुर्वारैवयस्मात् कृत
रादिभ्यातो वृद्धिर्विद्धितास्य आदियस्य ह्रादेशाकारविशिष्टस्य तस्य च ह्रस्वांतस्य तदादित्वेन ततः परस्यदकारस्य संबुद्धित्वे न सवहल्लं त्वे
ने त्तेचेत्वपरिभाषायां तदादिपदे बहुव्रीहित्वसत्वेपि विहितप्रत्ययप्रागभाव एव गृह्यते प्रत्ययेङ्गमित्युत्तरसूत्रे तत्सैव सूत्रभवेनार्था-

धिविघ्नुस्यात् तथाविधस्य च प्रकृते त्वसांगत्वाभावात् हलश्च ततः परत्वाभावात् अत एव न तत्र तत्र प्रत्ययग्रहणे [illegible] स्वरूपविशे
ष्यत्व[illegible]मिति न तद्विधिरित्युच्यते । उत्कर्षक तरादिपदस्य प्रत्ययांतेन सामानाधिकरण्यासंभवेन तस्य विशेष्यत्वासंभवात् । नन्वेवं प्रत्ये
शेतेन न तत्कर्यत्र सामानाधिकरण्यमिति चेदन्त्यादिबाधेन शब्दाभिकारस्वीकारादिति गृहाण यद्वोपस्थाप्य तरादिपदेऽर्थवानेवा-
न्यपदार्थः । अर्थवत्त्वाधिकारादिति न कापि दोषशंकालेशः विकरणांतस्याप्यर्थवत्त्वमस्त्येव कतरदित्यत्र तु दकाररहितस्य नेति प्रत्य
[illegible]स्य भाष्ये अपीष्यमाणं तत्र हि विहितविशेषणं ह्रस्वग्रहणं यस्माद्ध्रस्वात्संबुद्धिर्विहितेति विधीयते तस्माद्विहितं वा हुलकादपास
नेनिष्ठा ह्रस्वपदं तद्विशेषणं तेन तदंतविधिः यस्मात्संबुद्धिर्विहिता तस्माद्ध्रस्वांतात्परः संबुद्धेर्हल्लुप्यते इति सूत्रार्थः यस्माच्छुनेत्तुनयु
कम् [illegible]महे सहे गौरी [illegible]दाव्याप्तेः तद्वादीन्स्य[illegible]कार्यकत्वं ध्वनयितुं विहितेति प्रकृतापि प्रायकमुक्तमिति दिक् ॥ ॥स्पष्टमिति।
श्चयमेवा वाक्यस्य परार्थः एतदेव तद्विशेषणत्वात्तदंतविधिः अत एवात्रागमसंज्ञसूत्रानुपर्यासः ननु प्रकृतिमंत्र एप्रत्यया तुल्यत्वाते
गन्तद्भुत्यनिर्भवत्येवात आह किंचेति ननु सत्रिभुक्ति[illegible]पीनत्वज्ञानकेवेति न ज्ञापितज्ज्ञानेन तदनपेक्षणमेवात आह शाब्देति इति इ-
वाभुंजानत्वे सति पीनत्वमित्यर्थस्य तादृश्यानुमितिं विनापि विरोधग्रस्तत्वान्न स्त्रीके संभवत्यवसः प्रकृते तु न तथागमकमिति भावः ल
नुमदादेः परमेकवचनं संबुद्धिरित्यर्थोज्ञानेपि अपेक्षैवात आह अत एवेति ॥ न[illegible]गाक्षेपेणेति नन्वं गाधिकाराभावेङ्ग संज्ञासूत्रं स्या

यभावेन कथं तदा लोपं वदेदिति चेन्न अयस्येत्यस्याभावेपि हलादंगादि णः षीध्वमित्यादौ यर्थमंगसंज्ञा स्मृ अस्यावश्यकत्वात् । अंग वृत्ते
प्रकृतेर्विवक्षणाच्च दिगिति अनुमितस्य शास्त्रे [illegible]त्वाभावाद्विशेष्यविशेषणभावविनिबंधनतदंतविधेरलाभो दिगर्थः परत्वात्पूर्वविप्रति-
लोपे अपरनिमित्तकत्वेनांतरंगत्वाच्चाद्भावं न तु प्रतिपदोक्तत्वमस्य बोध्यम् ननु तत्वापि हलि संबुध्यवयवत्वस्यापि संबुद्धित्वे हल्त्वांतेऽप्य
त्वमित्युभयत्र आश्रयणमेवेति तत्र नदर्थकं कथं सिद्धिरित्यत आह तत्स्वीकारेपीति ममतु पौर्वापर्येणापेक्षितमिति भावः ॥ तत्तुस्यानिष्ठ
यरूपाति[illegible] न तत्संभवोऽत आह ताद्रूप्येति एतदर्थमेवेत्यस्यार्थमाह यस्येति असाधारणत्वनिवेशवादिमूले[illegible]मतेन [illegible]
ते मात्रनिष्ठेति प्रत्याहारपरामर्शेत्याया लोपश्च वलवत्या[illegible]द्द्वन्तु के रुकारनिवृत्त्या तस्य तन्निष्ठत्वमिति भावः अत्र पदस्य सार्थक्ये
[illegible]स्थानेति तद्रीत्यैव समाधत्ते विशिष्टेस्त्वनेति · त्वन्मते सुकारीत्याम ध्यगानुबंध तिस्ना वपिकः सुपद्वत्यादि निर्देशोन्यथानुपप
त्या आद्यंतपरामर्शयोग्ययोः प्रागनिवृत्तिरित्यस्यावश्यं वक्तव्यत्वत्या स्वपदेन विशिष्टस्यैव परामर्शात्तस्य विशिष्टे सत्वमिति भावः
॥ विशिष्टस्यैवोदेश्यत्वेनेति एवं च प्रकृते लुङ्वृत्तित्वेपि तस्य न तन्मात्रवृत्तित्वमिति हल्त्वस्यैवातिदेशो भवत्येवेति भावः ॥ तस्य संबु
द्धिभडा[illegible] अनल्विधित्वात् स्यादिति संबंध्यलमात्रनिष्ठधर्मोपि न विधित्वाभावादित्यर्थः स्वमतेपि सोरमित्यु[illegible] इति ध
मेः [illegible] नेवायद्वृत्तिकत्वादिदं तद्वदतिदेशो भवत्येवेति बोध्यम् ननु गुणस्य परनिमित्तकत्वेन बहिरंगत्ववत्तु प्रकृतिप्रत्ययसंबं

श्री॥ उक्तनिमित्तकत्वेऽमान्तरङ्गत्वमपीति उभयोरन्तरङ्गयोः परत्वाद्गुण एव स्यादत आह अंगाधीनेति एवं च तस्य तन्मात्रनिमित्त
कोऽप्यत एव । एतद्गुणेति सवर्णदीर्घत्वादिषु तु गुणित्वाद्वृद्धिप्राप्तिरिति भावः सामर्थ्यादेवात्रेति मत्वाहाग्रहणस्येति [illegible] कनत्वाभारो
ह चेत्तस्य सामर्थ्यस्याज्ञो योदेत यायं वार्यते नात आह गुणेति अत एव ह्रस्वांशे तदप्राप्तेरेव॥ असमुवलत्वेन परत्वासम्भवादाह
अभ्युच्चेति॥ [illegible] ककारेति येन नेति न्यायेनोत्सर्गमप्रवृत्त्युत्तरमन्वारितार्थ्येऽपि वाधः । तदप्राप्तियोग्यत्वं [illegible] योग्यताव [illegible] मामेवेति
मे ग्रहणमिति वेत्यर्थः । ह्रस्वस्य गुणे इकः पदोपस्थित्या रागेत्यत्र तदप्राप्त्या लोपस्य नानवकाशत्वमिति बोध्यं हिमानीति कुमारीत्यादौ
त्रिमात्रादौ चेत्यर्थः वाच्चेन्द्रमीत्यत्रानुवृत्त्यर्थश्चदीर्घे कृते परत्वाभावादाह विहितेति यद्यपि सकाररूपेणैव विशेषणं विनासं
भवः सुपः स्थितिस्तथापि सुपूरुषास्त्रियत्र त्यतद्व्यावृत्त्यैतदुक्तमिति बोध्यम् एतामिति अकः परो यः शस्तस्य नत्वपर्यन्तादेः परस्ये
त्यकारस्य नेसुपि चेति दीर्घसंयोगान्तलोपे रामानिति सिद्धावपि हरीनिति न सिध्येत् [illegible] मगान्तास्तुशो विहित [illegible] त्यर्थे तु येन नेति न्या
येन दीर्घबाधापत्तिः एतेन तु मिसंयोगान्तलोपे अकिं संयोगादिलोपे वा न दूषणमित्यपास्तं पञ्चमीसमासेनस्यानिवर्तनादीर्घ [illegible]
दे: प्राग्यात [illegible] कौण्डिन्यन्यायप्रवृत्तेः सुवचत्वात् वस्तुतः पूर्वसवर्णदीर्घोत्तरं तु [illegible] दादेः परस्य शसावयवस्येत्यर्थो न्याय्यः विहितेति तु
फलितार्थकथनपरं द्वितीयेत्यत्तं तविधिप्राप्तानि प्रसंगभंग॥ यत्वेति बोध्यम् अट्कुप्वाङिति व्यवधायकस्य पदस्य णत्वाद्धं [illegible]

रिक्तं तद्धितभिन्नपरत्वे इति वस्य मात्रास्य णत्वाश्रय प्रत्ययानिरिक्तेत्यर्थः ॥ प्रत्याख्यानेन फलाभेदायेति विषेधप्राप्तिरत्रेति बोध्यम् । ये
स्येषत्स्पृष्टत्वं कोति प्रसंगादुक्तं यथेमाह तत्रानुस्वारेत्यादिना ॥ ॥ उरः केति । उरसिकं यस्य उरः कायतीति वा विग्रहः अन्येन व्यवेति उकं युक्तयनंगीकार
यमर्थो न स्यात् न्यासेन सिद्धे इति न च चुटुतुटुत्यादौ क्तो मृत्त्वेत्यादावविवादर्शनेत्यादावपि णत्वं वारितं स्यादेवं चादर्शनेत्यत्र णत्वसिद्धमेवत्स्यनी
कमिति कुतो न स्यादिति वाच्यं चुटुतुएवमुक्ताकोपरिषाभ्यामिति पंचमीनिर्देशात् व्यवधानमत्रप्रासो णत्वैरवव्यवधानेभवति । आदर्शनेत्यत्राडा
दित्तहि न व्यवधानेन भवत्येवेति नियममुखेनावकुशक्यत्वादिति आहुः ॥ यद्वा शर्व्यवायेनेति शोभाष्यस्य नवर्गाद्यनुक्तौ उपलक्षणत्वयेवोद
येनैव्याख्यातेत्वेन मात्रपदविशिष्टन्यासेपि तात्पर्यं बोध्यं नैसम्बानिषेधप्रकरणे सचित्यं न भूइतिप्रकरणोपदेन व्यवाये चुटुतुलशर्मात्रेणेति
विधिप्रकरणे परत्वाभ्यामित्यस्यानन्तरम् आङ इतिपंचम्यंतस्य अधिकारः कार्यः शस्त्व अयोगवाहभिन्नेनानुसावचर्यात्रेवक्तिमिशब्दादा
वनयणिजतायि पिशब्दपरान् शब्देन षष्ठीसमासे शसि अल्लोपेकृणः पश्येत्यत्र शरान्व्यवायान् णत्वं न स्यादिति फलभेदो न अत्र न्यासेणको
नविंशतिमात्रैः विषयेनिर्वा यथान्यासे सप्तदशमात्राः नुमग्रहणत्यागेपञ्चदशवादृत्तिगौरवमभिप्रेत्य गुरुन्यासेत्युक्तं मा येकल्पेतुमत्रपदाभावेनपञ्च
दशनात्लिथ्यागुर्विन्यस्य लघुभिन्नेत्यर्थ इति न दोषः प्रतिपत्तिगौरवादस्येकदेश्युक्तित्वम् ॥ प्राप्तिरेवेनेति नतु निषेधमुखेन प्रवृत्तिरितिपक्षे सर्वायणत्वं
भवति भडादिभिन्नेराक्षरसमाम्नायिके व्यवायेनेत्यर्थात् प्राप्तिरेवनेति स्वसिद्धं नभूतेविधिमुखेन प्रवृत्तिरितिपक्षेतु प्राक्षरसमाम्नायिकातिरिक्तैः व्यवायेणत्वभ

वति अंड्वादिभिन्नैराक्षरसमाम्नायिकैर्व्यवायेनेत्यर्थात्· प्राप्तिरेवनेति· स्वसिद्धांतभूते विधिमुखेन प्रवृत्तिरितिपक्षे तु आक्षरसमाम्नायिका
तिरिक्तैः व्यवायेण णत्वं भवति· अडादिभिर्व्यवायेणत्वंभवतीत्येव अर्थात्तस्य चात्र सत्वात्प्राप्तिरस्त्येव किंच व्यवायेपीत्यनेन कृ चेन्न पाक्षे शास्त्रा
पत्तिरेवाक्षरसमाम्नायिकाऽनुमत्याव्यवायसत्वादिति चेन्न अट्कुप्वाङ्·नुम्व्यवायेपि पूर्वत्रव्यवायेपीत्यपकृष्यते रषाभ्यामव्यवहितपरे
स्य अडादिव्यवायेणदृत्यर्थात्· रषाभ्यामव्यवहितपरस्यानाक्षरसमाम्नायिकव्यवायेदृत्यर्थात् चेव्यवायेपीतिसूत्रे पूर्वसूत्रानुवृत्त्या
मृगणीप्रादेनिषेधः पूर्वोक्तवार्तिकमतेप्येवं सत्वेन तदादित्वितिशेषोपादानकथनमितितु चिन्त्यं प्रत्याख्यानेति· न्यायप्रवृत्तौ तु एतद्भेदात् न
स्यादिति भावः ॥ तस्मात्प्रमुख्यः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते प्रधानस्योपकारे हि तथाभूयसि वर्तते इति न्यायशरीरं यस्मात्प्रत्ययः
प्रत्ययोविधीयते तत्प्रत्ययोपश्लिष्टं तदादि अंगमित्यर्थे न सिद्धे परिभाषोपस्थितिर्मुधा परनिमित्तकत्वं तु परसप्तम्याप्यसंदेहेन सुलभ
मितितु न वाच्यं वक्ष्यते असिद्धत्वेनेति स्यादेवत्वं तु नोक्तम् पदसंस्कारे आदिष्टादचः पूर्वत्वात्· वाक्यसंस्कारेपि तन्नात्तोवपिद यद्धि
नपदान्तेनिषेधात् नातिरिक्तेति विकारस्थानमतिरिक्तत्वं तु न तेन जहिविंशकादेवसिद्धत्वं स्पष्टं चेदमुद्द्योते यत्तुशब्दरत्नेभूयो
पाततांऽव्यापकधर्मावच्छिन्नेत्यादिनाक्लिश्यन्ते तन्मुधैव व्यतिरिक्तस्यैवाभावेन दोषलेशाभावात् ॥ ननु समानाश्रयत्वमसिद्धत्वा
श्रयशास्त्रसंबंधिनिमित्तानां न्यूनातिरिक्तकार्यनिमित्तानामन्यतरकत्वमित्येव्यस्तु मास्तु च विधिग्रहणमत आह । नन्वनीति

सिद्धांतेपिमिदं चर्त्र विधानमाश्रित्यांगत्वंदुर्वोरसितिभाव्यम् तेनाचः परत्वस्याद्दात्तस्यज्ञापनेपिप्रत्ययस्यापूर्वबोधकाभावात्। अत
वभनक्तीतिभाष्यप्रत्युक्तं भूसुवोरित्यत्तसिंडो त्यनुवृत्त्याऽऽने मुगितिसूत्रेभाष्येस्पष्टत्वयादीर्घवारणेत्तुस्त्रीई पश्यन्तीत्यत्रैव स्त्रीशब्दस्य
चसंज्ञापनिर्वोध्या ननुविकरणान्तेदीर्घआरंभसामर्थ्यात्सिद्धः नचयायामीत्यादौयङ्लुगंतेपुत्रीयामिवोभूयामहेचि· कीर्षामीत्यत्र श
विकृतादेशस्याभवत्वेनांगत्वेचचरितार्थइतिभाव्यम् आंग्यस्यछन्दोविषयत्वात्· अन्येषुसुकृद तिङ्सूत्रीयभाष्यरीत्याभावेकादेशः
स्यस्थानिवत्त्वात्· प्राप्तिरेवनेत्यतआह॥ करोमीति· ऊठ्यांतीयफलप्रदर्शनमप्युक्तरीत्याऽस्थचिग्रस्तंवोध्यम्· चतुप्रत्ययेङ्·मि
तीयत्नेवंसिद्धे पदत्रयकरणाद्विहितपदाध्याहारेविधेग्रहणंमुधैवेतिचेन्न॥ प्रत्यासत्तिप्रतिबंधेनप्रत्ययसेदं एवप्रवर्तते मेन-
चारि[illegible]पात्· पदत्रयस्यफलंतुहरिभवामीत्यत्रदीर्घः केवलेनेतिबोध्यम् टाङ·सि· अंगाधिकारेपाठोव्यर्थः स्यादितिउ
फलद्वयसिद्ध्यर्थमावश्यकपरिभाषाद्वयसंचारेणैवानंगादंतसटेत्त्यादिव्यावृत्तौसिद्धायांविभक्तिविपरिणामेनात्रव्याख्यानंतव
निष्फलंस्यादितिभावः॥ अंगनिमित्तेत्यर्थेतुनतयोरावश्यकसंचारकत्वम् संचारेतुपाठोनकार्यइतिस्पष्टंभाष्ये· एतेनत्तेआश्रित्य पूर्वेयष्ये
स्य भाष्येसिद्धंअतेतितत्वेनत्तदापादनमसंगतंस्यादित्यपास्तम्॥ ङेर्यः॥ संप्रसारणेद्वत्यादिनिर्देशस्योभयोरग्रहेज्ञापकत्वं संप्रसारणे
इतिपररूपेणावृत्तुर्थ्यन्तमेव कष्टायेति सप्तम्यंतमेवेत्यपिवक्तुंशक्यत्वेनसप्तम्याएवग्रहाभावेनतत्त्वासंभवादाह व्याख्यानेतितच्चसर्व

नाम्नः सैस्मिन्नौङः सः स्यादित्येव सिद्धे ङिग्रहणास्वरूपप्रतिपदोक्तरूपम्॥ चेत्यन्ये उपजीव्येति न्यायानाश्रयणे लिंगं नुट्द्वाविंत्यादि शः य
णुवा चिह्नस्वश्चेत्येव सिद्धे ङितिह्रस्वश्चवामीति सूत्रद्वयं लिंगं तद्धि मूणामित्यादौ नुडर्थं नुटि अजादित्वस्य विनाशात् सिद्धि नु॥ स्वामी त्युक्ते
स्यात्वं पुक् ङियोरिति न्यायेन औपदेशिकसन्निपातविघातसत्वेन चारितार्थ्याभावात् अचीत्युक्तेपि सामर्थ्येन परिभावाबाधाच्च
नृं विहंतीति ननु यादेशेनैव सन्निपातनाशात् दीर्घस्य कथं तद्विघातकत्वमिति चेन्न॥ तेन पूर्वापरीभावसन्निपातविघातेपि अदंतांगे
ति विहितस्य सन्निपातस्य सत्वेन दीर्घस्य तद्विघातकत्वात् सन्निपातलक्षणप्रवृत्तेः प्राक् अव्यवहितोत्तरं वायः सन्निपातः एतदन्य-
तरविघातकस्याभिमित्तमित्यर्थस्य तिस्तृत्याद्यनुरोधेनावश्यकत्वाच्च। यत्रादित्वेति एवं च परनिमित्तकत्वेन तत्प्रमेति भावः एव
मुक्तिस्त्वधिकांपत्तत्वेन बहिरंगत्वमिति मतस्यापास्तत्वेन तत्र शुत्वनाय नात्रेति एवं च विघातरूपविशेषणज्ञानाभावेन तत्कर्तृत्वरूपविशेष-
णज्ञानाभावेन तत्कर्तृकत्वरूपविशिष्टज्ञानासंभवात्तत्प्रवृत्तिरिति भावः॥ अत्रासिद्धत्वं षाष्ठ्यानपरिभाषाद्दृष्ट्या अन्तरंगत्व
स्य दुरूपपादत्वात् परिभाषाद्दृष्ट्या सिद्धत्वेपि परेशाद्दृष्ट्यासिद्धत्वन परिभाषाप्रवृत्तेर्दुर्वारत्वाच्च षाष्ठवहिरंगपरिभाषायां बहिरंगशुत्वस्य
पूर्वत्रासिद्धत्वेपि अन्तरंगत्वेन त्स्याप्यासिद्धत्वेन पयोडादौ बहिरंगासिद्धत्वस्यैव यं संनिपातविघातकं प्रत्यस्तित्वं निमित्तं माभूयादुक्ति
तदर्थादिति बोध्यम्॥ वस्तुतस्तु॥ अन्तरंगत्वस्य सत्संबंधिकत्वेन तज्ज्ञानाय बहिरंगत्वज्ञानस्यावश्यकत्वेपि संनिपातलक्षणत्वग्रहस्यानि

घातकत्वग्रहाप्रयोजकत्वेनेह तेषां नहे तु इति भावः ननु पूर्वं रेत्यस्यैवास्या अपि अन्तरंगत्वाद् बहिरंगत्वेनैवार्थवदित्यत आह किं चेति
स्थानिवत्त्वेति आनुमानिकेन संनिपातलाभ इति भावः श्रौतेन संबुद्धित्वं तु न अस्त्वविघातित्वात् ननु दीर्घो पुनरमतिदेशप्रवृत्त्यात द्भावेऽपि प्र
वृत्तेः प्राक् परिभाषया प्रतिबध्येतेति नासंगतिरिति चेन्न प्रवृत्तेः प्राग् विघातकत्वासंभवेन यत्र तद्विघातकत्वं भावीत्यर्थावश्यकत्वेनाति
देशेन तत्र तद्विघातकत्वाभावात् अशास्त्रीयेति नास्यनिवृत्त्वादिति भावः तेनादेशप्रयुक्तं कारणं यत्तद् प्रवृत्तिर्बोध्या तत्रासिद्धेति
अशास्त्रीयविघातकत्वाभावीत्यादिव्यवहारे इत्यर्थः स्पष्टं चेदमीदृग्लक्ष्ये प्रदीपे। बहुवचने। रामाभ्यामिति। सुपि चेति तु राम ये इत्यत्र साव
काशं पर्युदासेन ह्रस्वस्याभावे अपवादः इवापि कृतेभ्य इत्यसिद्धेभ्य रामइतितु न प्रत्युदाहृतं रूपान्यथेन कष्टसिद्धेः पूर्वोक्ति
दुष्टत्वाधिकं तु इत्यादिनिर्देशाद्बोध्यः नुमापत्तेरिति पंचमीसमासेन स्थानिवत्वेनोभयोर्नित्ययोः परत्वान्नुमापत्तेरिति भावः अ
न्तरंगत्वात् गुणाद् इति तु न वाच्यम् इकि तस्याप्यनित्यत्वेनाप्रवृत्तेः अन्यथैकोऽसिद्धत्वात् गुणो न स्यादिति यद्वा वार्णादांगं बलीय
स्त्वात् सा वा त्वय विषयेऽपि अत एव सत्रुक्तनिर्देशेन तद्वनित्यत्वज्ञापनं संगच्छते उभयोरादेशत्वे एवेति इत्यत्र बहुलग्रहणात्
तुरमेद्भावादेशत्वस्यागुणाद्इतिगुणापत्तिर्बोध्या उभयोरादेशत्वात् इदृपक्षे एभ्य इत्यत्र हलि लोपानापत्तिर्बोध्या ॥ नाद्भिन्नइत्यत्र अमनो
रमायां यथिरायं परिहरति इति शेषइति यत्तु जस्त्वचर्त्वे इति हेतुहेतुनैव शेषसंभवस्तत्र तु जशत्तु अचर्त्वे इति सिद्धं वेति यत्र पूर्वं तत्त्व प्र

वृत्तौ परिनिष्ठितरूपे विशेषः तत्र जस्त्वं प्राक् प्रवर्तते नैन वाध्यवाधकभावः तेन रत्नमुडादौ न दोषः अन्यथान्तरतम्यात् चुर्त्वे नृष्ट्स्यघए
वस्यातः जश्शित्यादयः षट्त्वौ षट् इत्यादिनिर्देशाश्च हलिंगमा॥ एतेन णत्वं द्वित्वं च तुर्णामित्यत्रत्यस्वग्रंथविरोधश्चर्त्वस्य जस्त्वापवादत्वा
दित्य पास्तम् तथाहि पूर्वत्रासिद्धमद्वित्वे इत्यस्य वर्णद्वित्वे प्रवृत्तौ चर्त्वस्यासिद्धत्वात् गस्यैव द्वित्वे ऽत्यस्य चर्त्वे पूर्वत्रेगाश्रवणाधि
त्तिरितिहि॥ सर्वोक्तं तत्र च पूर्वजस्त्वगकयोः श्रुतिः अपवादविषयतया तदभावे कुत्वनिष्पन्नकस्यादेत्वेकद्वयश्रुतिरिति परिनिष्ठि
तेव मते विशेषः वर्णद्वयतत्प्रवृत्तौ तु परेषामसिद्धत्वात् कुत्वे जस्त्वापवादत्वात् द्वित्वापेक्षया परत्वाच्चर्त्वे द्वित्वमिति प्रक्रिया
एवं गकारे जशि चेर्त्वमिति तदुत्तरग्रंथो ऽपि न विरुध्यते द्वित्वकृते ऽपीत्यर्थाभावे एकगश्रवणारूपविशेषस्य सत्वात् सिद्धा
ते तु पूर्वमेव चर्त्वमिति प्रक्रिया वोध्यात्रिपाद्यां तत्र कौंडिन्यन्यायस्तु प्रवर्तयिष्यते अदनूसूत्रे इति तत्रैव समर्थयिष्यते त्रिपाद्यां तन्न्यायप्र
वृत्तौ यत्तु भाष्यं विरुध्यते तदनित्यत्वेन समाधेयम् परं तु इदं मनोरमाकारा शयवर्णनमात्रं वस्तुतः षड्भिनिर्देशेन वाधकत्वे तापनमेव
लघु इति दिक्॥ जस्त्वापवादत्वादिति· ननु प्राचीनमते ऽभेदविवक्षायाम् अपि सत्वे नर्पदत्वाभावे चर्त्वे सार्थकमिति वाच्यमिति चेन्न· यद्य
नुभेत्तिवापदांतस्येति· पूर्वोत्तरसाहचर्येण तत्प्रकरणस्य पदानवयवे ऽप्रवृत्तेः न्यासादिति· फलाभावे ऽपि प्रवृत्तौ वाधकाभावादिति भावः
। पूर्वग्रंथे ऽस्य फलविशेषाभावे प्रवृत्तौ न वाधकमित्येव तात्पर्यम्· ननु न प्रवृत्तौ वाधकमिति तानि नत्तद्विरोधः। मूले प्रयत्नभेदादिति तु प्र

यत्वेमिदेपितएवस्यात् नंतुसः सुकृश्यस्याभेदघटितत्वेनसकारस्यसदृशतमत्वाभावात् अतएवेति आंतरतम्यपरीक्षायामभेदघटि
तस्यापिसादृश्यस्यग्रहणादेवेत्यर्थः एतेनपाक्षिकसकारनिवृत्त्यर्थंतद्विधानमित्यपास्तम् नचैवमपिवत्स्यतीत्यत्रपक्षेद्वि
तीयादेशार्थंतद्विधानमितिवाच्यम् बहिरंगपरिभाषयासंनिपातपरिभाषयाचसिद्धांतेपितस्याप्रवृत्तेः यद्वासः सिअंतरतमोस्मादेशादु
त्येवतत्कारेलब्धेतकारानुवृत्त्यादेशविधानंज्ञापकमुक्तार्थस्येत्यर्थः ननुसर्वथासूत्रेनकर्तव्यमिति अव्ययमिदंसूदिसमासतविधाना
ज्ज्ञापकादित्यस्ययथावस्थापि तथाऽत्रैवेतिनचात्रकल्पनेनानुवृत्तिर्हितीयादेशाभावायेतिशंक्यं चर्त्वेनैवसिद्धेःसूत्रस्यैववैयर्थ्यापा
तेः तदेतदभिसंधायोक्तं चर्त्वेनसिद्धाविति यद्वातादेशारंभेहेतुत्रयम् सर्वथातकाराप्राप्तिःपाक्षिकसकारनिवृत्तिः द्वितीयादेशानु
वृत्तिश्चेति तेनायस्यन्याय्यत्वेनोक्तम् अतएवेति यद्धंसंवैकारोप्यर्थंइत्याहुः ॥ ह्रस्वनेयापः बहुवचनमेवेति तद्धितस्यसानुबंधक
त्वात्कामप्रत्ययादितिविहितस्यापिनफलाभावात् तथाहि अदन्तेनित्यत्वादल्लोपः इगंतेपरत्वान्नित्यत्वाच्चगुणः णिजन्तेनित्य-
त्वादयादेशइतिह्रस्वांशेनफलंनयंतेपिपरत्वात्गुणेवर्णसंज्ञापक्षेऽप्राप्तिः तदंतसंज्ञापक्षेपिसकृद्गतावविति न्यायेननेतिनतत् —
आवंतास्ताचारक्विपोऽनभिधानमेवतस्यात्र ग्रहणेपिनदोषइतिप्रक्रांतसूत्रभाष्यादिस्पष्टमुद्द्योतेइतिभावः दीर्घोदीर्घेति दीर्घोने-
त्यर्थः ननुदेहश्रेयसीत्यत्रपुंस्यपिनदीत्वस्यसत्वात् खट्वायाअः खट्वाः इत्यादौपुंस्यप्यावंतस्यसत्वात् कथंस्त्रीत्वलाभइतिचेन्नवा-

स·भ·
९४

पिव्यभिचारेण दीर्घोत्तत्वलाभो न स्यादित्यत आह नदीत्वाद्वयोर्ह्रस्वेपीति तदंतसंज्ञापक्षे उभयत्रापि तदंतपरत्वाबोध्यः· नामि चर्मणा
मिति· ब्राह्मणाभिस्सेति पूर्वोक्तोदाहरणपरभाष्यरीत्येदं प्रयोजनम् अर्थवत्परिभाषयात्र द्वारणे तु नामधातोः क्विपि नैवं दत्तनामिन्य
त्रफलं बोध्यम् अरनामिति निर्देशेन प्रत्ययस्यैव ग्रहणेन तदादेरेव दीर्घ इति न शंक्यं न आम् अनाम् इत्येवमपि निर्देशोपपत्तेः॥ ॥षट्
चतुर्भ्यश्चेति नवम्योपद इति नु चितं भाष्यस्योदासीनत्वात् मंडूकानुवृत्तेर्निष्फलत्वात्॥ ॥संख्येयविशेष्येति मुख्यविशेष्येत्यर्थः तत्वं प्र-
त्यार्थनिष्ठविशेष्यताभिरूपकविषयतानाश्रयत्वं यस्य संख्यावाचकत्वं स स्वपदार्थः तेनतः प्रियपंचानइत्यादौ दोषः नन्वेवं त्रि
दंडिन इव त्रयः पूषाणः इव त्रयः पंचइव त्रिदंडिनः त्रिपूषाणः त्रिपंचानइत्यादावुपमितसमासेऽतिव्याप्तिः समर्थसुषड्यंगत्तसंख्या
भिधायित्वाभावान्नप्रसंगोनेति चेन्न परमकतरवदिष्टत्वात्। अन्यथा कतिनक्षाणइव कतितक्षाणइत्यादौ तत्रापि समर्थशैवस्यात्
षड्भ्य इत्यस्य प्रवृत्या एकत्र षष्ठ्यर्थे पंचमीस्वीकारेण षड्भ्यः परयोः षड्वर्थगत्तसंख्याभिधायिनोरित्यर्थः एवं चेमं हित्रापि च शकुमय
इत्यत्रापि समम नसेति चेन्न· कतिपंचेवेति कतिपंचानइत्यादौ नम्· दार्ढ्यात् उभयत्रापि षट्संज्ञकः शब्दः प्रत्यासत्या [illegible] वे
देवं रीत्या तत्परिहारस्य मयापि कर्तुं शक्यत्वात् तथाहि लोके संख्यावाचकत्वेन प्रसिद्धशब्दप्रकारकसंख्येयमुख्यविशेष्यकप्रती
तिजनकप्रत्यासत्याः प्रकारभूतशब्दावयवनकारान्तेति सूत्रार्थः एवं च दशपंचेव दशपंचानइत्यादावपि न मे तिदिक्॥ विहितविशे

रामः
९४

षणमिति परमषद्वित्यादेरनभिधानमेवेति तत्स्वरूपमिति सूत्रस्य भाष्यविरोधः तत्र हि षां तस्य षट्संज्ञाविधानं शब्दस्वरूपस्यास्त्री यत्संज्ञायां
शब्दस्वरूपापन्नेऽर्थे ज्ञापकमित्युक्तं विहितविशेषणे तु तदभिधाने फल भेदापत्त्या तदसंगतिः स्यादिति स्पष्टम्॥ अप्राप्तेरिति। इदं चान्यरी
त्या स्वमते तु तत्रापि परिभाषाप्रवृत्तिः स्फुटैवेति बोध्यम्। नोक्तमिति दोषाभावात्। शास्त्रेऽयमेव तु टूकर्तव्यः अन्यत्र निटोनटोर्वृत्तिभावः॥
लिंगादिति॥ प्रकृतसूत्रे भाष्ये स्पष्टमिदम्। एतेनाचक्षाणाणिचिरिलोपसार्थक्यमित्यपास्तम् तदनभिधानात्॰ अनुवृत्तावेवेति। अन्य-
था मुख्येत्यादावपि न स्यादित्यभिभावः सर्वादीति तद्गुणत्वे बीजमाह अवयवेति। एवं चान्यपदार्थस्यायं संयोगसमवायान्यतमसंबंधित्वा
न्नत्वमितिभावः न्यायसिद्धत्वात्सर्वेषामिति निर्देशानुधावनं न कृतं तेनैतत्साध्यं सर्वशब्दघटितत्वम्। अन्यपदार्थस्योभयसाधारणत्वा
त्॥ निपातनान्नेति। लोकेपीति शेषः। अस्य संमतत्वाज्ज्ञाप्यार्थकस्यापि अग्रोर्गुणद्वत्वादेरनादरसत्। तत्संमतिमाह मधीजनेति एकदेशयुक्ति
रिति यस्तु विहितविशेषणाश्रयणसामर्थ्यात्सर्वनामपदे योगरूढ्यंगीकारेण सर्वार्थवाचकसर्वनामसंज्ञकसर्वादेर्विहितेस्यट्डेः सें
द्रत्यति सर्वादौ न दोषः द्वितीयस्यापि सिद्धान्तयुक्तित्वं समर्थयांचक्रे स एवं वक्तव्यः मासपूर्वायेत्यादिव्यावर्त्यासार्थकस्य तस्य क्लसाम
र्थ्यमिति महासंज्ञयैव तत्सिद्धौ विहितपदाध्याहारो विफलद्वत्वरुच्येवाग्निमभाष्यस्य तथापि व्याख्येयत्वात् मूलतोऽधिकं किं परः का
न्तंच येतिच॥ संख्याकारकाभ्यां पूर्णेति। संख्याकारकाभ्यां पूर्णो योर्थः तस्येत्यर्थः। गमकत्वात्समासः। अन्वयेनेति। अयं सुवंतान्नदुन्ये

नौहेतुः द्वंद्वं चाकच् विधौ विभाषा सुपद्वत्वात् ततः सुपद्वत्यस्य संबंधेपि वाक्यभेदेन युष्मद त्वद् प्रकृतिक सुबंतस्य टेः प्रागकच् विधायकमि
त्याशयेन यद्यपि त्वकच् स्त्री यशोस्वरोक्त रीत्या वाक्यद्वयेपि संबंधः सुबंतावयवसर्वनाम्नः टेः प्रागकजिति व्याख्यायां तदसंपृक्तेव सुबंतात्तदु
त्पत्तिः त्वमकत्वं तत्वमुभयशब्दे स्फुटीभविष्यति सुबंतादिति ल्यप्लोपे पंचमी। सुबंतं संपाद्येत्यर्थः उत्पन्ने विभक्त्यंत्यस्याग्रे कर्तव्यात्वादिति शे
षः। यथाश्रुतं तु न युक्तम्। उक्तभाष्यात्। सुबुत्पत्त्यनंतरं तदुत्पत्तिलाभेपि देशविशेषस्यालाभात्। घकालेत्यादिना तस्त्रामेपि अकच्चिदन्ते
तद्विधानात्॥ एवमग्रेपि॥ सर्वनामप्रकृतिकसुबंतादिति व्याख्येयमिति न तदसंगतिरपि। प्रागकजित्यस्याग्रे कर्तव्य इति शेषः॥ दृत्यर्थो नंद
तेति नन्वेवमपि सर्वके इत्यादौ सर्वार्थकुत्साद्यबोधयिषायां किमादेरकच् दुर्वारः। न लक्षणार्थसर्वनाम्नः टेः प्रागकच् प्रकृत्यर्थेकु
त्सायामिति प्रत्यासत्तिरावश्यिके तिन्नयेव तदंतसंज्ञाभावे तदसिध्युपपत्तावयं प्रयासो विफल इति चेन्न। भवत् शब्दाभासुवनुत्प
त्तेः त्वं तत्स्वार्थिकेकनिभवदर्थकुत्सा विवक्षायामकच् नेत्यस्य फलस्य वक्तुं शक्यत्वेन सुवचत्वात्॥ प्रसिद्धिरिति समासार्थकुत्सावि
वक्षायामसिद्धिरिति भावः नन्वेवं भवतक त् शब्दे न समासे समुदायकुत्साबोधकोऽपरोऽकच् स्यादित्यापत्तेः एतेनान्तरवर्तिसुपो सुबंतत्व
मादाय तत्सिद्धिरित्यपास्तम्। एवमेवेति सर्वनामप्रकृतिकमप्रमीपंचम्यंतात् त्वत्तसिलादिविति तदसिद्धिरिति भावः॥ एवमभवकतृभ्यामि
त्यादौ नञ्समासे पूर्वपदप्रकृतिस्वरेऽकचि अंतोदात्तत्वं सिध्यति अन्यथावयवादुत्पत्त्या स्वरद्वयं स्यादिति बोध्यम्॥ ॥चरितार्थमिति

॥ इदेचेतिनिषेधस्तु विशिष्टस्य स्वांगशिदामिति प्रकृतिस्वरोकजनिषेधकत्वेन कृतार्थः स्यादिति भावः। इदमुपलक्षणं परमसर्वेइति
नदं न संज्ञोदाहरणपरं भाष्यस्य। वस्तुतस्त्वंगसंज्ञकादवं न सर्वनाम्नः परस्येति सर्वत्रार्थइति न कापि विहितविशेषणम्। अत एव सर्वना
म्नः परस्यामइति तस्मिन्निति सूत्रे भाष्ये उक्तमित्याहुः परे त्विति। अत एव काणेति। यद्यपि नानुबंधकृतमनेकाल्त्वमित्यस्य सुधंभाव
योग्यतानिवेशफलं न। तथापि वक्ष्यमाणभाष्येणोत्संज्ञायोग्यत्वमेवानुबंधत्वमिह स्पष्टमेवेति बोध्यं तेन न तु लक्षणांतरकलमुक्तमिति न
दोषः। अनुबंधेति। तत्त्वज्ञानेत्यर्थः। एवमग्रेपि बोध्यम्॥ विकल्पइति॥ ननु दधातीत्यत्रान्तादेशद्वात्रापि प्राकृ विकल्पो न स्यादिति चे-
न्न अप्रगृह्यादि विषयेस्त्री यासच प्यमाद्यप्राप्तविकल्पनिवृत्यासार्थकेन नापवादेपीति न्यायविषयतया दधातीत्यत्रात्र वैयर्थ्यात्
अत एव तत्त्व परिभाषेंदुशेखरविवृतिसंग्रहे स्पष्टम्। ध्वनितमिति। तत्र हि डाकारस्य शित्त्वं कोर्थमित्याशंक्य [illegible] नित्यत्वाभावात्स्थ
ह त्वाकाराद्युदाहरणम्॥ अन्ये शितउदाहरणे शिश्याविन्युक्ता आनुपूर्व्यादनेकाल्त्वात्सिद्धमित्याशंक्य नानुबंधेति ज्ञापनेन सार्थकत्वमु
क्तम्। वस्तुतस्तु न्यायसिद्धत्वेनानित्यत्वादित्येव सिद्धांत्युक्तिः। न्यायसिद्धे तद्भाष्यविरोधेन प्रश्लेषप्रयुक्तगौरवेण च तत्र तादृशतद्ग्रह
णे फलाभावाच्च तद्भाष्यमेकदेश्युक्तिः। अत एव परस्मैपदानामिति सूत्रे भाष्ये नित्यत्वादेव णलः सर्वादेशत्वं साधितं न तु प्र
श्लेषादपि परिभाषाज्ञापनं तु युक्तमिति निर्देशेनापि सिद्धं शित्ग्रहणं च न कार्यमिति तदाशयमाहुः। विभक्तित्वेत्यस्येति। यद्यपि

रषतीत्यादिवदिदमपिलक्षणांविनैवसिध्यतितथापिस्थानेंतरतमइतिसूत्रोक्तभुक्तवंतमितिन्यायविरोधात् अर्थैकत्वमुक्तम्
तद्धीत्येदमितिनोक्तदोषः॥नित्यशब्दोऽवधारणार्थइत्याह एवेति अनेनसजातीयवचनस्यव्यवच्छेदाद्वाचारिकंभवत्येव·अर्थैर्थ
रत्वेएवायंनियमइति· शब्दपरत्वेतुभाहिन्यादिभवत्येव·नचसुवंतेति।अयंभावः त्वयकामयकेत्यादिसिद्धयेविभाषासुपइतिसूत्रा
इकचविधौसुपइतिसंबध्यते·तथाचायमर्थः युष्मदस्मद्प्रकृतिकौकारसकारभकारादिसुबंतस्यटेःप्रागकजितिाकःसुवंतावयं
वसर्वनाम्नःष्टेःप्रागकजित्यपरःएवंचसुवंतस्यप्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वात्प्रकृतित्वस्यष्टमेवेति·।एतेनसुवं·
तादकच्चिउभांप्येकामितिरूपेणविशेषस्यसत्वेनस्वरंपर्यन्तानुधावनंव्यर्थमोकारसकारभकारेत्यादितुयुष्मदस्मद्विषयिकमिज्ञपा
समाकिंतुप्रकृतेरितिव्याख्यादिप्रकृतेरित्यर्थः॥सुवंतात्परइत्यस्यसुवंतंसंपाद्ययतःकुतश्चित्परइत्यर्थः।यथाश्रुतंतु नंयुक्तंन्यायाप्रा
ध्यत्वात्·अकच्विधासंभवात्॥प्रातिपदिकस्येवेति।अकचसूत्रीयशेस्वरस्तुस्वरूपकथनपरःननुद्वितीयवाक्येनतत्संबंधपरइति
नतद्विरोधः॥अतएवकप्अकचोःकोविशेषइतिभाष्यंसंगच्छते॥यत्तुअकजविधौउइत्योगेउक्तम्·।उभयंप्रश्नानमितिप्रश्नेकेएपा·
द्वायप्रातिपदिकाधिकारात्सुबंतसामर्थ्यादितितच्चिंत्यम्॥इतिविशेषइति।यत्तुप्रकृतनसूत्रेउइत्योतेएवमज्ञातेभयोर्घटंइत्यर्थेऽक
च्ययचिउभकयइतिरूपंकेअयचिउभयकइति· कस्यद्विवचनेउभकइतिवास्यादितिरूपेविशेषइत्युक्तंतत्तुदत्तोक्तनायामयधि·

ति·प्राचीनवासनयाऽरतिर्विषयेपूर्वमेवसद्इतिसिद्धान्तेतुसर्वथोभयकघटावृत्त्येकमेवभवितव्यमितिविशेषाभावःस्पष्टएव अतएवतद्धिशंक्यानु-
क्तिरत्रग्रंथे आदेशपक्षेतत्प्रयुक्तानिकत्वेनायचः तद्विकल्पनेनैववाक्यसिद्धौफलाभावेनमहाविभाषायाअसंबंधःसिध्यति·प्रत्ययान्तरत्वप-
क्षेतदसंबंधार्थंतत्स्यादतआह·पृथक्त्वेनेति·व्याख्यानंसंबंधावश्यकत्वेहेतुः। अन्यथाफलभेदेपक्षभेदासंगतिःस्यादितिभावः अयोग्यस-
दिति। द्वितीयसूत्रस्थवेत्यस्यास्वरितत्वादसंबंधमभिप्रेति॥ ननुकारकमनोरमायांवस्तुतस्त्वित्यादिनाऽदृष्टोक्तायामयजित्यर्थलाभेनोभ-
यतः। उभयत्रेत्यादाविवेतिदृष्टान्तासंगतिः अन्योन्याश्रयापत्त्यात्वलादेरेवानुत्पादप्रसंगात्· सत्यप्ययचित्त्वलादिन्यावृत्तिः संख्यां चत्वला-
दिव्यावृत्तावयजितीत्यतआह· अयंत्रेति· कारकमनोरमाग्रंथस्तुप्राचामनुसारीति। नतद्विरोधइतिभावः। ननुउभंशब्दस्यायचिकृते
सर्वत्रैवद्विषयत्वाभावेसंभावनायायचविनासंभावनेत्युच्यतेतदोभयतउभयत्रेत्यादावपिनस्यादतआह।उभयशब्दस्येति। द्विव-
चनेति॥ तच्चोभशब्दप्रकृतिकमेवेतिनाग्रहः॥ तेनपरमौभौ उभौभौइत्यादौसमासप्रकृतिकेपितत्रनायच्प्रत्याख्यानेद्विवचनशब्द-
ग्रहणेनतदर्थस्याभिधानारंभेपितथैवोचितत्वात् उभयशब्दादुत्पन्नंद्विवचनमिति· मनोरमाग्रंथस्यतुतदंतादित्यर्थइतिबोध्यम्·वि-
षयत्वंचपरत्वं· नन्वेवमुभावित्यत्रप्रक्रियायामेकादेशतःप्राक्तस्यतत्परत्वसंभावनायामपिपरिनिष्ठितेतदभावस्यापिसंभावन-
याऽतिव्याप्तिर्दुर्वारेतिचेन्न। तद्विषयत्वसंभावनाभावस्यविवक्षितत्वात्· विषयत्वविषयिणीअभावप्रतियोगिभूतासंभावनेत्यर्थात्॥

स·भ·
९८

त्तुकाचानुत्पत्तिरेवेतिनतत्रापिसंभावनेति· वोध्यम्।यद्वोभौसाभ्यासस्येतिनिर्देशेनस्त्रोत्तरत्वस्यावयववत्त्वान्यतरत्वधर्मेणसद्विशिष्ट-
त्वमेवतद्विषयत्वंपर्यवसितंनविवक्षितमितियथाश्रुतमपिसाधुः।अलुकीति।यद्यपिद्विवचनबहुवचनयोरलुकुनेति।अलुगुत्त
रपदइतिसूत्रभाष्यात्प्रतीयते·तथापिसंभवाभिप्रायेणेदमुक्तमितिवोध्यम्।निर्देशेनेति।उभयशब्दप्रकृतिकसुवंताभावेनस्वार्थि
कायजुच्चारितार्थ्याभावेनतत्रकौंडिन्यन्यायाप्रवृत्त्यासर्वथानिरवकाशत्वेनैवावयवार्थकोऽयच्तद्बाधकःस्यादितितत्रकृते
क्तोष्ट्रीत्यत्रङीपूर्वकस्वार्थिकोऽयच्उवीरइतिनिर्देशेनैववारितइतिवोध्यम्।। ।।अनभिधानमेवेति।तत्प्रत्याख्यानेनफलेकार्येव
मावश्यकमितिभावः वस्तुतस्तुप्रत्याख्यानमिष्टापत्तिंकृत्वैवअतएवोभोभावितिवक्ष्यमाणग्रंथसंगतिरितिवोध्यम्· अयच्यकचु·
तुनेति· अयंभावः सुवुत्पत्तेःपूर्वमयजंगीकारेतत्रकृतेऽयजंतस्यगणेनपाठेनसर्वनामत्वादकचितद्विषयत्वमेवस्यादितितदभाव
संभावनाभावेनपूर्वमप्रवृत्तेरकप्रत्ययेपीष्टसिद्ध्योभशब्दपाठोव्यर्थः अयनंतरमयजंगीकारेतुनायंदोषइति·उपजीव्यत्वेनेति· अयंभा
वः उक्तरीत्योभयशब्दस्यतद्विषयत्वाभावसम्भावनाभावेपिउभशब्दस्यकप्रत्ययविवक्षायांतदभावसम्भावनासत्त्वेन।अयच्युपजीव्य
कापवादाकचः प्रवृत्तिरिति।नचैवमुभयशब्दस्यैवतदभावसंभावनायच्प्रयोजिकास्तुउभयशब्दस्यतुसामास्तुफलाभावात्· एवं
चगौर्णेनकार्यद्वितिलाघवंनस्यत्तापिकप्रत्ययस्योपजीव्यत्वमितिवाच्यम्·एवमपिपूर्वमयच्माप्रवर्ततांकप्रत्ययोत्तरंतुसप्रवर्ततांतदा

राम
९७

तदभावसंभावनासत्त्वादित्याहुः किमर्थमिति॰ एवं सति प्रत्ययविधौ तदंतविधिनिषेधेन परमोभकावित्याद्यसिद्धिस्तु न तन्निषेधे पि अ
व्ययेभ सर्वनाम्नोऽकटेः प्रागकच् तदर्थगत कुत्सादावित्यर्थे न समुदायार्थत्वे द्विवक्षायामवयवार्थे तद्विवक्षायां वा तु मया कात्वेन परमगय्या
यणाद्रूत्यत्रोक्तरीत्येष्टसिद्धेरित्याशयात् परमभवकानित्यत्रोक्तं तु मतान्तरमिति स्फोरिष्यते॰ विशिष्टस्य प्रकृतित्वाभावे॰ नुभकाविन्या
दौ स्वरे तु न दोषः सति शिष्टत्वेन स्वपरत्वघटितत्वेन च निपातनप्रवृत्तेर्निष्प्रत्यूहत्वात् एवं हि गणेऽन्तोदात्तनिपातनेन कार्यमिति ला-
घवमिति भावः प्रत्याख्यानेन गणेऽन्तोदात्तनिपातनानुमानम् अन्यथा स्वार्थपाठस्यावश्यकत्वात् तदसंगतिः स्यात् २२ अतएवोपसर्ने
नेति। इदं च तत्त्वद्व्यन्तद्गति पक्षे फलं सुवचमिति वादिनां मतेन स्वमते उपसर्जने कुत्सादिविवक्षायाः कर्तुं शक्यत्वं स्पष्टमन्यत्रेति बो-
ध्यम्। अनुवादकत्वमिति॰ बोधकत्वमित्यर्थः। अतएवोभावित्यस्य सिद्धिः अतएवोद्योते बोधकपदोपादानमेव॥ अभावबोधके ति॰ न त्वे
ति विभाषेत्यत्रेति भावः एवं चापवादविषये अंतरंगोद्भावनम् असंगतमिति भावः इदं च प्राप्तिमभ्युपेत्यं वस्तुतस्तत्प्राप्तिरेव नेत्याह॰ किं
चेति॰ युगपत् प्राप्त्यभावादिति उभयविषयकवाक्ये जसि परतः सर्वनामतावानभवति जसः कार्यप्रतीतिसन्त्रार्थः अत्र पक्षे जसः कार्यमिति वा-
चनिकं षष्ठ्या जसः स्थाने आदेशे कर्तव्ये जसद्वारे कर्तव्ये इत्यर्थो वा जसुत्तरमेव तस्य कर्तव्यतेति ना युगपत्प्राप्तिः प्रकृतस्य चेतिस्यायेन
प्रवृत्तिपक्षे नित्यसंज्ञायाः पूर्वमप्रवृत्तिः अप्रवृत्तिपक्षे जसः पूर्वमेव नित्यसंज्ञाप्रवृत्तिरित्युभयेद्रूत्यस्यासिद्धिरिति भावः॥ ननु प्रथमेद्रूत्यो

दिसिद्ध्यनुरोधात्वाक्यांतरे जस्विषये पूर्वमेव सर्वनामत्ताबाभवतिशीभावे कर्तव्ये इत्यर्थः आवश्यकः जसः आदेशस्य विषये इत्यर्थो
वा उभयथापि शीभावविषयता जसः॥ प्राक्कालीनैव सामर्थ्यात् गृह्यते इति युगपत्प्राप्तिर्नित्यविकल्पविध्योः संभवतीति चेत्तत्राप्यसं
भव एवेत्याह-जसीति विषयसप्तमीति· ननु मनुष्यायं प्राप्तरूत्यायेति दृष्टान्तेन पूर्वं यस्य निमित्तसंपत्तिः तस्य पूर्वं प्रवृत्तिरित्यर्थः सिध्य
तीति तस्यापि परिभाषया क्रोडीकारेण बाधकं तत्रासिद्धत्वं च निमित्ताभावाद प्राप्तिरूपमिति युगपत्प्राप्त्यभावेपि परिभाषा संचरत्येवेति चेत्त-
त्राह· स्थानिवदिति· निरवकाशेति· अयं भावः प्रकृतिभेदात् प्रत्ययोभिद्यते स्थानिभेदादादेशोभिद्यते आदेशभेदात् स्थानिवद्भाववाक्यंभि
द्यते नत्तु विधिभेदोच्च· एवं चोभयशब्दे तयवोऽयच् आदेशः सर्वनामत्वेऽनत्तु विधौ कर्तव्ये तयरूपस्थानिवदिति वाक्यं निरवकाशमि
ति· एतेनोभयीत्यत्र ङीपू संपादने तद्वचैत्यादि साधनेन चातिदेशप्रापितापि सावकाशेति परास्तम्॥ अंत्यस्यानभिधानात् ब्रवेन निषेधा
नां बलीयस्त्वस्य संग्रहः॥ ननु परिभाषाविरोधाद् तिदेशवाक्यापल्लव एव नेति चेत्तत्राह· प्रत्ययेति· निरवकाशत्वं च दिवः कर्म चेति सू
त्रस्थमनोरमानुरोधेन तत्रीत्यापि· ननु कार्यकालपक्षे जसुत्तरमेव नित्यसंज्ञायाः अपि प्राप्तिरिति युगपत्प्राप्तिरस्त्येवेति चेत्तत्राह सर्वना
मेति· अत एव तयादेश इति तयवन्तत्वप्रयुक्ते आदेशे कर्तव्ये उभयशब्दस्य यवादेशस्य स्थानिवत्त्वप्रतिषेधो वक्तव्य इत्यर्थः अत एव
वार्तिकमते उभयीति ङीपि कर्तव्ये तत्प्रतिषेधो न शीभावे एव तद्विधानात्· अत एव भाष्ये यदि तत्ययान्तरम् उभयीत्यत्रेकारेण प्रा

प्तौनीति शंकितम्। ननु यदि स्थानिवत्वप्रतिषेध इत्यादि॥ अनभिधानमेवेति। इदं द्वित्रियान्तयस्यायचश्चेति। नयगृह्णास्याकरण
प्रौढभावस्तुतस्तुडभशब्दप्रकृतिक एवायच् प्रत्ययान्तरं तत्र तयस्येत्यननुवृत्तेः द्वित्रिप्रकृतिकस्तु तयस्थानिक एव न तु प्रत्ययान्तरमिति प्र
ठकाः एतन्मतन्त्रहालवोऽन्यैस्तत्रत्ययच् प्रत्ययान्तरमिति भाष्यं यथाश्रुतं युज्यते। असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्व
यस्य व्युत्पत्तिसिद्धत्वात्। तयातु[illegible]प्रकृतिकोऽयच् इति व्याख्येयमिति तद्भंगः स्यात्। भाष्ये तत्र चद्वितयेदंत्येव पाठ इति। वस्तुतस्तु
दं च नवेति विभाषेत्यारंभे प्रत्ययान्तरत्वे[illegible]समाधानमावश्यकमिति स्पष्टमेव तत्प्रत्याख्याने त्वंतरंग प्रथमादिसाहचर्यात् द्विधिमुखेनैव प्रवृत्ति
र्भविष्यतीति निःसंज्ञाप्रवृत्तिर्मूलोक्तरीत्या न्याय्येवेति बोध्यम्॥ तदंतविधिद्वयेनेति। यद्यप्युक्ते नापि तदंतविधिनां प्रयोजनलाभात्पाठः
सार्थकस्तथापि सत्येकस्मिंस्तदन्तविधौ प्रत्ययग्रहणाभावेन संज्ञाविधाविति निषेधाप्राप्त्या प्रयोजनं सर्वनामेति बोधितं तदंतविधिस्वीकारे बाध
काभावद्वित्रिभावः॥ सन्निहिते तथा दिति॥ दिग्देशकालानां प्रवृत्तिनिमित्तभेदादेव भाषितपुंस्कत्वाभावो भाष्योक्तः संगच्छते। चेनसदृशः स्थाने नरत्न
मद इति यथा॥ प्रथमार्थ एवेति। प्रथमानिर्देशसाध्यप्रयोजनसाधनतात्पर्यक एवेत्यर्थः ननु चिकीर्षिते इत्यध्याहारतात्पर्यकः लघुत्वात्प्रथमा
निर्देशकर्तव्ये गुरुसप्तमीनिर्देशस्त्वदृष्टार्थ एवेति भावः। सौत्रत्वात्प्रथमार्थे सप्तमीत्येवं तु न व्याख्येयम्। गौरवात्। मनोरमोक्तरीत्या सिद्धे फला
भावाच्च अन्यथेति चिकीर्षिते इत्यध्याहारतात्पर्यकत्वे इत्यर्थः व्यर्थः स्यादिति। इदं तु चिंत्यम्। पाणिनिना हि किमर्थं प्रथमार्थे सप्तमी सौत्रत्वे

स·भ·
९९

ति प्रश्नेनाप्युत्तरस्य दुर्लभत्वात्· अपरशब्दस्तु रूढः परापरयोस्तुल्यार्थत्वात्· नामपदस्वारस्येनेति· नः यमानार्थकं नामेति व्युत्पत्तेरिति
भावः॥विशेष्यभूतार्थकमिति यावत्॥अभिव्यक्तेति· इदं चान्येषां मतेन। कचित्त्वेतदपपाठः स्वमते तु प्रसिद्धार्थकाव्ययभूतनामपदस्वार
स्येन नामपदोपादानादेवोभयलाभः। यद्वा सर्वेषामिति बहुवचनेन प्राधान्यलाभः अव्ययनामपदेन प्रसिद्धत्वाम इति बोध्यम्॥ ॥इदं
चान्यरीत्या स्वीयमते तु वृद्धिसूत्रे नो करीत्यापदाभिन्नानीत्यर्थो बोध्यः॥लोकतः सिद्धेरिति· यत्र संज्ञोपसर्जनीभूतेऽभयमपि लोकतः प्रसिद्धं
तत्रासंभवाच्चोभयविधिरिति बोध्यम्· न चासंभवेऽपि तत्सादृश्यविधिरन्यत्रेवास्तु अन्यतरविधानेऽपि सार्थक्ये नान्यत्रैवात्र सामर्थ्याभावा
दिति भावः एतेनेति· उक्तरीत्या सर्वोपसर्जनीचकस्य पदार्थैकदेशत्वेनेत्यर्थः॥दोषांतरमप्याह एकपदोपेति अव्युत्पन्नत्वादिति· इदं च स
मासे उद्देश्यविधेयभावेनान्वयोऽनित्यादि नामतेस्पष्टमेव॥तन्मतेनेन रूपेणान्वये पृथगुपस्थितेरसंत्रत्वात्· स्वमते तु समासेऽपि तथा
न्वयोऽस्त्येवेति कारके वक्ष्यते मंजूषायां च वक्ष्यते· तदाऽव्युत्पन्नत्वादित्यस्यौत्सर्गिकत्वादित्यर्थो निपुणतरैर्मंजूषाज्ञेयैरन्यैर
पि वेदितव्यः॥पदन्नोमास्वानुरूपादिति· वर्णेनोऽर्थेत ख्यातिबोध्यम्· नन्वस्य वैकल्पिकत्वात् चरणादेशादेशत्वेऽपि न दोष इति चेन्न प
दादित्यस्माच्चरणत्वप्रकारकबोधो माभूदिति· चरणोऽस्त्रियामित्युक्ते लस्य नपुंसकत्वेन तस्यादेशे प्रसिपदिपस्येति माभूदिति सुन्दरा
स्यादित्यत्र मुखस्वांगमिति स्वरो माभूदिति च· अंतरतमे इति समस्यंतपाठस्य दूषितत्वेनेतल्लाभः कथमिति परं चिन्त्यम्॥भाष्ये इति· जा

दान
९८

तावेकवचनं चेति तदर्थकान्यतरस्यांग्रहणमित्यर्थः निश्‌निशयोरिति शब्दपरत्वेन भिन्नार्थत्वान्नैकशेषः सुटीति दूर्वं चं सुपूर्वत्वेन साद
श्यमिति मते हलंतेति॥ विपरीतं तु न आस्यं च प्रय त्नश्चेति भाष्यप्रयोगात्॥ ननु छंदसि सर्वविधीनां वैकल्पिकत्वेनादेशत्वेपि दोषाभावा
द्भाष्यमेकदेश्युक्तिरेवात आह ये च तद्धिते इति इत्युक्तमिति तस्य स्वरितत्वे तु शिरस्यपि अस्य दुर्वारत्वेन तन्निवृत्तये क्रियमाणः स्था
निनिर्देशो विफलः स्यादिति भावः॥ तत्तु वाक्येऽपि विति ज्ञापकात् नात्र संबंध इत्युक्तमेवेति चेन्न तज्ज्ञापकानुसंधाने हि प्रकृत्यंतरत्वेपि
दोषाभावेन तदसंगतेस्तदवस्थत्वात् प्रकृत्यंतरेति॥ तेच शसादौ साधव इत्यर्थः अतो न पूर्वोक्तभाष्यादिप्रयोगविरोधः अत एवेति
न तु आ आविति प्रश्लेषादिनिर्भावः। मतेनेतिकारमते शिरस इति स्थानिनिर्देशो न कर्तव्यः भाष्यानुसारिमते तु कर्तव्य इति पाठक्र
तं लाघवोपवर्णनं तन्नशीर्षण्य इत्येवं तु शिरस्यद इत्यस्यापि प्राप्त्यापत्तेः अन्येतु पद्दादीनामादेशत्वेमेवतस्यन्यायप्राप्तत्वात् अत एव
शीर्षन् छंदसीति सूत्रे भाष्ये प्रकृत्यंतरं द्रष्टव्यम् आदेशो माविज्ञापीत्युक्तम् शिरसो ग्रहणम् कर्तव्यं प्रकृत्यंतरे माविज्ञापीति
ये च तद्धिते इति सूत्रस्थभाष्यं त्वर्णाधिकारप्राप्तातिप्रसंगभंगायेति नास्माकं प्रतिकूलं वाक्यशेषविस्पष्टो वेति संबध्यते तेन हृदय
स्येत्यादेर्नासंगतिः। वार्तिकस्थपदस्याप्यनुवृत्तिः सूत्रेकदृष्टेति चेत् वैयाकरणस्याख्यां चतुष्पादि इणः ष इत्यं नसोः पश्य अ
नगावशीर्षन् छंदसीति सूत्रे इवपद्दन्निति सूत्रे प्रकृत्यन्तरं द्रष्टव्यमिति नोक्तम् तेन सूत्र सूत्रे आदेशत्व प्रकृत्यंतरोच थी

फलादिशेषोध्वनितः विकल्पासंबंधेतुविशेषस्यस्पष्टत्वात्तदसंगतिःस्पष्टैवेत्याहुः आहुरिति स्थानेन्तरत्वमेवेतिपाठदूषणा
वसरेएतत्फलान्यथासिद्ध्यकरणात् प्रकृत्यंतरत्वमेषांध्वनितंभाष्येइत्यपिबोध्यम् सुडनपुंसकस्य। व्याख्यानादौटइति आ
गमस्तुना। सर्वनामस्थानेचासंबुद्धावितिपर्युदासात् फलाभावाच्च· टाटकारेणप्रत्याहारेणसोप्यन्तर्भावात्॥ शिसर्वनामस्थानेइति
नियमाश्रयेणतरेषांलौवेसंज्ञाविरहेसिद्धे अनपुंसकस्येतिव्यर्थमेवस्यात् अनुबंधवत्त्वेत् शेरेवेतिनियमस्तु न राजासेमनु
घ्ययुवानइतिसिद्धेः शात् अनुबंधवत्त्वोऽजरूपस्यचेत् शेरेवेतितेनराजानौपश्येति· औङ्टिनस्यादितिचेत् औङ्टिकारोच्चारणसा
मर्थ्यात्तेनप्रत्याहारइत्यवेहि सुडसर्वनामस्थानमशीरितितुनसूत्रितं· ज्ञानमित्यादौसन्निपातपरिभाषयानुमुच्चारणसंभवेपि
अजरसंपश्येत्यादौदीक्षितमतेनैवलक्षणानुमापत्तेः सर्वइत्यादौयस्येतिलोपस्तुन औङः श्यामित्यत्र औङित्यस्याकरणात् त
त्प्रत्याख्यानेनतल्लाभाच्च· स्वादिषु प्रथमैकेति· अतएवासर्वनामस्थानेबिचरितार्थम् व्याख्यानादिति· सुपांग्रहेदृष्टेसुप्सुइत्येकवदे
तु अधिकग्रहेविनिगमनाविरहात् कवंतानामितिभावः॥ कपः संग्रहायाहतरन्तेष्विति· यचिभंसोत्रत्वान्नटजितिसमासांतोविध्यता
याः स्वपत्त्वात् इजरेणयोगइद्वेएकवचनमितिनोक्तम्॥ तेनेति· पूर्वसूत्रेणज्ञानावित्यत्रनलोपस्तुनापादितः॥ भसंज्ञयावाधात् भव
तीति· तेनदत्तः दत्तेत्यादौजस्त्वंनेतिभावः आकडारादेकासंज्ञा· संज्ञाग्रहणंस्पष्टार्थंप्रकरणादेवतत्त्लाभादितिस्पष्टमत्रेवभाष्ये

व्यास्यर्थकेति· तेन चार्थे द्वंद्व इत्यस्य संग्रहः तेन कर्मधारयसंज्ञाविषये न द्वंद्वसंज्ञा· युक्तमिति· तदुत्तरमस्यानुपयोगादिति भावः। पदगो
रवेपि मात्रालाघवं प्रतिपत्तिलाघवं चात्र पक्षे इत्याशयः। इदमुपलक्षणम्· आद्वंद्वादित्यस्य तेनाभिव्याप्त्यर्थकत्वं संभाव्येत· सिद्धां
तेतु तथात्वेपि न क्षतिरित्यपास्तम्। वस्तुतोऽवधिनिर्देशोऽफलः उपमर्जनं पूर्वमिति प्रकरणविच्छेदेनाग्र्यसंबंधसंभवात्· निरवका
शत्वेति· एकस्यां इति भावः ननु [illegible] पूर्वं कुतोऽत आह· विरोधाभावेनेति· पर्यायापत्तिरिति· पर्यायो हि क्रमप्राप्तस्यानतिक्रमः तत्कार्ययो
र्मध्ये यत् क्रमात् प्राप्तं परं तदनतिक्रमस्यापत्तिरित्यर्थः सिद्धांतेतु संज्ञयोर्योपरा तत् प्रयुक्तं कार्यं पूर्वमपि प्रवर्तते इदानीं तु कार्यगतप
रत्वं नियामकं स्यादिति भावः। एतेन [illegible] कमेव कार्यं स्यादिति चिंत्यमेतदित्यपास्तम्· नलोपस्यापत्तिरिति। सर्वथा निरवकाशत्वाद दत्रोपेनाते
इति भावः॥ नदीघिसंज्ञे इति भावः प्रयोगात्पूर्वनिपातेनेति· अनुपपादनादिति· लघुनोपायेनेति विशेषः॥ दीर्घाच्छसिन्येवेति· तस्माच्छ
सइत्यतः प्रागिति शेषः। एवं च तस्माच्छसइत्यत्र शसग्रहणं न कर्तव्यं भवति· तस्मादिति पंचम्याशसीति सप्तम्यं तस्य षष्ठ्यंतत्वकल्पन
संभवात्· चो न कर्तव्य इति लाघवमिति भावः। नन्वेवं तच्छब्दोऽनंतरपरामर्शार्थ इति सिद्धांतात् नियमशास्त्राणां विधिमुखेन प्रवृत्तिरि-
ति पक्षे वृक्षश्रेयसीनित्यत्रैव न त्वं स्यात् ननु हरीनित्यादौ तदुत्तरं पाठे तु शसपदं कर्तव्यं हरीनित्यत्रैव स्यान्न तु वृक्षश्रेयसीनित्यादावित्यु
ष्यश्वेति चेन्न· प्रकृते निषेधमुखेनैव प्रवृत्तिरित्याशयात्· तस्मादित्यनेनाकोदीर्घः परामृश्यते प्रथमयोर्दीर्घः परामृश्यते इत्याशयाद्धा

मृगानूहंतीतिनिर्देशश्चात्रलिंगंस्पष्टं चेदं सर्वंप्रथमयोरित्यत्रभाष्ये विपरीतनियमापत्तेरिति॰ मृगानूहंतीतिन्हेत्वेकानामेडितेद्वातेनि
र्देशाश्रयणेनतुप्रतिपत्तिगौरवमितिभावः नन्वेवंप्रथमयोः पूर्वेत्यत्रभाष्योद्द्योतविरोधः ततोह्यिं यथादस्यन्यासस्यनिर्दुष्टत्वं तत्स्यं तद्वति
चेन्न॰ इचूग्रहणंनकर्तव्यमितिप्रसंगसत्वेनतस्यलाघवपक्षपातित्वादितिवदंति॰ अत्रदीर्घात्सुटीतिसूत्रयितुमुचितम्॰ आतोधातोः
सानितीति अकारेणसहितानित्यर्थः एतेनपंचमीसमासेनत्वमतेस्थानिवत्वेनान्यथासिद्धिःप्रयुक्ता यद्यभिधानमिति॰ यदीत्यनेनेदंसूचि
तंवस्तुतः फलभेदायतेषामनभिधानमेवेति॰ नन्वनापश्चंदस्यप्रत्याख्यानंत्वकः अद्इतिनिपातनेभापिभाष्येकृतंतेनस्वत्रलोपानेष्टइति
प्रतीयते योगविभागेनप्रत्याख्यानंतु[illegible]साकंप्रतिकूलंविरोधअतोभाष्यान्तरविरोधमाह अतएवपुमेति एतदेकवाक्यतयैवनिपात
नेनंधातुपदस्यापृ भिन्नपरत्वबोधन[illegible]द्वारालोपइत्यर्थः कार्यः तदयेकथं[illegible]इतिप्रश्नस्तुउक्ताशयमेवानानतएकदेशिनः अतएवभूवा
दिसूत्रेभाष्येयाः पश्यसीत्यस्यान्यथासिद्धिः अनापइत्युक्ताकृता॥ धातुपदस्ययथाश्रुतार्थकत्वेनदसंगतिः स्पष्टैव नन्वेवंनृमुनइति
सूत्रप्रयोगस्यनेयत्कार्यमितितत्सूत्रीयभाष्यप्रयोगस्यचविरोधइतिचेन्न॰ वंधुनीतिवत्॰ नपुंसकनिर्देशांगीकारेणोभयोपपत्तेरि-
तिवदंति॰ दीर्घविधायेति पररूपबाधकेदीर्घेकृतेपूर्वसवर्णादीर्घसिद्धावितद्वनत्वस्यसत्वात्तदर्थंकेषांचितनृतस्मादित्यत्रतच्छब्देना
कृष्यानिकदीर्घमात्रपरामर्शोनतुपूर्वसवर्णदीर्घस्यैवेतिक्लेशमुधैवेतिबोध्यम्॥ रामानित्यत्र बहुवचनइतिदीर्घकृतेः नापइत्या

न्नोपस्तुना। पंचमीसमासेनस्थानिवत्वात्· वाध्यविशेषचिंतापक्षेपिपूर्वसवर्णदीर्घत्वतेयथोद्देशेमसंख्याप्रवृत्त्यापूर्वान्तवत्वेनाकारां
त्तेभत्येभ्रातस्यलोपस्यवा।रणभुक्तरीत्यास्थानिवत्वेनसन्निपातपरिभाषयावाबोध्यम्॥नेकार्यमिति· नन्वेवंरमाणामित्यादौअवर्णान्तत्वलः
क्षणानुटश्चारितार्थ्यात् रमाणामित्यादौनुपरत्वात् वहुवचनइतिदीर्घेनुट्विधौ अनुवर्तमानानापइतिलोपप्रसंगः॥आपूर्वग्रहणस-
त्वेत्ववर्णान्तलक्षणोनुट्वहुवचनेइतिदीर्घापवादइतिनदोषः अतएवभाष्येनन्त्रकार्यमितिनोक्तमितिचेन्न· चारितार्थ्येपिनुटःप्रति
पदोक्तत्वात्पूर्वप्रवृत्तेः पूर्वदीर्घेपिपंचमीसमासेनस्थानिवत्वेनसन्निपातपरिभाष यावालोपाप्रसंगाच्च· कथंकीलालपानांकुलानामि-
ति· न्याय्यंतुसर्वेषामेकदेशयुक्तिरेवेतिनिपुणतरमालोचनीयम्· इत्यादंताःजसिचेयोगविभागस्येष्टसिद्ध्यर्थत्वात् क्वचिदंप्रवृत्त्यापू
र्वस्यगौरीत्यादिसिध्यर्थोयोगविभागइतिबोध्यम्। शेषोघ्यसखि· घ्यूभ्यामिति· यूएदह्रस्वपरानुवृत्तिफलिवार्थकथंवमेदः अनवकाश-
त्वान्नदीति· ननुगवांपत्येस्त्रियै कृत्यत्रसावकाशत्वात्कथंनदीत्वस्यप्रवृत्तत्वमितिचेदत्राहुः विप्रतिषेधेपरंकार्यं ह्रस्वोऽपतिःसमासएव
घिःषष्ठीयुक्तश्छंदसिवा पू· असखिङितिनदीवास्त्रियाः इयडुवङ्स्थानावस्त्रामिचन· आख्याह्रस्वं लघुइतिन्यासभेदेनसावकाशा
त्वेपिपरत्वान्नदीत्वंवाधकंभविष्यतीतिशेषग्रहणस्यसार्थक्यं तावादिनामाशयइत्येके· परंत्वत्रारंभसामर्थ्यान्नदीसंज्ञापरकार्यत्वाच्च
घिसंज्ञेतिभाष्यादिग्रंथयोजनैवतस्माद्यथाक्रममेव· ङितिह्रस्वःपतिश्चसमासएवघिःषष्ठीयुक्तश्छंदसिवा· असखिङितिन्यासेनासंहि

सामान्यतोह्रस्वांतस्यविधानंनिरवकाशंविशेषतोविधानेलाघवंतुमत्ये· धेन्वेइत्यत्रबाधमंतराणवद्धिसंज्ञावृद्धिः ।।प्रतिपन्नकानें
चसामान्यतोविधानेगवांपत्येसावकाशेमत्येइत्यत्रपरत्वाद्बाध्यतेइतिवक्तुंयुक्तम्· उकारांतस्यसंज्ञाविधानंनकुत्रापिसावकाश
मितिधेन्वेइत्यत्रनदीत्वमेवेति·फलभेददूतिवाच्यम्· तदभावात्· उदंतस्यविधिर्व्यर्थइत्यस्यउकारानुवृत्तिर्नकार्येत्याशयः तुतत्त
द्विषयकंवाक्यंनोपन्यास्यमिति।नाद्यः॥तस्याउत्तरार्थत्वात् नान्त्यः तस्यविप्रतिषेधसूत्रप्रतिबध्यत्वात् इत्यन्येभाष्यप्रामाण्या
त्·ङितिह्रस्वश्चेयांपतिशब्दस्यानभिधानमित्यपरे॥ङितिह्रस्वश्चेत्यत्राटश्चेतिवत्तुचकारः पुनर्विधानार्थस्तस्यानवकाशत्वमित्याशय
इतीतरेः वस्तुतस्तु· अहन्नित्यत्रैषस्यमाणनीत्यानवकाशत्वंसुस्थमेव पतिशब्देघिसंज्ञाप्राप्तियोग्यतासत्वात्तुनियमेनापिबाध
इत्यन्यत्· एतेननञ्मतेपरमसख्येभ्रियेइत्यत्रापिसार्थक्यमित्यपास्तम्· असखीत्यस्यप्रसज्यप्रतिषेधत्वांगीकारेणनङिःसं
बुध्योरित्येनतुल्यत्वात्·माश्चेइतीतिः· अयमत्रमूलाशयः पूर्वग्रहणाननुवृत्तावपिह्रस्वपदानुवृत्त्योःविश्वपादिशब्देनातिप्रसंगः अदं
तस्यतुसत्यपिघित्वेक्षतिर्नास्ति· तथाहि·रामेणेत्यत्रइनादेशनादेशापवादः।रामस्येत्यादौसत्यपिगुणोक्षतिर्नास्ति·इत्यनीमिकूप
रिभाषोपस्थित्यातदप्राप्तेश्च। अच्चघेरित्यत्रेदुद्भ्यामित्यनुवर्तनातएकदेशौरिहरौइत्यत्रहूहूवीत्यस्यविषयेपिनदोषः अदंतेचेदजाद्ये
वेतिनियमार्थत्वादजाद्यदंतमित्यस्य·ईदग्नेरितिज्ञापकाच्चनविपरीतनियमइति॥ आङोना·रूपासिद्धेरितिप्रियत्रिणाकुलेनेत्या

ङेर्विभक्तेर्हलादित्वाभावेन षट्त्रिचतुर्भ्यो हलादिरिति स्वरासिद्धिरपि वोध्या तत्र स्वमते विहितविशेषणाभावात्· ननु नमुनेद्

त्यस्य सिद्धान्तेऽपि नकारे सिद्धत्वनिषेधकत्वेन रूपं सिद्धम्· अमुष्मै कुलायेत्यादि तु न भवेदेवेति चेत्तत्राह नमुने इति विरोधादिति एवं

च नसोऽर्थः सिद्धान्ते इदानीं तु सत्त्ववावश्यकस्तथा चामुष्मै इत्यादिप्रसिद्धलक्ष्यविरोधः स्यादिति भावः। तत्रार्थे सूत्रसंमतिमप्याह॥ अत एव सूत्रे

त्रेति॥ न किंचित्त्राघवमिति। नेदमिति आसेऽपि नकारद्वयस्य योगी कारे लघुभूतन्यायमनीतिन्यासत्यागो निर्वीजः स्यादिति भावः· औङ आपद्

तिसूत्रभाष्ये औविभक्तेर्ङित्वविधेर्ङे इत्यादौ याट्स्यादित्युक्तं। तदयुक्तं शीभावस्य याडपवादत्वात्। अतो न्यरत्न्यायो जयति। अत एवे

ति। हरिणामत्येति· तत्र कौण्डिन्यन्यायेन नादेशस्य गुणबाधकत्वमत्रारुचिः· नयाडिति· हरीत्यादौ गुणोनेत्यपि वोध्यम्· घेर्ङितीति· दिगि

ति· दिगर्थस्तु तत्र तदनापत्तौ नुडापत्तिः। सिद्धान्ते हि परत्वात् टानुड्वाध्यते· रमायामित्यादौ ङेर्यामि याडनापत्तिरपि वोध्या यदि तत्र ङे

र्ङीमुक्तिं यते तदा रमायामित्यत्र पूर्वप्रत्ययत्वाभावेनेमाप्रवृत्त्या ङकारयुक्तेरणादेशे कृते वार्णपरिभाषया यांश्चिकेन्प्रत्ययस्यादित्वा

भावाद्धितं ङस्यनस्यात्· अनित्यत्वेनाप्रवृत्तौ तु नमानं· यदि तु भयस्य रादेशत्वेऽएव समानकार्यित्वएव सत्यं नु यमवादिमत्त सवलंवसे

नदासुपुः संप्रतिङादित्वासंभवेनैमोनपूर्विकं तत्तगरस्यत्तेवासुपीति निवर्त्यत्र तु ङवनेद्वत्यत्रैव प्रवर्त्तन वेत्यादिना विकल्पोमं कु

सो निक्षिप्रामि· यदि निर्देशादिकं प्रदर्शयिष्यसि तदा प्रतिपत्तिगौरवेण भीषयिष्यामि इति तूष्णीमेवास्तेति· ङ·सिङ·सोऽस्य·नास्त्रीति

जयंतिभर्वतीत्यत्रांत्तरंगत्वात्पररूपेच: परेतिस्थानिवत्वेनगुणापरादित्वेनङित्वसत्वात्·प्रकृतसूत्रेपिदोषाबोध्य:। पूर्वरूपेतु
स्थानिवत्वम्·पूर्वपरविधित्वात्॥अत्त्वघे:।ननुतत्वनिद्रायांकिंमानमतआह।अतएवेति·समत्वादित्ति·ननुइत्तरेत्संज्ञकान्निर्दि
ष्टस्वैरूपंशब्दस्येत्युक्त्याविशिष्टस्यविधानेप्रवर्णापत्तिरतइत्संज्ञालोपोप्रार्थ्यते· अनित्संज्ञकत्तपरेतुत परसूत्रप्रवृत्यात्त-
काररहितस्यैवविधानमितिवैषम्यमितिचेन्न·भाव्यमानेनसवर्णाग्रहणानेत्यनेनगुणाभेदकत्वादिप्राप्तस्यैव[illegible]त्रप्राप्तस्या
पिनिषेधध्रौव्यात्·अत्तएवकिमोदित्तिपक्षेमुनासिकोर्नेतिवोध्यम्॥फलभेदोनेति·नन्वौदादेशादित्वेनाप्रगृह्यमतोपिफले
क्यंनहिभाष्येऔदादेशोदिदिति·अदादेशोदिदितिवाकंठरवेणोक्तमस्तीतिचेन्न·दित्वमाश्रित्यतिनीतिप्रत्याख्यानावसरेभाष्येओका
रस्यतपरत्वानुक्त्यातेनफलभेदाप्रतीतेरितिभाव:।इत्वेनेति·अलोंत्यस्येतितुननानर्थकेतिनिषेधात्·तत्प्रत्याख्यानेतुनदोष
इतिस्पष्टमत्रैवसूत्रेभाष्ये॥प्रदेशेष्विति·अस्तिसिचोपृक्ते·वेरपृक्तस्य·सुतिस्यपृक्तंहलित्येतेषुसूत्रेष्वितिभाव:।हल्ग्रह
णेनैवेति·सत्राद्ययोरुत्तोचैत्वंद्विर्लुकिहलीत्यतोहलीत्यनुवृत्त्यावपिनद्यादिविधिप्राप्तिवंधायहलितिवक्तव्यम् तृतीयेतुवेरित्यनुना
सिकनिर्देशमाश्रित्यापृक्तस्येतिभाष्यप्रत्याख्यातमितिनकर्तव्यम्· हल्ङ्याविितिसूत्रेतुकर्ततएवेतिबोध्यम्· अदृष्टार्थमिति·नन्वे
वंहल्ङ्यादिसूत्रेतदंतविधिनाहलंतंसुप्तिसिलुप्यतेइत्यर्थेनहन्यादित्यादावतिप्रसङ्ग: संज्ञाकरणोतुनतदंतविधिरितिदृष्टंफल.

मः नच निर्दिश्यमानपरिभाषया निस्तारः। सूत्रे षष्ठीनिर्देशाभावात्। यदि तु उक्तातिप्रसंगभयात् स्य षष्ठीनिर्देशः क्रियते तेन तदाभिंतादित्या
दौ प्रतिप्रसंगो दुर्वारः। स्थानिवद्भावविषये उक्तपरिभाषाया अप्रवृत्तेरिति चेन्न। सुप्तिसिहलिति सुप्तिसिहलइतिवा कर्मधारयनिर्दे
शे परनिपातनात्तस्य विशेषणत्वाभावनिर्णयेन तदंतविधेरभावेनातिप्रसंगाभावात्। षष्ठीतत्पुरुषे तु न। निषादकर्ष्वणतिवत् गो
रवात्। एतेनांएक्तग्रहणं विम्त्यप्रयोजनमित्यादि शब्दरत्नादिग्रंथाव्याख्याता इति बोध्यम्। ॥ त्यात्परस्य। भिन्नावयवावित्ति। अ
न्यावयवेत्यर्थः। अतएवाह। प्रातिपदिकांत्यवर्णादेरिति॥ अन्यथा सख्युर्घात्तकइत्यलुक्समासेतिप्रसंगः स्यादिति भावः। लक्ष
णायेति। यद्यपि तदंतविधिकल्पनेनापि भाष्यमुदूत्योत्तेयो जितं तथापि वर्णसंज्ञापक्षे लक्षणावश्यकत्वेनात्रैसैवादृता। किंच
तदंतविधिकल्पनेलिंगविशिष्टपरिभाषायाश्च प्रवृत्त्यै अनित्यत्वमाश्रयणीयम्। विभक्तौ लिंगविशिष्टाग्रहणं ति वितन्निषेधप्र
वृत्तये कार्यकालपक्षे पदैकवाक्यतावाश्रयणीयास्यात्। लक्षणापक्षे तु वक्ष्यमाणरीत्यान्यायत एवं तदप्रवृत्तिः सिध्यतीति सैवा
दृतेति बोध्यम्। प्रातिपदिकत्ववदुपस्थापकेति। ननु तद्वदुपस्थापकत्वं विशेषणतया विशेष्यतया मुख्यविशेष्यतया वा सर्वसाधार
णमेनवा इह विवक्षितं नाद्यान्त्यौ सख्यवयवे लक्षणायामपि विशेषणतया सखिशब्दस्य भानसत्वात् तद्वदुपस्थापकत्वध्रौव्येणोपस्थि
तिपरिभाषाप्रवृत्तेर्दुर्वारत्वात्। अतएव न द्वितीयोपि। आनुपूर्वीनिष्ठप्रकारतानिरूपितविशेष्यताया अपि [illegible] शब्दे सत्वात्।

नापित्तृतीयः। प्रातिपदिकार्थेति सूत्रेपि तदप्रसक्त्यापत्तेः द्वंद्वनिर्देशवहुशस्तन्नं चारस्यभाष्योक्तस्यासंवद्धत्वापत्तेश्चाग्नां वेदत्रोच्यते· सर्व
साधारण्येनैवेह तदुपस्थापकत्वं विवक्षितं· लक्षणाचशक्यतावच्छेदकारोपः शब्दपराणां च शब्दनिष्ठा जातिः प्रवृत्तिनिमित्तं· ए
वं च स्मरविशब्दावयवेषु तदासेपि अवयवानां जातेर्वा न तद्वत्वमिति· यद्वा अस्तुशब्दपराणामानुपूर्वी प्रवृत्तिनिमित्तं ध्वंसादिरूपा-
यास्तस्या अपि नं तद्वत्त्वमिति च॥ विहितविशेषणानाश्रयणेनैवेति। विधीयतेस्माद्धि हितं प्रकृते प्रकृतिरूपं तदादीत्यर्थः। तेन यत्तस्वि
पत्यो विशेषणं तदनाश्रयणेनेत्यर्थः॥ अपादाने निष्ठत्वपङ्क्षः इत्यादि तिसूत्रभाष्यस्य स्पष्टतितत्सूत्रएवोक्तम्· अपभावः। इ· सिङ· सा
रितिप्रत्ययग्रहणे न तदादीत्युपस्थितं न सखिपत्योर्विशेष्यतयोः श्रूयमाणपदार्थ्यविशेषणत्वस्यन्याय्यत्वात्। नापिस्वान्तं त्र्यणपर
पदार्थविशेषणं व्यधिकरणविभक्तिद्वयोपपत्तेः। किंतु सखिपत्योर्विशेषणम्। एवं च सुसखेरित्यादौ नातिप्रसङ्ग· इति परिभाषानाश्र
यणेनैवेति· ननु लिंगविशिष्टपरिभाषया सखीशब्दस्यापि ग्रहणेन कृतहस्वचानिर्देशेन तत्वमत्यात्सुखेनैव लक्षणप्रतीतिं परिभा
षाप्रवृत्तिर्नैति चेन्न· विभक्तौ लिंगविशिष्टाग्रहणात्· अलमर्थस्तु· वस्तुतस्तु भाष्यस्यायंभावः। सुसखेरित्यत्रातिव्याप्तिपरिहारायस-
खिपतिभ्यां परस्येति सूत्रे यदि लक्षणप्रतिपदोक्तपरिभाषासंचरति तदा समस्तहस्वेन वर्ततइत्येवं निष्पन्ने तिव्याप्तिः। तत्परिहाराय यदि
अनित्यत्वात्तदप्रवृत्तिं ब्रूषे तर्हि पूर्वोक्तेऽतिव्याप्तिरिति· उभयतःपाशारज्जुरिति॥ पष्ठिसमासएव॥ समासइत्युक्तेरिति· पतिर्नैतिवा

चेदुतिभावः।बहुव्रूपूर्वेनघित्वमिति· तत्रैवनघित्वमित्यर्थः।पतिर्नेत्युक्तेतुभूपतिनेत्यसमासेपिनस्यादितिभावः एवमुक्तिसुकृत्यावि
तिन्यासेदोषदानमितिबोध्यम्· अतएवेति·प्रसिद्धावेवकारेणतत्ववच्छरणेतेनपतीपतेः किंपूपत्युरित्यादौनघित्वम्·पत्यावुपपीड
शेतेपत्यापदंशंचुंवनेइत्यादिकदूषतोचनघित्वमितिबोध्यम्· लाक्षणिकइति· अतएवभाष्येक्तवर्णसंज्ञापक्षेणानफलभेदइतिबो
ध्यम्· पतिसखीसमासेइति·इदंप्राचामनुसारेण· तन्मतेऽभिव्यक्तेतिन्यायेनद्वंद्वेवीरणाम्· पदकार्य्यविषयकत्वंतस्येतिस्वमतेतुस
त्वायाविति युक्तम्।इत्यादौष्विति· आदिनाद्वन्द्वेपूर्वनिपातसंग्रहः॥बहुत्वसंख्येति॥इदंप्राचामनुसारेणस्वमतेषहुत्वेसंख्यात्वाभाव-
स्यवक्ष्यमाणत्वात्।संख्येयविषयप्रश्नेति।यद्यपिसंख्याप्रश्नेडुतिस्तथापिसंख्येयमपितत्प्रश्नेविषयोभवत्येवमेवोक्तं।भाष्यस्पष्टत्वा
दिति।तत्रद्विंडत्वंतादिकवचनद्विवचनेनस्तः तत्रसंख्यानिर्णयेनप्रष्टव्यत्वाभावेनकिमाप्रयोगादित्यभिप्रायेणोक्तं।बहुगणशद
नेति।पर्युदासस्तुनोक्तः।तस्यार्थवत्परिभाषाबाधेनापिसार्थक्यसंभवेनप्रकृतार्थसाधनेसाधारणत्वात्।असंजातविरोधन्यायेनप्रथमो
पगतसंख्यापदेसंचरितकृत्रिमन्यायबाधानौचित्याच्च।संख्यापदार्थनिर्णायकः कृत्रिमन्यायः तिष्ठब्दार्थनिर्णायकोर्थवन्न्यासः त
त्रकतरस्यबाधइतिसंशयेशब्दंतपर्युदासस्यैवविनिगमकत्वंवाच्यम्· ततोवरंतन्मात्रप्रदर्शनमेवेतिच।अयमेवतत्रभाष्यप्रदीपो
द्द्योतानामाशयइतिबोध्यम्।अभ्यासाम्रेडितादीति· तेषुमहासंज्ञाकरणंप्राचामनुरोधेनेतिबोध्यम्· तयोरिति· तदर्थयोरित्यर्थः।निपात

स·भ·
१०५

विषयेति।नियतानियतानिएकत्वानिएतद्विषयेत्यर्थः॥नियतैकत्वात्तानात्रित्वादेरत्यंतानियतैकत्वज्ञानाद्बहुत्वेऽतिरिति भावः॥बहु
त्वादिहीति।आदिनागणत्वंतच्छब्दवाच्यंहीत्यर्थः।यथाश्रुते आदिपदग्राह्यंदुर्वचंस्या दिति बोध्यम्· त्र्यादीति· त्रित्वादीत्यर्थः।·धर्म
विशेषइति· ननु त्रित्वादिरूपमित्यर्थः सचैकोऽखंडोपाधिस्तस्य चानेकानेकेषु पर्याप्तिरेकत्वम्· समवायवदिति बोध्यम्· नच बहुत्वस्यात्र
त्वाद्यतिरिक्तत्वे गौरवमिति शंक्यं· बहुत्वस्य त्रित्वादिरूपत्ववादिनां बहुत्वं जातिरूपं। बहवः त्रयः इत्यादिप्रवृत्तिर्हि लक्षणयाऽयं भवश्यम
तिरिक्तं वाच्यं मया तु बहुत्वमेवातिरिक्तमिष्यते· बहुत्वं च त्वंनु वह्नितरावृत्तित्वे सति सकलबहुवृत्तित्वरूपमिति· विशेषाभ्भाद्धत· अथत्व
याच्यत मया बहुत्वत्वमपि जातिरूपमतिरिक्तं नेष्यते· किंतु एकत्वद्वित्ववद्देदविशिष्ठसंख्यात्वमेव बहुत्वत्वमिति नाहि भयाप्रि बहुत्वमतिरिक्तं
नेष्यते· किंतु एकत्वद्वित्ववद्बहु एवेति वक्तुं शक्यमित्यलमतिप्रसक्तविचारेण मृ॰ अतएवेति बहुत्वसंख्यात्वाभावादेवेत्यर्थः॥इत्युक्तमिति
ननु बह्वादीनां शब्दरूपाणां त्रित्वादिवृत्तिसंख्यात्वजातिमद्भिन्नत्वमित्यर्थे लक्षणापत्तेश्च व्यपदेशानिर्देशश्चायं त्रित्वादिसंख्यायां योव्यपदेशः
संख्येति सबह्वादिषु वर्ततीत्यर्थेन सर्वेष्टसिद्धौ बहुत्वस्य संख्यात्वेपिनेदं भाष्यविरुद्धं किंच वतुडतिविषयकमेवास्तु· तयोः संख्या वाचकत्वस्य भाष्या
नुलक्षणेति च तत्तात्पर्यं वक्तुं शक्यम्· किंच बहुत्वस्य संख्यात्वाभावे संख्याया एव तथा तिडागमिति भाष्ये संख्यापदे न बहुत्वमपि विवक्षितम्· तथा स
स्यपूरणेडिति सूत्रे वार्तिकं संख्यापूरणेडिति वक्तव्यमिति· अत्रापि संख्यापदे न बहुत्वं विवक्षितम्· बहुतिथइत्यादिसिद्ध्यर्थम्· तद्विरुद्धेत· ए

रामः
१०५

वं वहुषु स्थलेषु संख्यापदेन वहुत्वं विवक्षितम्· तद्विरुद्ध्येत· तस्मादस्तु वहुत्वं त्रित्वादिरूपासंख्येयनिष्ठमिति चेन्न· अत्र प्रकरणे संख्यापदेन संख्यावाचकपद
स्यैव विवक्षितत्वात्· किंच वहुत्वस्य संख्यात्वे भूयस्त्वादीनां संख्याकार्यं दुर्वारम्· नच नियमेन निस्तारः संपूर्णसूत्रस्य भाष्ये प्रत्याख्याततत्वेन तद्विरोधस्य दुः
परिहरत्वात्· तत्र तत्र भाष्ये वहुत्वस्य संख्या पदेन व्यवहारस्तु वहुशब्दस्य संख्यासंज्ञकत्वेन शब्दार्थयोस्तादात्म्यांगीकारेण द्विरेफव्यवहारवत्· द्विर·
एयपूर्वकशिपुस्थितिवचनेयः॥ एवंच तस्य न तादृशनिश्चयहेतुत्वमिति भावः तस्य त्रित्वादिभिन्नत्वेपि त्रित्वादिवृत्तिसंख्यात्वजातिमत्वमस्त्येव अत
एव नित्यं वहुवचनान्तइति प्राचीके वहुत्वसंख्यावच्छिन्नेति स्वग्रन्थः वहुत्वं संख्येत्यभिप्रायका भाष्यादिग्रन्थाश्च स्वरसेन संगच्छन्ते· वहुत्वं न संख्ये
ति· शब्दरत्नादिग्रंथास्तु शब्दपराद्वहुशब्दात् त्वप्रत्यये वहुशब्दः नियतविषयपरिच्छेदहेतुत्वरूपसंख्यात्वाभाववानित्यर्थो द्वोध्यः। यद्वा वहुत्वादि
हीत्यत्र संख्यापरात् वहुशब्दात् भावप्रत्ययो वहुत्वत्वादीत्यर्थः संख्याव्यापकइति०॥ तादात्म्येन यत्र संख्या तत्र समवायादिनासेत्यर्थः एवंच वहु
त्वत्वेन रूपेण वहुशब्दात्त्रित्वभानमिति न तादृशेन निश्चयः त्रिशब्देन तु त्रित्वत्वेन त्रित्वभानमिति सोऽस्त्येवेति भावः॥ धर्मविशेषइति· नतु त्रित्वत्वादिरू
पइति भावः॥ वह्वादिकयाचापि संख्या यत्नेइति॥ भाष्यविरोधः अनेन हि भाष्येण एकादिषु वह्वादिषु च तुल्यो योग इति प्रतीयते इति चेदत्राह यत्वि
ति एकादिकयेति। एकत्वादिकयेत्यर्थः वह्वादिकयेति वहुगणशब्दवाच्यवहुत्वसंख्येयेत्यर्थः यथाश्रुतमेव तदादिशब्दरूपेत्यर्थकं. संख्यायेति यत्र
यत्र शक्तिसंवन्धेन त्र्यादिशब्दस्तत्र तेन संवन्धेन वहुगणशब्दाविति भावः त्रित्वादिसंख्येति· पूर्ववत्त्वप्रत्ययेन त्रिशब्दार्थसंख्येत्यर्थः शेषं प्राग्वत् व्या

त्वेपमिति वदन्ति संख्यायत इति अस्येतीति शेषः बहुत्वसंख्येति वादिनापि बहु इति विषये एवं दिशो व्याख्येयत्वात् संपूर्णस्य तस्य त्वयानि यस्मात्वान्मुख्य
मादितिभावः नन्वेवमपि कतिशब्दासंग्रहः जिज्ञासाविषयसंख्यावन्तो हि कतिशब्दवाच्याः तत्र त्रित्वादेरेव संख्यारूपत्वेन इत्याद्यवंदु वेच्च अतः प्रका
रान्तरेण तत्संग्रहमाह कतिशब्दोपीति वस्तुतस्तु समवायघटितसामानाधिकरण्येन संख्यात्वस्य त्रित्वादिव्यापकत्वं सुवचम् ॥ ग्रमेदेन
व्यापकत्वमित्यत्र मानाभावश्चेति बोध्यम् उह्यमिति अयंभावः एकत्वादिषु लोकप्रसिद्धयोगस्य बह्वादिषु बाधात् तदन्तर्भावेन संख्यापदस्य
व्यावृत्तिः स्वीक्रियते सा चेह वनप्रदेशेषु मानाभावात् ॥ एतेनैव सत्तिभूय्यादिषु संख्याकार्यातिप्रसङ्ग इत्यपास्तम् वह्वादिसंख्यायोगरूढमि
ति यावत् संख्यापदे बाहुलकात् करणेऽडिति ७॥ ॥ इत्यलमिति ॥ इदं सूत्रं भाष्ये प्रत्याख्यातं तस्यायंभावः ॥ आरम्भेपि प्रदेशेणकादीनां ग्रह
णाया तिशादन्तायादिति सामान्यापेक्षज्ञापकं वक्तव्यमेव तद्वरं बह्वादीनामेव संख्यापदेन ग्रहणाय तादृशज्ञापकस्याश्रयणम् ॥ एतेन कौस्तुभकृदुक्तं
समाहितमित्यलमर्थः ॥ एतेनेति ॥ उक्तं संख्यात्वस्य बहुगणयोरभावेनेत्यर्थः नन्वेवं क्लिष्टकल्पनया बह्वादिषु योगरूढस्वीकारे फलमस्ति नवा
ग्राद्यमहासंज्ञाकरणसामर्थ्यात् प्रदेशेष्कृत्रिमन्यायबाध इति भाष्यासंगतिः ॥ द्वितीये त्वस्तु संख्यापदस्य रूढिरेवालमनया क्लिष्टकल्पनयेत्य
रुचेराह यद्वेति सूत्रेबहुग्रहणं तु इत्यारभ्य व्याख्यान्तरम् ॥ अत्र नियमेन संख्येति शब्दस्यापि संख्याकार्यं वार्यत इति विशेष इति बोध्यम् नस्ये
रिति बहुगणशब्दयोरित्यर्थः ॥ अनियतेत्यादि नियतैकत्वनिश्चयजनकत्वाभावेनेत्यर्थः ॥ तादृशनिश्चयजनकशब्देषु व संख्यापदस्य वृत्तिरसं

ख्या संख्येत्यादि भाष्यादेकादिकथा चापि भाष्याच्च संख्यासंज्ञा स्यादिति वार्त्तिकाच्च· अत एव संख्येति पदेन संख्याकार्य्यत्वदीयनियमेन तु वारणीय
म् तस्य बहुवाचित्वाभावात्· प्रत्ययलोपे अनुवृत्तेतितन्नः फलन्तु अपि पूर्व्वई ङ्गत्तौ क्विपू भागुरिमते ऽल्लोपः पिपो पियः इत्यत्र सत्यनेकाच्त्वे क्यि
प्न ननं देत्यारावामूचुनप्रत्ययपदाभावे तु यस्य कस्य चित्लोपे प्रत्ययलक्षणमित्यर्थेनानेकाच्त्वाभावेनाप्राप्तौ यणाम्· वतिदिश्येयातां लोपेइ
तिच सति सप्तमी अत एव पचति भवतीत्यादौ अतिङ इति· निघातप्रतिषेधः दधीयति मधूयतीत्यत्र सुबन्तलक्षणः कय्चूर्वेभिदीति वेछिदीतिइ
त्यत्र यङो वेतिईट् च सिद्ध्यति· किंच वेहतीत्यत्र ष्यङ् नेति वोध्यम् अवयवलोपे माभूदिति· अत्र कैयटः अन्यतमावयवलोपे तद्घटितसमुदा
यस्याप्यदर्शनमस्त्येव यथावयवे दग्धे पटो दग्ध इति मुख्यो व्यवहार इति तस्यायं भावः समवायिकारणनाशे असमवायिकारणनाशे वा कार्य्यना
शोस्त्येवेति सर्व्वसम्मतम् एवं च महापटस्य नाशो मुख्य एव तन्नाशसहकृता च कारणकलापात् खण्डपटोत्पत्तिस्तद्त्वत्र क्वतेपीति· आश्रीयेत्या
दाविति· आदिना समिधमिच्छति समिध्यति क्विपू समिधेति· अत्र हीनादेशेन ज्ञापकमिति अयं भावः तदभावबुद्धिं प्रति तद्बुद्धिः प्रतिबन्धिकेति
सर्व्वसिद्धं शास्त्रे तु आहार्य्यापि सा तथेति निर्व्विवादम् एवं चावयवलोपेन समुदायलोपे सत्यपि अवयवान्तरे तिदेशेन तद्बुद्धिसत्त्वेन कथं तल्लोपबु
द्धिः स्यात्· अतः कैयटोक्तम् न युक्तं किन्तु ज्ञापकमेवाश्रयणीयम् अत एव भावरूपे आदेशेन तल्लोपकार्य्यमिति प्रपंचितं प्राक् इति· नन्वेवमा
श्रयिति भाष्योदाहरणासंगतिः तथाहि कार्त्स्न्यनिवेशेपि प्रत्यासत्तिरवश्यं वाच्येव प्रत्ययलोपे लुप्तप्रत्ययघटत्यसाधारणधर्म्मनिमित्तं कंभव

तीति· अन्यथासुदृष द्दित्यत्र दीर्घो दुर्वारः॥ असः कृत्स्नप्रत्ययस्य लोपसत्वात्· असंबुद्धौ सो विधानेन प्रत्ययलक्षणत्वाच्च अत एवैकेनैव प्रत्ययपदेन
कार्त्स्न्यलाभे द्वितीयप्रत्ययपदं न कार्य्यमित्युक्तं भाष्ये· प्रत्यासत्त्यनङ्गीकारे तु कृत्स्नोभयोरप्यावश्यकत्वेन तदसंगतिः स्पष्टैव एवं च तत्र वमतेलुप्तः स
कारान्तकः प्रत्ययस्तद्वृत्तित्वं न प्रत्ययासाधारणम् कैयटमते तु न दोषः लुप्तप्रत्ययविशिष्टः तद्वृत्तित्वस्य साधारणो धर्मः ओर्ई आगुकत्वादिः वेति चेन्नै
वं लुप्तप्रत्यय एव यत्कार्य्यप्रयोजकस्तत्प्रत्ययलोपेपि भवतीत्यर्थेनादोषात् सुदृषदित्यत्र लुप्तः असस्तत्वा प्रत्ययोपि अव्युत्पत्तिपक्षे सुप्रत्ययइत्यादौ दी
र्घप्रयोजकः आघ्नीयेत्यत्र तु लुप्तः सः सत्तु प्रत्ययसंज्ञक एव· अनुनासिकलोपप्रयोजक इति· अवयवेपि प्रत्ययत्वव्यवहारस्य इति· न चैवं प्रत्य
यादेरित्संज्ञायामतिप्रसंगः आदिपदानुवृत्तिसामर्थ्येन कृत्स्नप्रत्ययादेरेव विवक्षितत्वात्· एवमायनेपीत्यत्रापि सुदात्तश्चेत्यत्राप्यतिप्रसङ्गो भञ्जनी
यः॥ नन्वेवमपि येन विधिरिति सूत्रे भाष्येऽचिश्नुइति॥ सूत्रे तदादिविधेरभावे श्रियोश्नुवावित्यत्रैव स्यात् श्रियः श्नुवः इत्यत्र न स्यादित्युक्तं तद्विरुध्ये
त प्रत्ययावयवेपि प्रत्ययत्वसत्वेनाचि प्रत्यये इत्यर्थे जन्ते प्रत्यये इति चार्थेपि तत्र तत्प्रवृत्तेर्निष्फलत्वादिति चेन्नैवम् तस्य प्रत्ययत्वेपि विधाना
भावेनाङ्ग संज्ञानिमित्तत्वाभावात् एतेन कर्म्मेह इत्यत्र काटेशोपि परिहृतः ठस्येक इति सूत्रे भाष्ये कर्म्मठेऽतिप्रसङ्ग माशंक्यागत्वेनैतेऽगस्यष
ष्ठाकारः किं चास्य ठकार निमित्तं यस्मिन् अङ्गमित्येतद्भवति कस्मिंश्चाङ्गमित्येतद्भवति प्रत्यये इति यदुक्तं तस्य प्रत्ययत इति व्युत्पत्त्या विहिते इत्यर्थ
इति न तद्विरोधः अङ्गसंज्ञासूत्रे सूक्ष्मादेव विधानमाश्रीयते न घटकत्वे नेति च तदाशयः यदपि प्रत्ययस्यादिति सूत्रे भाष्ये केतिसंघातग्रहणं कारिका

हारिकाद्युत्पन्नत्वस्यात् वर्णोपक्षेतु बचनसामर्थ्यादेवमविष्यतीत्युक्तम् तस्यायमाशयः स्वग्रहणेसतिसामर्थ्यात्परिभाषाबाध्यते वर्णग्रहणेतुव्र
चनसामर्थ्यादेवनप्रवर्त्ततइतिस्वग्रहणंनकार्यमिति एवंभीह्रीतिसूत्रेपितत्सामानाधिकरण्यानुरोधात् कृत्स्नप्रत्ययग्रहणमिति तद्विधाने
तिबोध्यम् अनेनावयवेप्रत्ययत्वज्ञापनेपिनतत् व्याप्यपित्वादेरज्ञापनात् अन्यथाभूयास्तामित्यादावि आदेशापत्त्यार्थद्विपदत्वापत्तिः।एवमन्य
त्रातिप्रसङ्गोभंजनीयः ततोल्लोपकसिद्धस्य असार्वत्रिकत्वेनयदिप्राप्नोति एवंचेति एतेनकैयटमतेप्रत्ययग्रहणात्स्वरूपग्रहः प्रत्ययस्यग्रह-
णमितिकल्पनाप्रत्युक्ताचारितार्थ्येपिफलाभावात् आदेशप्रेति अत्रावयवप्रत्ययविषयवाक्येतद्विधानाभावेनासंभवात् तदादेरित्यस्यानु
पस्थितिरिति एधिषीष्ठेत्यादौसीयुट्सुडादेः षत्वसिद्धिरित्यपरमनुकूलम् अन्यथातदादेरित्यस्योपस्थित्याइण्कवर्गान्तमदादेरितिसूत्रा
र्थेनतत्रतदनापत्तिरतोलक्ष्यानुरोधान्नैवमर्थः किन्तुइण्कवर्गाभ्यांपरस्यतदादेरवयवोयः प्रत्ययस्तदवयवस्यसकारस्यषत्वमित्यर्थइ
तिवक्तव्यंस्यात् लक्षणादीति आदिनाआद्येसोत्रत्वात् इद्वः व्यधिकरणान्वयश्च अन्त्येप्रसज्यप्रतिषेधः व्यधिकरणान्वयश्च इतिचरि
तार्थमिति एवंचएकयैवकल्पनयाद्वयोश्चारितार्थ्यमितिलाघवंकैयटमतेकल्पनाद्वयमितिगौरवमितिभावः ननुक्तान्त्यविवक्षायाः फलंवि
ध्यर्थमितिपक्षेआघ्रीयेति नियमार्थमिदंसूत्रमितिपक्षेतद्विवक्षायाः किंफलमितिचेच्छृणुतद्विवक्षांविनातस्यनियामकत्वाभावात् स्वेकुमश
क्यत्वमिति किंचप्रथिमानमाचष्टेप्रथिमयति ततः क्विप् प्रथिम् तस्यसमीपमुपप्रथिममित्यत्रानश्चेतिटचःसिद्धिः एवंवाग्मिनमाचष्टेवाग्मयतित

त्तः क्विप् संयोगान्तलोपे ऽवद्दो वा ऽग्नेर्यस्यानगर्य्यौ तावद्दुवाम्का नगरीत्यत्र द्दुनः स्त्रियामिति कप् सिद्धिश्च एवं सर्वत आचष्टे सर्वतत्यति तत्तः क्विप्
सर्वादिर्यत्रात्वसन्तस्येति दीर्घसिद्धिश्च अचः परेति स्थानिवत्त्वं तु नन्वयमतेस्पादसप्ताध्यायीस्थदीर्घविधौ तन्निषेधात् एवं सर्वादिर्यत्रेय-
स्य सर्वत्री सर्वत्रिना वित्यत्रास्मा यामेधास्रजद्दुतिविट् प्रत्ययस्य सिद्धिः॥ एवं सुसर्वादित्यत्र नसुधातोः क्विप् पुरमेण समासे आचक्षाणेणिचि
क्विपि परमन् सुना समासे सुपरमन् इत्यत्र सोर्म्मनसी अलोमोषसीति स्वरसिद्धिश्च इहापि न स्थानिवत् आद्ये ऽपूर्वविधित्वात् अन्त्ये स्व-
रविधित्वात् अन्यथा प्रत्ययावयवलोपे ऽपि प्रत्ययसाधारणधर्म्मनिमित्तकमेवेति नियमेनान्तरङ्गत्वमित्यन्तत्वमसन्नत्वेन स्थानिवद्भावेन ल-
क्ष्येते त्युक्तोदाहरणोक्तविधीनामप्रवृत्तिरेव स्यात् एतेन क्वचित् पर्युदासेन क्वचित् तत्सूत्रस्य पदान्तरसाहचर्येण श्रूयमाणत्वद-
न्तेष्वेवोक्तविधीनां प्रवृत्तेरङ्गीकारेण वक्ष्यमाणलक्ष्येषु तदप्रवृत्तिसिद्धौ प्रत्ययलक्षणसूत्रं व्यर्थम् साहचर्य्यन्त सर्वत्र व्यवस्थापकमिति हि
तत् ज्ञापनार्थं तदिति शब्दरत्नायुक्तम् बहूनां ज्ञापकान्तराणां सत्वादित्यपास्तम् साहचर्य्येण तत्रैव तत्प्रवृत्त्यङ्गीकारे ऽन्यलक्ष्येषु तदप्रवृत्त्या-
पत्तेः न चेष्टापत्तिः सुदृषत्प्रासादङ्तिभाष्योदाहरणस्यासंगत्यापत्तेः नियमार्थमिति तत्फलन्तु सुदृषत्प्रासादङ्त्यत्रैं स्थानिवत्त्वेनासन्त-
त्वात् स्वरदीर्घौ न ननु निर्दिश्यमानपरिभाषया निर्दिश्यमानावयवाचएवदीर्घविधानात् कथमत्र तत्प्राप्तिरिति चेत् शृणु असपदस्य षष्ठ्य-
न्तत्वाभावेन तत्परिभाषाया अप्रवृत्तेरिति ननु अन्तरङ्गानपीति परिभाषया द्रुत्संज्ञालोपाभ्यां प्रागेव जसो लुकि स्थानिवत्त्वेन असन्तत्वमेव न

त्येवेष्टं न द्वयमिति सिद्धान्तमाहुः॥ अत एव हि प्रयुक्ता इति सुधियः। समोमिस्सिति ननु अकचिक तेविशिष्टस्यादेशार्थ यथान्यास एवास्तु इति शं

क्विपिमुत्वापत्तिरितिचेन्न निर्दिश्यमानत्वाभावेन वारणात् नचाबाजूविषयेनसा तस्याः तिङं तविषयादावेव प्रवृत्तेरुक्तत्वात् नचैवमनुकेइ
त्यसंगतंतस्यासाधुत्वात् परंतुक्विवंतेपीष्टमेवमुत्वमितिनामुके इत्यसंगतमित्याहुः॥ शाब्दांतरेति· दीर्घेकृतेतद्व्यक्तेरभावेन ह्रस्व स्यापिशब्दां
तरप्राप्तिकत्वमितिचिंत्यम्· परनिमित्तकत्वेनेति सुस्यूर्षति·सुस्यूर्षति इत्यादावप्युक्तांतरंगत्वात् द्वित्वे अभ्यासेउकारस्य ग्रहणानापत्तिरिति
तादृशांतरंगत्वं चुंचुपूचणयोर्यङ् वृद्धिकृतलक्ष्यभेदानाश्रयणमिति एवोच्यतेत्रविषयेजातवहिरंगस्थलेएव· नतुसमकालप्राप्ति
केइत्युक्तम्॥ एवंचप्रकृतेपिनान्तरंगत्वमितिचिन्त्यमेतत् यद्वाउदवोढामित्यर्थमेकव्यक्तित्वनिविकारकृतलक्ष्यभेदानाश्रयणमित्ये
वोच्यते॥ प्रकृतेतुव्यक्तिद्वयवृत्तिदीर्घइकारस्यभेदएवेतिनलक्ष्येलक्षणन्यायप्रवृत्तिः॥ ॥ननूषतुरित्यत्रव्यक्तिद्वयवृत्तित्वात् पुनर्ह्र
स्वापत्तिरितिचेदेवंवक्ष्यामः पूर्वोक्ताकारस्यनपुंसकत्वमुत्तरस्यतुपुंस्त्वंतयोः समाहारेसुबोधात्विति अपेक्षयापूर्वेदीर्घह्रस्वइष्टसिद्धि
रितिचिंत्यमेवैतत् उकालइत्यपिचिंत्यमेवतन्मतेप्युकारेणासवर्णग्रहणात् असंदेहायह्रस्वोच्चारितइतिचेन्नत्वंप्रकृतेपिवाच्यमिति वस्तुतस्त
स्वीकारेसनासंशेत्यादावापत्तिः अदेशएवेत्युक्तेतुसंकोचएवदोषःस्यात् किंचोदुपधायाइत्यत्रानेनैवसिद्धेप्रश्लेषपरभाष्यविरोधः किंचभा
व्यमानेनेत्यत्रस्वरितातिरिक्तविशेषणानिषेधाप्राप्त्यावैयर्थ्याभावः अष्टादशानांग्रहणंतुनतत्रप्रयोजनाभावात् स्वरमात्रस्यैवोपयोगात् किं
चतपरप्राप्तस्यनानयानिषेधइतिपश्चिमवीत्यत्रशेखरउक्तत्वात् तपरकरणंचरितार्थमेव किंचादसोमादित्यायत्तेनेनप्रश्लेषसिद्धौप्रयोजनाभावः ना

वद्धकारे एवं प्रगृह्यार्थं चरितार्थम् अत्रापि अदसः अमुः आदेशविधानेनैव सिद्धे गुरूपन्यासादेव नास्ति सिद्धिः अमुके इत्यत्र सर्वादेशापत्तिश्चेति
नस्यासाधुतायाउक्तत्वात् अदमुयङ् इत्येन तत्त्वाद द्यङ् इत्येव सिद्धान्तयिष्यमाणत्वात् अत एव द्वयं नाश्रयणीयमित्यन्यत्र विस्तरः ॥ मेचावेस्य
कमिति इदं तु न तत्वं भसंज्ञापदत्व पेक्षांत्वीयेपि भवतीति न पदं तु भाष्यारीतिना लोपद्रुतिसूत्रेपि यच्चिभमिति भ्यामि भवत्यापदत्वप्रतिबंधात्
लोपाभावार्थं कार्यकालत्वं युक्तमेव किं चाष्टाध्यायीक्रमपरत्वाश्रयणात् परत्वात् भसंज्ञैवेति न दोष इति तत्वम् एवं च भाष्यमपि नैकदे
स्युक्तिः अंगेन प्रत्ययाक्षेपस्य सर्वत्रोक्तेः प्रत्यय इत्युपस्थित स्यानो विशेषणाच्च उत्थिताकांक्षत्वमत्र निरस्तम् अत्र विषये इति तेन-
आत्वविषयस्यापि संग्रहः ॥ मानाभावादिति अत्र गुरुचरणाः कश्चिदं त्यसदेशानं त्यसदेशयोः प्राप्तिप्रसिद्धे अंत्यसदेशोर्थस्यैति रत्रोत्वस्य
तथात्वेपि न प्रवृत्तिः अव्यवधानगर्भानंत्यसदेशस्यैव विकाराभावात् अमुमित्यत्रात्वस्यापि प्राप्तेः मकारात्वेपि न प्रवृत्तिः एकप्रयोगे द्विश्चेद्
त्यसदेशानंत्यसदेशयोः प्राप्त्यभावात् रेफेणाव्यवधानादंत्यसदेशत्वाभावात् अत एवोक्तं एकेति भाष्यप्रयोग उपपन्नः अन्यथांत्यसदे
शत्वाभावात् मुत्वानापत्तिः तस्माद् प्रवृत्तिरेव युक्तेति नाप्यदमुयङिति निर्मवितव्यमिति भाष्यविरोधः तत्र अः सेरिति पक्षे एव भवितव्यं तत्र
स्यादिति शंकायामुक्तं चेति समाधानेनादोषात् समाधानं तु केचिदित्युक्तमिति वस्तुतस्तु येनेत्येवेति भाष्याशयेनादोषात् तस्माददद्यङ् इ-
त्येवैष्ट न द्वयमिति सिद्धान्तमाहुः ॥ अत एव हि प्रयुक्त इति सुधियः । समोमिङिति नन्वकविरुद्धेनेविशिष्टस्यादेशार्थं मध्यान्याप्ते एवास्तु इति शं

कावसरइतिचेन्न सर्वनामसाहचर्येणाव्ययादपिवाचकत्वरूपप्राधान्यएवप्रहृत्तिर्नतुद्योतकस्थलेप्रकृतेतुसमोद्योतकत्वान्नोकचःप्रसंगइ-
तितात्पर्यात् ननुनलोपोनञइत्यत्राशिनिन्यासेऽकञ्चासणइत्यत्रदोषदानसाहचर्येणाभिप्रेतमितिचेदुच्यते उपसर्गस्याप्रताविव्यत्रभा
ष्येणोपसर्गविषयेऽकचोऽनभिधानात् तत्रहि अयतावित्युपसर्गविशेषणं रेफस्यवाआद्येपरेःप्रतिषेधःअंत्येप्रतेरपूर्वविधिरित्युक्तमुय
द्यकच् उपसर्गेस्यात्तदापरिवदकच्यपिनिषेधआवश्यकइतितदनुक्त्याऽनभिधानमावश्यकमित्याहुः तिरसः अत्रांतिर्यइति अनीति अती
तिवास्तुइतिकेचित्॥ अयंविचारःआद्ये अमंचतीत्याङ्इत्यत्राकारपरत्वादापत्तिः अलोपग्रहणे तुएकादेशापहृतरूपलोपसत्त्वेननापत्ति
द्वितीयेपि अइत्यस्यानुकरणेप्रकृतिवदनुकरणेनेतिपक्षेअआङ्इत्यत्र अपदांतादकारादतोगुणेइतिपररूपे आदेशःस्यात् अले
पग्रहणेतूक्तरीत्यादेशइतिनदोषइतिचेन्न अतीत्युक्तेआङि त्यत्रदोषतादवस्थ्यात् अतःपक्षद्वयंतुसर्वत्रएवेत्याहुः॥नांचेःकृढस्ये
ति ननुप्राचीनंइतिविशिष्टरूढत्वस्यात्रुष्टत्वेनवक्तुमशक्यत्वात्यौगिकेनलोपानापत्तिः पूजायाअगम्यमानत्वादितिवाच्यम् प्राचोनंपदंक
चित् पूजयोपादीयाते क्वचिन्निवृत्यंवलोपयुक्तःप्रयोगः पूजायांतुनकारंसहितएवेतिकेचित् अपास्तमिति वस्तुतउक्तरीत्यानकारस्या
वश्यकत्वेनात्रनियमगौरवेणचतदयुक्तमेवेतिभाति एतेनांचुगतावचिपूजायामितिपठ्यते इदित्वादेवनलोपाभावेननांचेरितिसूत्रमेव
व्यर्थमित्यपास्तम् पूजागम्यत्वेपिनलोपापत्तेः अंचुपूजितेचामित्यत्रेकारकरणादचिइत्यस्यअग्रहणापत्तेश्चउकारादङ्करणोमस्यां…

हणे अचि इत्येके इत्यस्याप्याप्तेः तत्राकारांतत्वाद्वानुबंधकत्वाद्ग्रहणमितिचेद्गौरवमेवेतिदिक्॥ नोपधत्वेति कुंच्याद्वित्यत्र प्राप्तु
तत्त्वं तत्र नोपधप्रयोजनं कुंच्यादिति तत्र कुचिइतीदित्पठनेनापिसिद्धमितिकुंचेतिपाठो व्यर्थः स्यादतोऽयं न नोपधः कथं तर्हि वुञ्त्वमाशंक्यनितेन
र्हितत् भाष्यात् कुत्वविषयेऽनुस्वारपरसवर्णत्वयोः सिद्धत्वमेव प्रतिपाद्यताम् आशीर्लिङि कुंच्यादित्येवरूपमस्त्विति चेत् चिंत्यमेत.
त् शतृवदिति ननु अत्तप्रत्ययांतात् एव निपात्यतां किमनेन गुरुभूतेनेति वाच्यम् अत्तप्रत्ययस्य प्रकरणे पठितत्वाभावात् पूरणगुणेति
निषेधार्थमपि शतृवदित्यति देशस्यावश्यकत्वाच्चेत्याहुः॥ अत्वसं अनुवादकमिति वस्तुतस्तूच्यमाणे सत्प्रतिपन्थ्यर्थं तेन चंद्रयतेः
क्विपि चंद्रमित्यत्र न दीर्घः णिलोपस्य तु नस्थानिवत्त्वं दीर्घविधौ तन्निषेधात् टिलोपः स्यादिति मतेऽदोषेण कथं तदुपरिन्यासव्याख्यानेन निर्वाह
इति दोषोदत्तः एतद्वचनेन न निर्वाहादितिचेन्न इदमपूर्ववचनं न किंतु अवयव इत्यस्यत्व आदेशस्थानिवन्मूलकः ऋणकारं घटकत्वमारोप्य
ते इत्यारोपमूलको वा तत्राद्येऽनेकांतवादिनामुपरि न दोषः अंत्ये तु स्वावयवावयविनि स्वघटकत्वमारोप्यते इति तत्स्वावयवत्वस्यैवाभा
वे न तदवयविनि तद्घटकत्वस्यारोपेपि नमशक्यत्वव्याख्यानाश्रयस्यावश्यकत्वमिति न विरोध इति यत्किंचिदेतत् अत्रेदं तत्त्वं नोपधा
याइत्सु पधापदाभावे प्रकृते कृते नुमि दीर्घस्य चारितार्थ्यसंभवात् तक्रकौंडिन्यन्यायेन दीर्घेण नुमो बाधापत्तिः तत्सत्त्वे नवकाशत्वाद्बाधे पु
नरुत्सर्गप्रवृत्तिर्भवतीति न दोष इति सुधियः केचित्तु परमोपदेशिकात्वं तक्रभार्थमतुप्यपि हलेत्यमिति संस्कारानंतरमानुमानिकादेशत्वंस

मत्स्येवेति॰ अपितु उपसंख्यानेनापूर्वमित्याहुः नलोपिन इति॰ यथाश्रुते प्राङ्‌ब्राह्मणीत्यत्रोगित इति ङीबापत्तिः उभेलक्षणानु इति वस्तुतस्तु
उभशब्दस्य द्वित्वावच्छिन्नबोधकत्वादुद्देश्यतावच्छेदकद्वित्वरूपमेकमेवेति न वाक्यभेदः किंच विधेयतावच्छेदकभेदेन वाक्यभेदेऽपि उद्देश्य
तावच्छेदकभेदे वाक्यभेद एव न यथा घटपटौ स्त इति अत्र ननु गर्गादिष्वत्र शातनिष्ठत्वत्वनिष्ठत्वत्वनिष्ठत्ति विधेयाधारत्वस्वत्वनिष्ठत्वनिपूर्व
कम्बास्वत्वप्रकारक इच्छायां दंड न पदार्थत्वात् एवं च निष्ठत्वेरेकत्वेपि विधेयतावच्छेदकं यतत्वम् तथा च वाक्यभेदादेव वाक्यभेदो न तु वि
धेयतावच्छेदकभेदादिति स्वीकारेण प्रकृते विधेयतायां अभेदेनादोषात् बहुत्वत्वेन विधेयतावच्छेदकमानंत्यप्रसंगात् अपि तु स्वत्वेना
नुगतरूपेणेति नं विधेयतावच्छेदकं भिन्नं नच श्रतनिष्ठत्ति गर्गेषु नास्तीति वाच्यम् एकदेशद्वारासंत्वादित्यलम् असमर्थात्ि प्रयोजनाभावे स
त्यशब्दार्थप्रयोजनकथनस्योपहासपरत्वादिति भावः॥ अन्तरंगत्वादिति॰ वस्तुतो वा भवतु इत्यत्राभ्यस्तस्वरानापत्तेरिदं अयन सूत्रविषय
कमेव अन्यथा अंतरंगत्वादुपादेशे तदाशयस्य वाभावेन तद्विचारासंगतिः एवं चांतरंगत्वादिनयुक्तमेवेति बोध्यम् किंचेत्यपयुक्तमेवः अज
स्त्वित्यत्र जुसम्बारिताखेन सामर्थ्याभावात् सामर्थ्यमूलक एव प्रवृत्तेः तत्रापि श्रावभ्यस्तसंज्ञायापेक्षया बहिरंगत्वादिति स्यादेव नित्य असामर्थ्य
रूपपादमिति॥ केचित्तु॰ नदोष इति॰ वस्तुतस्तस्मिन्नित्यत्रैकादेशे परादिवत्वेन सत्वेप्यभ्यस्तत्वाभावः नचैकदेशविकृतन्यायेन तत्संनस्य फला
भावेनानाश्रयणात् अत एव तस्थानिवत्सूत्रे इमामुपन्यस्यैकदेशविकृतस्येति वक्तव्यमित्युक्तम् तत्र वक्तव्यभवतीत्यस्य फलमुक्तंस्य

सिद्धिरूपमुक्तं भाष्ये॰ तदाश्रयणे वाऽर्द्धविकारे तत्प्रवृत्तिरेवेति अत्राभ्यस्तत्वाभावादेकत्र दोषः एवं च समासानाश्रयणेपि न क्षतिः अभ्यस्तत्वाद्धि हि द्विर्वचनेन
नवारणं तत्व युक्तमेव जुहुवतुरित्यत्राभ्यस्तत्वानापत्तेः साहचर्यमपि पूर्वमुक्तमित्यलम् केचित्तु देवदत्तादयो भोज्यन्तामित्यत्र स्वीकारे प्रत्येकमर्थाप्र
त्तिरित्युभयग्रहणमित्याहुः॥ चिन्त्यमिति॰ केचित्तु बहुव्रीहिफलत्वेन मानम् स्वगिति भाष्योदाहरणेन अपवादत्वं युक्तमेव अन्यथा रज्जुसृड्भ्या
मित्यत्रेव षत्वापत्तेः न च कथमुपयट्कान्यनीत्यत्र षत्वं बहुव्रीह्यभिधेयापेक्षावधित्वस्य सर्जोनिरूप्य पदलक्षणस्य प्राग्युपसर्गोपलक्षणस्य चा
श्रयणेनादोषादित्याहुः॥ तन्निषेधादिति॰ ननु पदचरमावयवविधायकातिरिक्तस्य ग्रहणादत्राप्रवृत्तिरेवास्यात् न पदान्तेति सूत्रे स्वरविरोध
स्येति चेन्न लोपसमाननिमित्तकपदचरमावयवविधायकातिरिक्तस्य तत्र विवक्षणमित्याशयात् ननु कौलुप्तमित्येव दोष इति वाच्यं पिपठिष
तेः किं पूनिमित्तकाल् लोपस्य कौलुप्तत्वाभावात् तस्यासार्वत्रिकत्वाच्च पदसंज्ञानिमित्तकप्रत्ययनिमित्तकाभावादेशविषयत्वस्य वा परि-
त्कारेणादोषात् तस्मिन्प्रत्ययपरे यलोपः तस्मिन्प्रत्यये परे एव कार्य्यं कर्त्तव्यमित्यर्थे वा न दोषः तद्धितनिमित्तकलोपातिरिक्तलोपेन स्थानिव
दित्यर्थो वा तेन पंटयतेः पडित्यत्र जनयतेः जनू तनोतेस्तनू इति लापनेन जञ्ज्ञातइति अत्र श्रुत्वासिद्धं न्यस्यानिषेधाप्रवृत्त्या लोपस्य स्थानि
वत्वात्तदनापत्तिरितिस्मर्यमाणप्रत्ययनिमित्तकपदचरमावयवातिरिक्त इति वा निवेशनीय इति सुधियः॥ ॥नुमस्थानिकं इति॰ शारितिप्रत्याहा
रग्रहणमात्रमानं तदभावे केवलानुस्वारोपलक्षणार्थमेव नुम् ग्रहणमावश्यकं शर्प्रग्रहणे तु केवलानुस्वारस्य तत्पघटकत्वेन ग्रहणे सिद्धे तु

मूग्रहणसामर्थ्यात् तत्स्थानिकानुस्वारोपलक्षणार्थं नुमुद्दस्तु न गृह्यते विसर्गसाहचर्येण अयोगवाहस्यैव ग्रहणात् नुम्स्थानिकानुस्वा
र एव पर्यवसन्न वृत्तिबोध्यम्॥ तङिति॰ नन्वत्र संयोगादिलोपेन तस्यासिद्धत्वेन पुनः संयोगान्तलोपस्य प्राप्तिरेवेति चेन्न॰ नञ्कौण्डिन्यन्यायस्य
त्रिपाद्यांस्वीकारेणादोषात् एतन्मूलकमेव यं प्रत्ययपवाद्यत्वेन तस्यासिद्धत्वेन इत्युक्तम् इदमेव त्रिपाद्यां न्यायप्रवृत्तौ मूर्द्धाभिषिक्तोदाहरणमिष्यलम्
षत्वस्यासिद्धत्वेति अन्यथा षढोः कः इत्यापत्तिः तर्हि तन्निमित्तलोपातिरिक्तनिवेशे पदचरमावयवे तिन निवेशनीयमित्यपि लाघवमिति पडित्यत्र तुन
दोषः श्रूयमाणतद्धितेऽपि निमित्तत्वादिति दिक् विस्तर इति॰ ननु मधुश्च्योततीति मधुग्गीति कथमिति चेद् यं सोपधः तेन संयोगाद्विलोपे इष्टसिद्धिरि-
ति केचित्॰ दिधग्गीति॰ ननु दिदहित्ति उपदेशाभावाश्रयणं नापि दहित्युत्तरखंडस्योपदेशत्वम् आगंतूनामं तेनिवेशइति तस्य तत्त्वाभावात् नच-
स्थानिवत्त्वेन विशिष्टतत्त्वं॰ स्थाने द्वित्वानंगीकारात्॰ किंच स्थानिवत्त्वेनोपदेशो ग्रहीतुमशक्यः नच भवतद्वित्वत्त्वादुपदेशत्ववदत्र स्थानिवत्त्वेन तत्त्वं स्या
देव तत्र प्रत्ययस्यैव निमित्तत्वेनाश्रयणात् अदुपदेशप्रत्ययकालिको ग्राह्य इति तत्र स्थानिवत्त्वेन तदाश्रयणेऽपि अत्र कस्यापि निमित्त
त्वेनानाश्रयणात् उपदेशप्रत्ययकालिकस्य स्थानिवत्त्वेनोपदेशस्य ग्रहीतुमशक्यत्वेन हलंत्यमित्यत्रैव स्वभावसिद्धोपदेशस्य गृहीतुमशक्यत्वा
दुपदेशत्वाभावात् ह्रस्वाभाव एव मा इति चिंत्यमिति एवं च दिधड्डिति जैमिनीयोक्तमेव युक्तमिति सुधियः॥ वसोः॥ वसुसादेशेनेति॰ न च [illegible]
लम्भेद्युत्यस्यैव ग्रहणं स्यादिति वाच्यम् सामान्यग्रहणे नैकानुबंधस्य धातोरपीति ज्ञापनार्थ इति सकलेष्टसिद्धिरित्याशयात् एतेन [illegible]

वत्वेनैवागित्त्वे लब्धे उकारानुबंधवसोः सामान्यग्रहणार्थं भविष्यतीति भाष्यारूढमधिकसकारानुबंध नोत् संजनंव्यर्थमित्यपास्तम्। प्रत्ययाप्र
त्यययोः प्रत्ययस्यांगीकार्यत्वादिति केचित्। उकारोच्चारणसामर्थ्यादस्यापि ग्रहणम्। अपिनाएकांतत्वादेकस्यापस्थितत्वादन्यस्यैव प्रत्ययस्यैव ग्रहणमि
त्याच्च धातोरग्रहणं परिभाषां विनापि जातमिति अपिकेचिदाहुः नचैवं स्त्रंसदिति साहचर्यात्तत्र सूत्रे धातोर्ग्रहणापत्तिः अत्र वसोरिति· प्रत्य
यस्यैव ग्रहणात्तत्रापि तस्यैव ग्रहणौचित्यात् सांतेति विशेषणाच्च नहि धातोर्विशेषणे फलमस्ति। सर्वत्र सांतस्यैव सत्वेनाव्यभिचारादिति दि
क्। परेत्विति वस्वेकेन्यस्यापि प्रतिपदोक्तत्वमिति चेत् सदइत्यवस्थायामेत्वलोपाभ्यामेव प्रतिपदोक्तत्वात् संप्रसारणेनाधइत्यन्यत्र
विस्तरः॥ पुंसो० वस्तुतइति० गोरवादेत्तदुक्तं सुवक्तं भवति। अदरूः। प्रसिद्धेरिति· नचतत्क्रन्यायेन सिद्धिः इत्यादिसिद्धयेन दाराविषये तदप्र
वृत्तिस्वीकारात् ननु अनंत्यग्रहणप्रत्याख्यानेदमेवेति नियमे प्रकृतेऽहं यदि स्यात् टकाराभावेन सनियमोऽसंगतः स्यादित्तस्सामर्थ्यादंत्व
नप्रवर्तत इत्यदोषः किंच परत्वात्तत्त्वे सकृद्गतिन्यायेन तस्य दाघत्वमितिसुवचमेवेति चेन्न तत्प्रत्याख्यानपक्षमादायैतत्ग्रंथप्रवृत्तेः वस्तु
तस्त्यदादीनामदइत्यत्र विभक्तौ इति विषयसप्तमीविहितविशेषणादिगौरवात् सैव चिंत्यमित्युक्तत्वात् एवं च सकारस्यात्वे पररूपे ओ अदे शटि
लोप इति न्यायेन पुनरत्वाप्रवृत्त्याऽदोषात् नच पररूपात् पूर्वमेवांतरंगत्वात् लोपेऽसकावित्यत्रापि ओङः स्यापत्तिः ओकारविभक्तित्वा
दिति वाच्यं द्विवचनोकारविभक्तेरेवोङिति संज्ञास्वीकारात् प्रत्ययस्यादिति इत्यापत्तिरिति चेत् डित्वसामर्थ्यात् पररूपानंतरमेव टिलोपस्य वक्तव्य

त्वात् अन्यथासोरीरितिवदेवं चेदं चिन्त्यमित्याहुः॥ नमुने· ननु मुग्रहणंमास्तुइतिचेन्न· पंचानाममुनेत्यत्रनाभावेकृतेनलोपस्यान्यथासिद्धत्वनिषेधा
पत्याऽत्रानंतरत्वेनामेषांवर्णामितिस्वरापत्तेः नेदृतेव्यवहितस्यैवासिद्धत्वनिषेधइतिनदोषइतिचेदत्रने ७ इत्यस्यविषयस्याप्रसक्तत्वेनोपश्लेषिकस
प्तम्यभावेनतस्मिन्नितिपरिभाषायाः अप्रवृत्त्याव्यवहितत्वंशास्त्रलब्धुंशक्यत्वादितिदिक्॥ इतिहलन्ताः पुल्लिङ्गाः॥ पश्चइति पश्चस्यादिरि
तिपक्षेनुगतिकारकेतिसूत्रंनेनसमासेपदत्वाभावेननिषेधोनेतितत्त्वम् प्रत्युक्तः पंचमीसमासेनद्रूसेनावित्यत्रनिघातापत्तिरितिवोध्यम्॥ अ
पो· व्याख्यानादिति· सानुबंधकपरिभाषायाउभयोः सत्वेशास्त्रीयग्रहणमत्रपुलौकिकएवसंभवतीतिभावः नचप्रत्ययाप्रत्ययग्रयोरितिन्यायेनदो
षः तदभावात् अष्टिरितिनिर्देशाच्चेत्याहुः॥ इतिहलन्ताः स्त्रीलिङ्गाः॥ उत्तरपदत्वे। ननुकार्यित्वनिवेशेफलसत्त्वेपिप्रमाणाभावइतिचेन्न पदा
दिविधाविति पर्युदासएवावेक्षि· तथाहिपूर्वकाला व्यवहितकालवृत्तिर्हिपदादिविधिर्यथासेचइति॥ सकारस्यपूर्वकालाव्यवहि
तकालवृत्तित्वं एवंचतत्साहचर्यात्परकालाव्यवहितकालवृत्तिरूपपदांतकार्यएव· तथाचकार्यित्वनिवेशोऽर्थात्फलितः यद्वाऽत्राभाववृत्तित्वे
नसाहचर्य्यंयथासतत्त्यत्रप्रागभाववृत्तित्वंतथाचध्वंसवृत्तित्वंपदांतकार्यएवेतिनपरव्यवायेपीत्येतद्विषयेप्रवृत्तिः॥ अभक्तत्वप्रतियोगित्वे
नवासादृश्यमितिनदोषः नचपदादिविधिर्नोन्तेत्यादौणत्वविधौपूर्वस्याभावेनपूर्वकालाव्यवहितकालवृत्तित्वंवाधितमितिवाच्यम्‌ उ
त्तरपदका· कार्यपदादिविधेस्तथात्वेनारोपात् ननुपदप्रयुक्तकार्येउत्तरपदीयेकर्तव्येपूर्वपदीयपरत्वस्यापिनिषेधादितिचेन्न· उत्तरपदी

येनेतिनिवेशेनोत्तरपदसंबंधिनिकार्येइतिनिवेशेनवादोषात्॥ अत्रान्यकार्यित्वादिफलमुक्तं ङमुट्सूत्रे॰ अनभिधानमिति॰ अभिधानंहि
गनिकारकेनिसुबुत्पत्तेः प्राक्समासेऽपदत्वादनिष्टः स्यादितिभावः मसलिखितइति ननुमधुशब्दात् यत्रंताद्बहुवचनेजसि ... लुकि
ह्रस्वस्यगुणोभवति तत्रप्रत्ययलक्षणादेङः परांतादितिदुर्वारं नचानेननिषेधः उत्तरपदत्वाभावात् एतत्प्रत्याख्यानेतुयजादौसर्वनामस्थाने
पूर्वस्य॥ परत्वनिषेधेनादोषादितिचेन्न उत्तरशब्देनउत्तरपदंनलक्ष्यतेकिंतुवृत्तिचरमवर्ति तथाचप्रकृतेनिषेधसोलभ्यमितिबोध्यम्
युक्तंचैतत् अन्यथाप्रत्याख्यानेऽस्मादेवाचारक्विपिशपिमधवतिशंभवतीत्यत्रगुणेकृतेपूर्वरूपापत्तिः अत्रसर्वनामस्थानाभावेन
तस्यनिषेद्धुमशक्यत्वात्॰ मन्मतेवृत्तिचरमएवसइतिनिषेधः स्पष्टएवेतिदिक् संबध्यतइति॰ ननुतत्संबंधिएनसौरित्यत्रचारि
तार्थ्यात् सामर्थ्याद्वा लुकालुकेपिइत्यसंगतमितिचेन्न॰ प्राचीनानुरोधित्वात्॰ तस्यस्वमतेह्येकवचनएवेतिबोध्यम् इदमत्रतत्त्व
म्॰ एनोनवक्तव्यः नचतत्रन्यायेनत्यदाद्यत्वबाधः त्यदादिविषयेऽप्रवृत्तेरुक्तत्वात् यदिसोपिनदोषावहः एतदेवकर्तव्यमिति भगवतः सिद्धांतस्त
त्रैनदेवकर्तव्यइतिशंकितेऽपरेयद्यनतक्रियतेतर्ह्येनोपिनकार्यइतितदुपर्युपहासपरतयातत्साधकत्वादितिसुधियः॥ ननुउपसर्जनेतकारचा
रितार्थ्यमतः सामर्थ्याभावइत्यतआह॰ अनयोरिति॥ अहन्॰ निषेधेनापीति॰ अपिनातक्रन्यायः ननुनिषेधविषयेचारितार्थ्यात्॰ तक्रन्यायोमदृष्ट
इतिचेन्न ब्राह्मणेभ्योदधिदीयतांतक्रंकौडिन्यायेत्यत्रबाधदर्शनात् नचवाक्यद्वयकार्यंवाक्यत्रयकरणसामर्थ्यात्बाधोस्तु अत्रकिंगम

कमितिवाच्यम् ब्राह्मणेभ्यो गोडेभ्यो दधितक्रं श्मश्रुमलं व इत्यत्र वाक्यद्वयेपि बाधदर्शनात् अप्राचीनग्रामामानहस्वाम्भोम्ना ऐं वर्हिणस्तेन्य पोप
इत्यत्र च दर्शनात् ननु न ङि इति निषेधं पर्यालोच्य नलोप इत्यस्य संकोचे प्राप्तिरपि दुर्लभेति चेन्न संकोचस्य वाक्यार्थकालिकत्वेन वाक्यार्थात्
र्वमेव च व्याप्यव्यापकज्ञानसत्त्वेन पूर्वं शास्त्रस्यैतद्बाधकज्ञानादेतद्विषयसंकोचसुलभतया दोषात् निषेधशास्त्रस्य च प्रतियोग्यपेक्षत्वेन पूर्वेत-
त्संकोचाभावात् नव्याहयते: क्विपि अह इत्यत्र नान्तत्वाभावात् कथं नान्तप्रातिपदिकत्वम् अहन् शब्दे इति वाच्यम् पदान्ताहन् शब्दस्य सर्वत्र-
नान्तस्यैव सत्त्वेन तस्य तद्व्याप्यतया सौलभ्यादिति दिक् विभावयन्तु सुधियः॥ इङ्गीति इयमन्नीति वैदिकप्रयोगात् असंस्त्रीलिंगत्वेन पुनपुं
सकयोरेवेति न प्रमाणमिति किं वत्रकर्णेरि बहूजीति ननु अन इत्येवं कृत्वा तस्यैवानुवृत्त्या सिद्धे प्रत्याहारग्रहणं व्यर्थमिति चेत् पक्षस्येदं यमप
राक्त इति तत्त्वम् अच इत्यनुकृष्य इक्र इति न कार्यमिति तु न ओड् स्यामित्यारंभेण सन्निपातेन परत्वेन ओड् भ्यस् ओ: सु अदोषेपि समुच्चयकव
चनेकारान्तेपि नुमाभूत् [illegible] दिक्॥ षाण्मासिक इति अयमपपाठः। ठनिषण्मासिक इत्यपेक्षितत्वात् नुम्नेति वस्तुतः सर्वनामस्थानत्वमेव नन
पुंसकत्वादिति चिन्त्यम् अम्बेति॥ समासे॥ भृतशब्दस्य पंचशान्तपरत्वमेवमस्ति शब्दस्य विंशतिपरत्वम् अन्यथाभूतादेः पंचद्विसं [illegible] त्वेन
चतुर्दशसंख्यात्वस्यैवापत्तेः। आच्छी परोयः शतेनेति इदमेव युक्तम् अन्यथा शतभिन्नावयवेत्यर्थेपि शतकारे समुदायावयवे [illegible] याप
तिरेव स्यादिति शतभिन्नावयवार्थवान् ग्राह्य इत्युक्ते गौरवं स्यात् पूर्वान्तत्वेन तत्संख्यत्रार्थवत्त्वं तत्रैव प्रवृत्तिरन्यत्र तु नेति कल्पनं चेत् न चाव

मतेऽपवर्गाभावः पक्षत्वेनदृष्टोयः शत्तेतिव्याख्यानेनादोषात् उक्तगौरवेणास्याकिंचित्करत्वात् इत्याहुरिति उक्तभाष्यद्वयविरोधः नवंपरि
हार्यइतिविस्मयम् अन्येतुक्तदिषः आकृतित्वेत्तणेश्वेवप्रसिद्धमितिछदिरुपधीत्यस्यप्रतिपदविधित्वेपि चर्मणि तदप्रसिद्धेः प्रक्रि[illegible]
भावाच्चर्मणोऽनित्यस्यापरित्वीनत्वात्तो पूर्वविप्रतिषेधारंभइत्येकेऽत्रपरिहरन्ति अन्यत्रशीघ्रोपस्थितिकत्वान्नित्यविहितं[illegible]प्रभृतिभिः
कपोबाधसंभवेपितथाविधकपूर्वविधेरप्रवृत्तिपक्षेऽद्वैजानुरित्यत्र पाक्षिककपोनिष्टस्यापत्तौभाष्यतात्पर्यान्नसः किंतु[illegible]
पाक्षिकोऽनुरित्याहुः अपरेतु लोहितान्मणावित्यनेनपुंसि चारितार्थ्येन स्त्रियांप्रतिपद्विधानमात्रात्लिंगबोधकप्रत्ययस्य[illegible]प्राप्तेः क्रियमा
णाल्लोहिताल्लिंगबाधनंवेति तद्वार्तिकतद्रुद्रोक्तभाष्यद्वयेप्येकदेश्युक्तित्वं कल्पयतः तुल्यन्यायात् प्रकृते प्रा[illegible]स्यापिदीर्घस्या
ऽनित्यत्वं परिभाषयानुम् अकारनिष्ठोपधात्वस्यविनाशोन्मुखत्वेनदीर्घाप्रवृत्तेः स्वंपात्येकमेवेत्याहुः इतिनपुंसकलिंगाः ॥ स्वरादि॰ आपत्तेरिति
ननुचादयोऽसत्त्वे इत्येवंपाठेन तत्रनदोषः ननुस्वरादयोऽसत्त्वेइति पाठेस्वरादीनामसत्त्वएवाव्ययत्वापत्तिः अव्ययमितिमहासंज्ञयासिद्धांते
पि असत्त्वएवेष्टत्वात्तत्वत्ववाचकानांतुक्वचित्सतिगमकएवेतिनदोषइतिचेन्न तत्रचचादयइतिपदद्वयकरणेननिपातप्रदेशेषुचादिपाठेनगौ
रवापत्तेः यदिसंज्ञाप्रदेशेषुनिपातादित्यव्ययमित्युच्यतेतदानसिद्धान्तेनसममेवस्वरादिसूत्रेनिपातग्रहणंनकार्यमितितु अत्रपक्षेलाघवं न
चोपसर्गादीनामप्युदात्तानापत्तिश्चादित्वाभावादितिवाच्यम् चादिगणएवोपसर्गाइत्यारभ्याधिरीश्वरेइत्यन्तपाठेनचादित्वसिद्धेः प्रादयइतिचन

स॰ भ॰
१२८

कार्यमितिचल्लाघवं नचचादीनामप्युपसर्गगत्योरप्यापत्तिरूपादिग्रहणस्यनियमार्थत्वात् नचकर्मप्रवचनीयेष्वपिउपसर्गगत्योरप्यापत्तिरुपसर्गा
दीनांगणेपाठत्वेननिपातवत् कर्मप्रवचनीयत्वाप्राप्त्यापिसमावेशइतिवाच्यम् कर्मप्रवचनीयाइत्यत्रकर्मप्रवचनीयाएवेतिपठित्वागत्यादिबाध
सिद्धेः अन्ययोगव्यवच्छेदोहि एवकारेणस्वघटितपदत्यागे एवनिवेशेचकिंलाघवमितिचेदेकंपदंकार्यमितिविशेषः इदमत्रतत्त्वं स्वरादयो-
व्ययमित्येवसूत्र्यंतांचादयोपितत्रैवपाठ्याः चादौप्रादयएवउपसर्गाइत्येवकारेणोपसर्गादिबाधश्चादीनांचादयआद्युदात्ताइत्येवचपाठ्यमस्त्व
सत्त्वइतिपठित्वाचादीनांपाठः कार्यः तत्रकर्त्तव्यंवा तथाचचादयोऽसत्त्वइतिप्राग्रीश्वरान्निपाताइतिस्वरादिनिपातमित्यत्रनिपाताइतिचनकार्यमि
ति॰ एतत्पक्षेपिपातपदमनुक्तमपिलाघवं निपाताएकाचइत्यादिषुचादयइतिपाठेचगौरवेपिसमपदाकरणात् मात्रालाघवंत्वतिशयितमेव॰
नचसंज्ञाकृतलाघवंतदनाश्रयणस्योक्तत्वात् ननुस्वरादिषुचादिपाठेस्वरादेराकृतिगणत्वात् अप्रतिरिक्ताव्ययानामसंभवेपाठेतेषांचादित्वस्या-
प्यापत्त्याद्युदात्तापत्तिरितिचेन्न आकृतिगणोऽन्त्यएवपाठ्यइत्यत्रविनिगमकाभावेनचादितः पूर्वमेवतेषांपाठेनादोषादितिसंक्षेपः यत्त्वानुपर्यवत्ताप
रममधुरइतिमात्सर्यमुक्तोऽर्थविचारयंतुसुधियः॥सत्त्ववाचकाइति॰॥स्वरादिषुसत्त्ववाचकत्वेप्यव्ययत्वस्वीकारादितिचिंत्य[illegible]साहकस्तु-
चिंत्यः गमकेएवतत्स्वीकारात् वामिति यद्यपिविभक्त्यन्तार्थेननसादृश्यंतथापिप्रकृत्यर्थेनताखम्॥ तत्तदर्थेति॰ यद्यप्येकस्यैवद्विरु[illegible]
तथाप्येकगच्छत्वस्यप्रकृतिपरत्वेनैकस्यप्रत्ययपरत्वेनतत्संभवः नचतच्छिन्नोविंत्यत्रतदित्यस्यतस्मादित्यर्थेकेनप्रथमांतविदि[illegible]नता

राम॰
१२॰

मानाधिकरण्याभावात् द्वंद्वोऽनुलभः परिनिष्ठितविभक्त्या समासेनादोषात् नहि द्वंद्वसूत्रे शेषग्रहणस्यानुवृत्तिर्येन प्रथमान्तानामेव स[illegible]
अत्र केचित् यद्वि भक्तिसमानानुपूर्वीकत्वं तद्धि भक्तिसमानार्थकत्वमेव प्रत्यासत्त्येति कामित्यादीनां पाठं विनाऽव्ययत्वानुपप[illegible]रित्याहुः ॥ साधी
यद्विति । अस्य साधीयस्त्वं [illegible]भाष्यात् ॥ सर्वेति । अत्र विभक्तिपदं त्रित्वे पर्यवसन्नं प्रत्येकमेकवचनादाविति भावः द्वितीयेवेति । द्वितीयायाः कर्मत्वमे
वार्थे नान्ययोः दर्शोऽपेक्षत्वम् । त्रयाणामिति । अन्यथा कपिंजलाधिकरणन्यायेनायमेकः इमे त्रय इत्यपि स्याद् बुद्धिरेव च तु[illegible]निकाः प्रथमोपस्थि
तत्रित्वावच्छिन्नबोधनेनैव बहुवचनसार्थक्यं तद्धि यथ्यैस्पष्टमेव अत्रेदं तत्त्वम् । सर्वविभक्त्येकवचनत्वाङ्गीकारे गंगादेर्नियमेन सर्वविभक्त्ये
कवचनापत्तिर्नहि तथाचानुभवः ॥ तस्मादेकैवविभक्तिस्तत्रस्वस्थितः इत्यत्र सप्तम्येव स्वर्गे तद् इत्यादौ पंचम्येव एवं चतुर्थ्युप इत्यादौ हि प्र
त्याहारश्चरितार्थः तत्र तत्र सप्तमीपंचम्यादेर्लुगर्थत्वात् त्वदुक्तासर्वविभक्तित्वमयुक्तम् उक्तयुक्तेः न च येषामपादानादिर्नास्ति तेषां
नु सर्वैकवचनापत्तिरितिवाच्यम् अर्थे प्रथमेत्येव वक्तव्ये प्रातिपदिकग्रहणात् प्रथमैवेत्यदोषात् कर्मादियोग्येत्यर्थस्तु न प्रातिपदिकप.
दवैयर्थ्यापत्तेः किंच पचतिकल्पमित्यादौ सदुर्वारः विशिष्टकर्तृत्वस्य केनाप्यनुक्तत्वात् ॥ कृन्मे । संज्ञायामपीति । अत एव तेभ्य एषामि
त्यादिसिद्धिः आद्ये येन विधिस्तदंतसंज्ञा प्रतिपदाद्यत्वस्यासिद्धत्वापत्त्यादंतत्वापत्तिः अन्त्ये गुरुसंज्ञाप्रतिदीर्घस्यासिद्धत्वात्तस्या अप्य.
नापत्तिः वस्तुतः अव्ययीभावश्चेत्यत्र सामर्थ्यात् महासंज्ञायास्त्यागेऽपि एतद्विषये महासंज्ञायास्त्यागे मानाभावदिति सुधियः ॥ अयंभावइति ।

स· भ·
१२१

॥ नन्वस्यवस्तुनः कल्पेननवेलक्षण्यम् अतएवध्वननपरत्वेनतदर्थलापनंकुर्वतीतिकेचिदितिचेन्न· अयंभावः कल्पेसामानाधिकरण्य
संबंधेनलिंगान्वयित्वंविशिष्टस्यनकेवलस्येत्याशयः द्वितीयेकेवलस्यापिनेत्याक्षेपात् ननुतथापिवस्तुनोग्रंथेनातएवेत्यसंगतंतत्प्रत्याख्यान
रीतेरभावादितिचेन्न सर्वनामसंज्ञासाहचर्येणास्याप्यन्यार्थत्वेनप्रत्याख्यानेनादोषात् प्रधानन्यायोपन्यासस्तुचिन्त्यः वृद्धोयूनेत्यादिगमके
एवतत्प्रवृत्तेरितिदिक् उच्चैराविति· अकारोवासुदेवस्तस्मादोप्रत्ययः परादित्वेनसुपूर्त्वेएवमिदमूशब्दात्भ्यामिद्वितीयमपिनचसमासेउप
सर्जनत्वमेवेतिवास्यम् कुगतिसमासेउभयपदार्थप्राधान्यात् उच्चैरभ्यामित्यादावदोषात् ननुप्रत्ययग्रहणपरिभाषयैवात्रलुक्नप्राप्तः
नीतिकथमनभिधानमितिचेन्न अंत्येस्त्रीप्रत्ययेचानुपसर्जनेनेतिविषेधादितिकश्चित् प्रत्येकमेवेति स्वरेविशेषादितिशिवम्॥ हयग्रीवपदा
भोजद्वंद्वकारुण्यमूर्तये॥ मन्नाशेखरचंद्रस्यरचितावरचन्द्रिका १ चन्द्रिकायाअव्ययानिसमाप्तम्॥ ॥श्री॥ गदाविलि॥ निरूपितमिति॥ नच
महाशूद्रसमुदायस्यनिषेधेपिअवयवाट्टापूस्यादितिवाच्यं अमहत्पूर्वग्रहणवैयर्थ्यापत्तेः नच॥ समुदायनिषेधेअवयवादुत्पत्तौढक् अव
यवादेवेतितत्फलमितिवाच्यं स्त्रीवाचकेभ्यइत्यर्थेसमुदायादवयवाच्चप्राप्तौदृष्टप्रचलनन्यायेनावयवादनुत्पत्तेः नढक् भूकारेपोप्याप
द्येनेतिभाष्यविरोधः एतंन्यायेनावयवादनुत्पत्तेरितिवाच्यं स्त्रीप्रत्ययांतादित्यर्थस्यैवसिद्धांतत्वात् परंतुअनुपसर्जनादित्यनेनाप
विधौमहाशूद्रीतिनस्यादित्यमहदितिनिषेधः नचशूद्रशब्दार्थस्यस्त्रीत्वाभावः महाशूद्रेद्रतिस्त्रीत्वविवक्षायामपिनागेशमतेभिर्वाणप

रामः
१२१

नचाद्यं तल्लक्षणष्टाप् ङीषावाधात् वस्तुतोविवक्षादिकमप्रयोजकम् उपजनिष्यतेतिन्यायेनसमासात्प्राक्टावनुत्पादात् अवयवेजात्यारोपेण
जातिसत्वाट्टाप्स्यादेवेतिचेन्न प्रियामरुतीशूद्रायस्येतिविग्रहे यत्त्वीप्रत्ययांतंशूद्रेतिनतदुपसर्जनमितिह्रस्वोनस्यादित्यत्र बोध्यं [illegible]
नुङीप् अवयवाट्टाप्चस्यात्तत्रयस्येतिलोपेपिवृक्षेतिन्यायस्यफलभेदेऽप्रवृत्तेर्ढगापादानशंकेतिवोध्यं कुक्कुटाण्डेति [illegible]तिकाभा-
वेकुक्कुट्यण्डमितिस्यात् प्रत्याख्यानभाष्येणानभिधानात् टाट्विशेषात्तत्रभाष्यति नचपरत्वाट्टाच्चीत्यस्यापवादत्वात्तविशेष्यं प्रत्याख्या-
नभाष्येणपूर्वविप्रतिषेधांगीकारात् सूत्रारीत्येष्टस्येति पादंतकृतसमासांतस्यानभिधानेद्विपदीतिसामान्यतोपिनसि[illegible]तीतिभावः नचस-
त्रवैयर्थ्यमितिवाच्यं वानभिधानेसूत्रारीत्येतिग्रंथासंगतिरितिवाच्यं सूत्रमन्तेद्विपदीति सिद्धं कृत्वापश्चाट्टिगितिलोपेनसिध्यतितन्नसि-
ध्येदित्यर्थात्॰ नचैवमेकपादितिसिद्धं कृत्वाऽऽदिगितिलापनेसूत्रमन्तेपितत्सिध्यतीति अनभिधानशंकासंगतिरितिवाच्यम् अस्य
ग्रंथस्यचिंत्यत्वात् वस्तुतअभावपर्यंतव्यापारस्यलक्ष्यानुरोधेनव्यवस्थितेनंतयात्रनदभावेएकपदीत्यत्र कुंभभावपक्षेसत्वविनिसूत्रकारमते
ङीवंतस्यासिद्धिरित्याशयः त्यकनोकारस्येतित्तिकनीकारकरणेननेतिभाष्यं नचप्रक्रियालाघवेननत्याकरणंप्रथमोपस्थितत्वाकारत्यागेवीजाना-
प्तेस्लाट्टशालाघवानादरात् प्रत्ययस्थानचसर्वोद्दनिकृत्वानंतरमकचिपूर्वत्वेनदृष्टस्यकार्याभावेनस्थानिवत्वाप्रवृत्तेर्नतत्राव्यवधानेचारितार्थ्ये
नकारिकेत्यत्रस्थानिवत्त्वेनव्यवधानात्स्यात्समर्थानामित्यनुवृत्तेरितरत्रनंव्येरुकात्वात् कृतसंधेःकार्यविनत्वादितिवाच्यं क्षिपकादीनांचेतिनिषेधा-

स॰ भ॰
१३०

जज्ञापकात् व्यवहितेपिप्रवृत्तेः अत्रेदं तत्त्वम् आपि यः ककार इत्युक्तेस मर्थ्याज्ज्ञापकेनवा एकवर्णव्यवधानं सिद्धम् अपि योऽकार इत्युक्ते
त्तुवर्णाद्वयम् उदीचां न च स्त्रीबोधकाकारस्य मांकाम्यकेऽभावो वुनस्तत्र शक्तेरभावात् आमन्तिकान्ता॥ अस्या अज्ञाता अत्या अन्यकेत्यादौ वङ्या
पूग्रहणे दीर्घ इत्यस्य प्रत्याख्याने अकारस्य स्थानिवत्त्वेन स्त्रीबोधकत्वान्न दोष इति वाच्यं तद्रूपयोगाभावात्तस्याल्लोयमेवेत्याशयात् उदीचां ग्रहणं पु
काम्यामिति वक्तव्यमत्रा न च प्रतिपदोक्ते आपोन्यतरस्यामिति ह्रस्व एकस्यादिति वाच्यम् आर्यकेत्यत्रापि ह्रस्वं बाधित्वा अस्य प्रवृत्त्यादोषात् बहुच
टकिकेत्यत्र ह्रस्वाभावेन अस्य चारितार्थ्येन बाधनायोग इति वाच्यम् एवंचेदत्त इति नानुवर्तनेन तथा चार्यकेत्यत्र स्थानिवत्त्वेनाभि[illegible]दोषात् ङ्याप्
ग्रहणे इति तु प्रत्याख्यानमेव अन्ये तु खिस्तु च्छापिकेत्यत्र विकल्पः स्याच्च सिद्धान्ते तु स्त्रीबोधकेत्यर्थस्यासिद्धान्तितत्वेन [illegible]रेशस्य स्थानि
वत्त्वेन विशिष्टस्त्रीबोधकत्वेपि अवयवे अभावान्नेत्त्वविकल्पः न च समासेऽवयवगतस्त्रीत्वं तथा सत्यधापि पिप्पलीत्यत्रातेव निष्ठ नपुंसकत्वे
नह्रस्वापत्तेः वस्तुतस्तु [illegible]केत्यत्र स्थान्यलू निष्ठत्वेनाप्त्वं दुर्लभमिति केचित् परे तु त्यकेत्यत्रापोऽभावेन विकल्पानापत्तिरित्याहुः अत्रफ
लभेदात् ङ्याप्ग्रहणेऽदीर्घ इति प्रत्याख्यानासंभव इति तत्त्वम् अनुपसर्जनात् आचारक्विबन्तेति न च कर्तृक्विपि अजतो लोपे [illegible]
भावा देवादोष इति वाच्यं गौरादिपठितानडुह इत्यादिक्विबन्तस्यानभिधानमित्याशयात् न चोपसर्जनत्वं स्वार्थविशिष्टार्थान्तरबोधकत्वम् अ[illegible]
एवतदोरितिसूत्रेह इति प्राप्नोतीत्स्वइष्यते इति भाष्यस्यैकदेशयुक्तित्वकल्पनाऽभावः पदे चोपसर्जनत्वाभावः प्रकृते इति वाच्यम् अर्थान्तरवत्त्वे

रामः
१३०

तदृष्टं यत्स्वार्थबोधकत्वं तद्रूपोपसर्जनत्वात् वस्तुतो दृष्टपदनिवेशमानाभाव तदोरिति सूत्रस्थभाष्यविरोधश्चेति बोध्यम् पश्चगद्धनदूंति
च राजपुरुषे कार्यकालेन लोपार्थं दृष्टस्मदूतरान पेक्षत्वस्य ग्रहणे दोषएवेति वाच्यं तत्र यथोद्देशेनैषनिर्वाहे दृष्टपदनिवेशाभावेन प्रातिपदिकांतत्व
रूपमित्यर्थ इति यदिभक्तस्योधनविधिशब्द लवापंक्तेरलग्नतास्यादतः कर्मसाधनेनतदंतशब्देन कर्मधारयस्तथा च तदंतं यद्विधीयमानमसंतांत-
मित्येवं रूपमित्यर्थः प्रत्ययविधाविति नचविशिष्यतत्तद्रूपेणोपादानेएव ग्रहणं वर्तेतेति निषेधप्रवृत्त्यातज्ज्ञापकतेति वाच्यं ष्ठिवेरेतिसूत्रे विशिष्यो
पादानात्तदानात्र फलमित्याशंक्यात् नचतथापि तज्ज्ञापकतेति कुम्भकारेयापादनभाष्यासंगतिरिति वाच्यम् एतद्भाष्यमा... नविशिष्येत्यस्यचिं
त्यत्वात् अतन्तव्यापत्तेरिति नचएरपत्यंस्त्रीदृत्यादौसंभव इति वाच्यम् प्रत्ययग्रहणइत्यस्य वाचनिकत्वेनं तस्यानेनुनिषे...भावात् इतितत्वं कुं
भकारे यइति नेनुत्रियामितिगृह्यमाणविशेषणात् नदोषो बहुकुरुचरेत्यादौ नाप्यतिधीवरीतिफलं भूद्राचेतिज्ञापकेन सिद्धेः नचभद्र...तिज्ञा
पके न बहुकुरुचरेतिव्यावर्त्यमेवेति वाच्यं तथापिज्ञापकतासंगतेः किंचशूद्राचेत्यनेन तत्सूत्रेएव तदंतज्ञापकम् अतिधीवरीतितु बहुव्रीहौ
वेतिज्ञापकात् तत्सूत्रे तदंतं यत्तु तेनचात्रसिद्धं कुंभकारेयस्यापिनिष्कृष्येकार्थी भावाभावे वृत्त्यभावेनानापत्तिः नचपरमगार्ग्यायणदृति भाष्यादस्मा
च्चतद्भावेपिवृत्तिः तथासत्यपि वृक्षप्रचलनन्यायेन समुदायादेवोत्पत्तिः स्यात् नचफलभेदे वृक्षप्रचलनन्यायाऽप्रवृत्तिः वर्भूत्वत्यादावपि तदप्र
वृत्तौ दोषात्फलभेदेपि तत्प्रवृत्तिरित्यंगीकारात् किंचपारिष्कारिकार्थत्वलाभावनप्रातिपदिकत्वाभावादवनदोषः नचमृत्तो...नोपदंशामित्यत्रमाति

पदिकत्वार्थनियतसमभिव्याहारातिरिक्तस्य तत्रग्रहणेन ऽर्थवत्त्वमेवेति वाच्यं निपातस्यानर्थकस्येति स्थाने ऽव्ययस्येति पठनेऽदोषात् नच भाष्य
प्रामाण्यादर्थवत्त्वं तर्हि निपातसमभिव्याहारातिरिक्ते विशिष्टस्य स्त्र्यर्थवाचकत्वेनावयवस्य स्त्र्यर्थवाचकत्वाभावेनादोषात् नचैतदपि ऽप्रारोपितत्ववर्त्त
ते भाष्यादिति वाच्यं तर्हि वृक्षेति ((न्यायेनैव दोषदानस्य सुवचत्वात् नचावयवादुत्पन्नावपि विशिष्टस्यापि प्रकृतित्वेनोभयोर्वृद्धौ दोषानेति उक्त-
न्यायेन खंडनमसंगतमिति वाच्यं घाटचकाशेयेदोष तात्पर्यात् तत्रोभयवृद्धौ दोषात् इति चेन्न वृक्षेति न्यायस्यैतद्भाष्यादप्रवृत्तेः नचकरोभ
करः कुंभस्य कुले [illegible] वर्तेन समासे ऽवयवादेवोत्पत्तौ कुंभकारेयो गलेपतितत्त इति वाच्यं गतिकारकोपपदानामिति पूर्वसमासेनांतरंगटापि तदभावा
त् पष्ठीशेष इत्यस्यापि कारकत्वांगीकारात् नच सेनांतलक्षणकारिभ्यश्चेति ण्येन बाधाइगेव नेङ्गी वाच्यं विशेषविहितत्वेन ठकस्वल्पप्रवृत्तेः यद्वा
कुंभकारीव मनुष्यः कुंभकारी तस्यापत्यमित्यर्थे स्त्रीभ्यो ढगित्यस्य स्त्रीप्रत्ययांतादित्यर्थे ऽवयवाङ्ङीपि अवयवे निष्कृष्ये कार्यभावा [illegible] भावाङ्गगनुत्पत्तौ कौ
भकारेयो न सिद्ध्यति इत्यनुपसर्जनाधिकाराभावे दूषणं नच स्त्रीभ्यो ढगित्यत्र स्त्रीवाचकादित्यर्थे नादोष इति वाच्यं कन्नंतस्य बहुव्रीहौ ह्रस्वानाप
निरनुपसर्जनाधिकाराभावे विशिष्टस्योपसर्जनत्वेपि अवयवस्योपसर्जनत्वाभावात् यदि शास्त्रीयमुपसर्जनं तत्र गृह्यते तर्हि प्रत्याख्यानं वरमि
ति दिक् नच टिड्ढेति सूत्रे तदंतग्रहणं कर्तव्यमिति वाच्यं तथा सति यदि तरं ते स्त्रियामिति विशेषणं तर्हि बहुकुरुचरेति दूषणं यदि गृह्यमाणस्य तदा
ऽऽपिशलेति दूषणं सिद्धांते तु अनुपसर्जनादिति गृह्यमाणविशेषणादुभयं सिध्यतीति बोध्यम् अर्थवत्त्वाभावेनेति नचानुपसर्जनाधिकाराभावे ऽ

वयवस्य प्रातिपदिकत्वेन ङीबुत्पत्तिः क्तान्तेदानीं तु तदभाव इति विरोध इति वाच्यं तदधिकाराभावे इदृशार्थः वत्वग्रहे प्रमाणाभावात्तदधिकारसत्त्वे
तेनेदृशार्थवत्त्वज्ञापनादिति बोध्यम् निष्कृष्टैकार्थीभावत्वं च अपत्याद्यर्थान्वयितावच्छेदकावच्छिन्नवृत्तिमत्त्वं न च विशिष्टं शुद्धान्नातिरिच्य
त इति न्यायात्केवलेऽप्यन्वयितावच्छेदकावच्छिन्न इति अत्र पर्याप्तिमत्त्वस्य निवेश्यत्वात् असहाय एवेति तत्त्वं च अतिदिदिक्षितधर्माव
च्छिन्नासमभिव्याहृतत्वं धर्मश्च स्ववृत्तिधर्मनिरूप्यः तेन राम इत्यत्र न सर्वशब्दत्वातिदेशः सर्वशब्दत्वस्य रामशब्दत्वविरूपितत्वाभावात् न
चासमभिव्याहृतत्वमिति मास्तु दरिद्रेत्यत्र तत्त्वाभावान्न दोषः अन्तत्वं च स्वघटकप्रागभावानधिकरणत्वमिति इकारवृत्तिनिरूपितत्वेनास्तीति वा
च्यं तदनधिकरणकत्वरूपाऽकारस्याभाव इकारेऽस्तीति तादृशाभावरूपेकारवृत्तिधर्मेण तदधिकरणरूपाकारवृत्तिप्रतियोगित्वस्य निरू
पितत्वात्तदेवांगीक्रियते न च तदधिकरणभिन्नत्वमिति स्वस्मिन्स्वभेदानंगीकारेण नान्तत्वमिकारस्येति वाच्यं पूर्वोक्तरीत्याऽप्यन्तत्वस्यानेतुं
शक्यत्वादन्तोऽसमभिव्याहृतत्वमिति एवं चैकदेशयुक्तित्वमावश्यकमेव वस्तुतः एकस्मिन्नित्यस्यैकव्यक्तावभिन्न इत्यर्थः नन्वसहाय इति व्य
पदेशश्च विशिष्टवैशिष्ट्यं तथा चैकव्यक्त्यभिन्ने विशिष्टवैशिष्ट्यवत् कार्यं विशिष्टत्वं च घटकत्वघटितत्वादिरूपम् अस्याप्राप्तिरित्यादौ घट
कत्वातिदेशे यथा तदनधिकरणकत्वरूपमन्तत्वमिति लक्षणसमन्वयः इयायेत्यादौ च घटितत्वातिदेशोऽवयविन्यप्राप्तिः दरिद्रेत्यादौ तद
घटकत्वातिदेशेऽपि न तदनधिकरणत्वरूपमिवर्णान्तत्वमायातीति नातिव्याप्तिः इरियानित्यादौ तदादित्वानतिदेशेऽपि स्थानिवद्भावेन तद्धि

तांतत्वमानेयम् अत एव न प्रत्ययमात्रस्य तदंतत्वं ब्रूम इति दीक्षितग्रंथसंगतिः न चास्यापत्यमिति विग्रहे अण् इत्यवस्थायां प्रत्ययमात्र
स्य प्रातिपदिकत्वापत्तिरिष्टापत्तेः न चौपगव इत्येकदेशाकारस्यापि प्रातिपदिकत्वापत्तिः वृक्षप्रचलनन्यायेनादोषात् इति दिक् ॥ पंथाः नत्र
स्त्वत्रापि पुनरत्रेति न च वयोवाचिनां वैकल्पिकजातिकार्यत्वादप्रयोगे रूपद्वयं सिद्धं पुंयोगे वयस्य चरम इति बाधित्वा पुंयोगादाख्यायामिति ङी
षेव स्यादिति वार्तिकं तत्र कृतेपि वार्तिकेन ङीषं बाधित्वा ङीवेव स्यादिति गौरादिपाठः तत्सामर्थ्यात् पक्षे ङीषूङ्गिति रूपद्वयं सिद्धं तत्र वह्वादिषु
पाठः कार्यः किं वा मत्तोरो वेत्यनंतरं वार्तिकं कार्यं तेन सर्वत्र रूपद्वयं सिद्धं गौरादिपाठः किमर्थ इति वाच्यम् एवं सिद्धे एवं क्रियमाणेन वैक
ल्पिकं जातिकार्यं स्यान्नित्यत्वं वोध्यते तस्माच्च वह्वादिपाठस्य अपुंयोगे चारितार्थ्यं पुंयोगे परत्वान्ङीषेव स्यात् एवं मनोर्वे षं मुक्तेः अनन्त
रं पाठेपि पुंयोगे चारितार्थ्येन पुंयोगे ङीषेव स्यात् तस्माद्गौरादिपाठः वार्तिकं चेति वहवः अनित्यत्वफलं तु वृद्धास्त्रीजरेत्यत्र दैव ङीष् अ
त्रैव ब्रूमः तरुणी सुरेत्यत्र वयोवाचकत्वाभावादप्राप्ते ङीवर्थं वार्तिकं तत्र अपुंयोगे वैकल्पिकजातिकार्यत्वेन रूपद्वयेपि परत्वात् पुंयोगे ङी
षेव स्याद्वार्तिकं त्वत्र चरितार्थमिति पुंयोगे ङीषूघटितमेकमेव रूपं स्यादिति सिद्धमिष्टं गौरादिपाठः स्वव्यर्थः अत्र विचारयन्तु सुधियः वार्ति
कस्यान्यार्थं तापत्तेश्चेत्यर्थः तत्रे कमिति ह्रस्वः पाठः शक्तियष्ट्योरिकगेव विधेयः विधानसामर्थ्यात् यस्येति लोपः ॥ अन्यथा कगमेव विदि
दध्यात् वहिषष्ठिलोप इत्यत्र वहिषः षलोपोऽयश्चेदक् इति पाठ्यं तेन न दोषो विधानसामर्थ्यात् लोप इति चेत् तीयादिकं कितां तीयीका

सिद्धेः नचतत्रदीर्घोत्रैवह्रस्वः तोन्तीयीकीइत्यसिद्धेः प्राचांष्फ नतुष्फङेवविधेयः किंतद्धितग्रहणेन ङित्वसामर्थ्यादासुरेरुपसंख्यानमितिसिद्धमिति
चेन्न संहितापाठेङिरपिसंभाव्येत किंचतस्याङ्मात्रिकत्वेनाऽविशेषात् किंचगौरकस्याप्राप्त्याइगगादियञन्तप्रकृतिकत्वौड्यादिःयङ्
तप्रकृतिकचाबंतानहि वेक्षायामस्याद्धइतिपुंवत्त्वार्थं तस्याऽऽवश्यकत्वात् नंचभाष्येतत्प्रत्याख्यानमितिवाच्यं. तद्वदस्यापिकृतप्राय-
त्वात् प्रत्याख्यानेषायज्ञइतिचापिगोकक्षात्तस्मात्ष्फ इतिसिद्धागोकक्ष्यायणीनचगौकक्ष्याइतिस्यात् ष्फस्यचाणोऽपवादकत्वादि
तिवाच्यं प्राचांष्फइत्यत्रसर्वत्रग्रहाऽनुवृत्तिस्तच्चबाधकविषयेपिप्रवृत्त्यर्थं गौकक्ष्याइतितु उदीचांमतेएवंचगौकक्ष्यायाः प्रतिषेधो
वक्तव्यइतिसम्प्रसारणनिषेधकंवार्तिकमपिनारंभणीयमित्यपरमनुकूलं टिड्ढाणञिति टिदाद्यवयवत्वेति नचटिदाद्यवयवोऽकारइत्युक्तेका
रस्य प्रत्ययत्वाभावात्तद्ग्रहणाऽभावेनप्रातिपदिकविशेषणेनैव तदंतनिधोपरमकुरुचरीतिनस्यादितिवाच्यम् एकस्मिन्नपितदंतवि
धेरिदाद्यवयवाऽकारांतत्वस्यप्रत्ययाप्रत्ययग्रहणेप्रत्ययग्रहणइत्यस्याऽप्रवृत्त्यासमुदायेपिसत्त्वात् नचैवंबहुकुरुचरेत्यत्रापिवार-
णार्थमनुपसर्जनाऽधिकारस्यचारितार्थ्येनज्ञापकत्वाऽसंभवइतिवाच्यं टिदित्यादिप्रत्ययग्रहणेनतदंतग्रहणेन टिदंतमित्य
र्थात्समुदायेतदभावेनाचारितार्थ्यात् टिदाद्यवयवाकारांतमित्युक्तेतुपरिभाषाबाधःस्यात् तथाचटिदंतानंतयदकारांतमित्युक्तेपचाम्बे
ति प्रत्ययाऽकारश्चिदाद्यवयवोग्राह्यइत्याकलनीयं परेत्विति नचक्वचिदनन्तविधाविति निषेधइत्यस्याऽभावेनचक्राणइत्यत्रस्यान्निवने

नटित्वाट्टेरेत्वंस्यादितिवाच्यम् टित्तइत्यत्रतङामित्यनुवर्त्ततेटित्तस्तङांटेरेइतिन्यासेनवाऽदोषात् नचङि·दादेशानांनेर्ङि·त्वमित्यस्याभा
वलविषीष्टेत्यत्रगुणोनस्यादितिवाच्यं स्लिङ्‌सिचावितिक्ङितिकित्वविधानाज्ज्ञापकात् क्वचिन्नङि·दादेशानांङि·त्वमित्युच्यमानत्वात् ह
लउपधायाइति तत्रसामर्थ्योद्व्यवधानेपिभवति गार्ग्यायणीत्यत्रतुयेननेति न्यायेननदोषइतिवाच्यम् उपधापदानुवृत्तेर्वचन-
कल्पनापेक्षयालघीयस्त्वात् षः आदिरुपरंजकेति अविमह्योष्टिषच् इत्यादावनायासतोवारकत्वेतिकेचित् नादेशाइति न
चेत्संभवत्तुलोपंबाधित्वाऽऽदेशःस्यादेवेतिवाच्यम् इदितिमहासंज्ञयालोपंविनासंज्ञाऽप्रवृत्तेः सर्वत्रसर्वेषामितिफलितत्वात् ससम्यास्वनुत्पत्तेः
आवस्थायनीति प्राचांष्फस्तद्धितः सर्वत्रेतिन्यासेनसिद्धम् एतेनापकर्षः परास्तः आरंभसामर्थ्यादुत्तरसूत्रेनित्यत्वसिद्धेः नच माण्डूकस्यास्य
त्त्वेनङीप्प्राप्तः इतिटाप्ङीपोरितिसुगमइतिवाच्यम् कौरव्यसाहचर्येणगोत्रोणं नमात्रस्यग्रहणेनतत्रजातिलक्षणङीषाबाधादितिसुधियः
विभाषा। बहवोवृषलपत्नयइति नचात्रप्रयोजनादनुपसर्ज्जनादितिज्ञापनाऽसंगतिः अत्रैवकर्तव्येतत्रकरणात् नचात्रविशिष्टस्याऽनुपसर्जन
त्वमेव॥ सपूर्वपतिशब्दत्वाभावात्॥ पतिशब्देसमासकालेबहुवृषलेन्यस्याऽनवयवत्वात् नदंतस्येतिनासूत्रि मूलोक्तेदोषात् समासस्येतिनु
नास्त्रि बहुचपूर्वेऽनापत्तेः बहुवृषलपत्नीतुनदोषः प्रत्यासत्त्यापतिशब्देनकेवलेनजातस्यसमासस्यानुपसर्जनस्यग्रहणात्॥ इतेरितिपुनो
र्कंपतिरिवमनुष्यापत्तिरित्यत्रापत्तेः व्यपदेशिवत्त्वेन सपूर्वत्वात् सपूर्वग्रहणंतुवृत्त्यभावेचरितार्थं त्रीण्येतिकुंभकपाललोहिनीत्यत्रनप्राप्नोत्यतइ

यंव्याख्यास्यमाणविशेषणमिति त्रिष्वेनीत्यर्थो बोध्यः सपत्नीति निपातनात् स्त्रीविशेष एवेत्यर्थः सूर्या ॥ सूर्यादीनामङ्गानामित्यर्थे सौरी न स्यात् यग्रहण-
मिति सूर्यमानयतीति सूर्यो रणीत्यत्रैकादेशे अकारस्य सूर्यसंबन्धित्वादुपधात्वाच्च लोपः स्यादित्यावश्यकमिति केचित् उपधात्वाभावान्नेत्यपरे
उपमिति विसारिणो मत्स्ये इति निर्देशोऽसंदेहाय ङाविव्येव वक्तव्यत्वाद्वा सत्स्यो अग्रहणं नक्षत्रवाचकादिति व्यावर्त्यं तुतिष्यसूत्र कपुरुषस्य
इदं नैष्यमित्याहुः दंष्ट्रादूत्यस्य मजादौ पाठः अपर इति कमण्डलो इति मेदिन्या पिठरे तु इति पिठरमिति कोशस्य संकोचेनानुमतत्वाज्जातित्वमि-
त्याशयः वस्तुत एकेन कोशेन कोशद्वयसंकोचस्यानुचितत्वात् कोशद्वये तर्हि कमण्डलाविति कोशे उपलक्षणतया व्याख्येयापत्तिः एवं च अमत्र
सामान्यपरत्वेनानुमतत्वान्न जातित्वमित्यप्राप्तङीष एव विधानं न नियम इति बोध्यं नील्या अनित्यत्व अप्रतिपदोक्तस्येति बोध्यं वा गोषु सत्त्वे निविशते
ऽपैति पृथगिति अभावेऽतिव्याप्तेः सत्त्वे निविशत इति जातावतिव्याप्तेरपैतीति आत्मनिष्ठधर्मेति व्याप्तेः पृथगिति आश्रयेऽतिव्याप्तेरक्रियाज
इति क्रियान्समकृतिसाध्याजन्यस्य क्रियात्वात्तस्य च निषेधः अत्रेदं बोध्यं मानेनुगणलक्षणमभिहितामाकडारादूत्यत्र भाष्ये तु गुणवचनलक्षणम
भिहितमेवं च विरोधाभावादङ्ग विशेषणसार्थक्याद् भाष्यं तु योजमित्येकदेशयुक्तित्वं चिन्त्यं स्पष्टं चेदं शब्दरत्ने सुचि शब्दे कद्रिकारादिति स्यादि
त्याह सुलक्षेति नच संयोगोपधत्वेन निषेधः खरुसाहचर्येण संयोगोपधेति निषेधोऽप्युकारान्तस्यैवेत्याशयात् वस्तुतः [illegible]मित्युदाहरणीयं पिय
कत्तिरिति नषट्स्वस्रादिभ्य इत्यस्य स्त्रियां यत्नाप्नोतीति व्याख्यानेनात्राऽपि निषेध इदं फलं चिन्त्यं सुगंधिरिति तु फलम् पुराणशब्दस्याप्तं तत्त्वमि

तिङीवृङीषोः स्वरेविशेषाभाववदूत्युक्तं पुंयोःस्त्रियांवर्तमानस्येति पुंस्येवेति नचज्येष्ठाकनिष्ठेत्यजादिनिपातनंव्यर्थंङी[illegible]प्राप्तेः पुंस्येवविद्यमा
नत्वाभावादिति एवंस्याप्रयोजकत्वात् अतएवंवशुल्कीतिपुंयोगेसिद्धः महद्धिममिति नचस्वार्थेपरिपूर्णपदार्थान्तरसाकाङ्क्षत्वदूतिन्यायेन
सुवुत्पत्त्यनंतरं महत्त्वविवक्षायांङीवृजायमानः सुवंतात्स्यादितिवाच्यं प्रातिपदिकादित्यधिकारेणतदव्यवहितोत्पत्त्या सुवंतेपिदोषाभा
वात् तद्धितेनुप्रातिपदिकप्रकृतिकेलक्षणयासुवंतादेवोत्पत्तिरितिज्ञेयं यवनाल्लिप्यां यवनशब्दस्ययवनलिपेरौपचारिकत्वेनतस्येद
मित्यणोप्राप्त्यौ तत्रैतस्यचारितार्थ्येनयवनानांलिपिरित्यत्राणांबाधकः परत्वात्स्यादितिबोध्यम् एवंचाएतद्बाधकोङीष्वितिवहवएवग्रं
थाश्चिंत्याः अयंपुंयोगेपिङीपूकालीत्यत्रनजानपदेतिसूत्रेवर्णग्रहणात् अन्यथावर्णादितिसूत्रेकालादित्युक्त्या[illegible]णेएवतादृशरूपसि
द्धेः नचतेनङीष्भवतीति अनुदात्तःस्यादितिवाच्यम् कालशब्दस्यान्तोदात्तत्वेनोदात्तस्वरेणङीष्ङीपोः स्वरेविशेषाभावात् यदितुवर्णग्रह
णंमात्रागौरवात्यद्गौरवमितिज्ञापकंतयाचरितार्थमित्युच्यते तदापुंयोगेङीषेष्टएवेतिबोध्यम् अंवांवेति नचपदादादिरित्यर्थेगोस्यदूत
त्रसुवुत्पत्तेः पूर्वंसमासेपिनिषेधप्रवृत्त्यापत्त्वार्थमावश्यकमितिवाच्यम् पदस्यादिरित्यभिप्रेत्यप्रवृत्तत्वेनाऽस्यचिंत्यत्वात् एवंच्चनियमार्थता
मप्रयुक्तम् हृदिस्थदूत्यपिपदादादिरितिविग्रहेणैवसिद्धमितिज्ञेयम् अस्वाङ्ग अस्वाङ्गादितिवहुव्रीहिविशेषणेपिनस्वाङ्गं यत्रेतिविग्रहेणासु
रापीतीत्यादिसिद्धेर्दोषाभावेनपूर्वग्रहणस्यस्पष्टार्थमेवेतिवाच्यम् उत्तरसूत्रेणस्वाङ्गं यत्रेतिकर्तुमशक्यत्वेनस्वाङ्गाभिन्नात्परंयत्स्वाङ्गं तदन्ताद

नुपसर्जनादित्यर्थे कल्याणपाणिपादेत्यत्रापत्तिः स्यात् पूर्वपदग्रहणे तु यत्स्वाङ्गं नत्तत्पूर्वपदं यच्च पूर्वपदं न तत्स्वाङ्गमित्यदोष इति बोध्यम्
स्वाङ्गाच्चो एकविभक्तीति शास्त्रीयमुपसर्ज्जनमेव ग्राह्यम् अत एवा पराश्चन्ते केशाश्च अपरकेशाः आईषत् अपरकेशादिति विग्रहे आपरकेशीत्यत्र पराद्विवद्भावेन आपरेति पूर्वपदं तस्मात्परं स्वाङ्गं केशेति शास्त्रीयोपसर्जनकमिति ङीब् भवति लौकिकाऽप्रधानत्वग्रहणे तु तत्र तदभावे तङीप् न स्यादिति कृत्रिमन्यायेन शास्त्रीयस्यैव ग्रहणमुचितमिति बोध्यम् एवञ्चाऽप्रधानत्वं चेत्प्रत्यर्थश्चेत्स्यः समुच्चयार्थ्वेति सुधियः शिखेति प्रत्युदाहरणमिति न चोपसर्जनादित्यस्याऽभावे बहुव्रीहेरित्यनुपसर्ज्जनादित्युभयमपि प्रसक्तत्वाऽनुपसर्जनादिति संबंधे सुशिखेत्यत्र टापं बाधित्वा ङीप् स्यादुपसंजनिष्यतीति न्यायेनेति सम्यगेवग्रंथः अशिखेत्यत्रापि न सहनञितिनिषेधः अस्य शिखेवं भाष्याऽभिप्राययादिति वाच्यम् अत इत्यनुवृत्तौ शिखेत्यत्र टापं बाधित्वा ङीप् स्यान्न तु सुशिखेत्यत्रोपसंजनिष्यन्न्यायस्य सामर्थ्यमूलकत्वाद् शिखेत्यत्र चारितार्थ्यादित्येतदुपसङ्गतिरिति कश्चित् वस्तुतउपसंजनिष्यन्न्यायस्याऽप्रवृत्तिरिति सम्यगेव मूलाभिमतम् नानेरं देन्तरं गेऽतिव्याप्तेः समानकालिकाऽनेकव्यक्तिवृत्त्यनुगतसंस्थानव्यंग्येति तत्र समानकालिकेति विशेषणं व्यर्थमनेकवृत्तीत्येनैव गंतार्थत्वात् गोत्रं चेति शास्त्रीयम् औपगवीभार्य्ये पुंवत्वनिषेधो न प्राप्नोतीति न चाऽत्राऽपि शास्त्रीयं गोत्रं वर्ततइति वाच्यम् एतद्भाष्यप्रामाण्याद्विशेष्यतस्य श्रोवदद्रव्यपरिमाणेमित्यत्रपरिमाणपदं व्यर्थंव्यावर्त्याऽलाभात् लक्षणयागोत्रस्य विवक्षितत्वात् परेत्विति॥ प्रथमपक्षे ऽपदेशान्तर्गतत्वेनाक

त्याश्रयान्यतरोपदेशव्यंग्यायद्वापक्षे आकृतिग्रहणाउपदेशव्यंग्याचेत्यर्थः अत्रेदं तत्त्वम् औपगवीभार्येन दोषः शुद्धप्रत्ययलक्षणेन गोत्र
त्वंन प्रत्ययाप्रत्ययसाधारणत्वात् किंचाऽणि जातित्वंपूर्वकत्वेदानीं प्रत्ययलक्षणेन जातित्वाभावात् तस्यापि साधारणत्वात् किंच ताव
न्मात्रे जातित्वेपि ततः परस्त्रीप्रत्ययाऽभावेन जातित्वाऽभावः ॥ किं चाल्विधित्वेन ॥ पूर्वभाष्ये लग्ने लौकिकगोत्राऽऽयणमनुचितम् नापि
ब्राह्मोनारदवृत्त्या सिद्धिः तत्र जातिपदेनाऽऽकृतिरिति लक्षणकस्य घटत्वेत्यादि लौकिकस्य वा ग्रहणात् अत एव ब्राह्मोएवण इति सिद्धि
रन्यथात्र गोत्रत्वेन जातित्वाद्दोषः स्यात् एवं चावंतिरिति भाष्यमप्यनुकूलमिति तत्त्वविदः अत्रेदं बोध्यम् तटस्थितिकोशस्य प्रामाणि
कत्वमनुचितम् किंच कस्य लिङ्गस्य त्याग इति विनिगमनाऽभावः जातेराविष्टलिङ्गस्वभावस्याऽपि आविष्टमात्रम् स्वत एव नाऽन्यतोलि
ङ्ग यस्येति विग्रहेण स्वनिष्ठलिङ्गत्वेपि न दोषः शुक्लादौ त्वाश्रयव्यक्तिगतत्वान्नाविष्टलिंगत्वम् असर्वलिंगामित्यस्यापि सर्वेषां यानि स्त्रितोऽन्य
स्य चेत्ति तद्भाववान् किंतु स्वाश्रयमात्रलिंगवतीत्यर्थेनाऽविरोधः एतयोरिति द्वित्वनिर्देशोऽपि कुमारशब्दविषय इति न दोषः कुमारश
ब्दे हि आकृतीति लिंगानां चेति द्वयमेवेति न दोषः एवं च गोत्रं चेत्यस्य साहचर्येण संज्ञात्वमेव अतिदेशमानाऽभावात् स्पष्टेवेति महा
शुद्रीति भाष्यमेकदेश्युक्तिः ॥ बहूनामजादिपाठाद्द्रोणी कुटीत्यादयो गोरादिषु बोध्याः ॥३२॥ उपमानशब्देन सादृश्यप्रतीतेस्तस्मात्त्वार्थेष्य

त्र् सादृश्यविशिष्टपूर्वपदाक्षेपापेक्षया केवलपूर्वपदमाक्षिप्य गौपम्येइतिविशेषणं तेनकरभोपमोरुरित्यत्रादोषइतिचिन्त्यम्॥ ॥
इतिस्त्रीप्रत्ययाः समाप्ताः॥ ॥शुभम्॥ सम्वत् १९ ५९ ॥ मीती चैत्रशुक्लात्रयोदश्यां ॥ रविवासरे ॥ शुभं ॥

॥इति शब्देंदुशेखरटीका सदाशिवभट्टी समाप्ता ॥ १ ॥